# A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1913-14 TO 1915-16

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.,
CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS.

*Prepared under the orders of the Government of Madras.*

**Volume II.—Part 1.—Sanskrit B**

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1917.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

## 1913-14 TO 1915-16

FOR THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS


BY

S. KUPPUSWAMI SASTRI, M.A.,

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS.


*Prepared under the orders of the Government of Madras.*

**Volume II.—Part 1.—Sanskrit B.**


MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1917.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

## 1913-14 TO 1915-16.

## VOLUME II.

### PART I—SANSKRIT—B.

R. No. **1330.**

Paper. 11 × 9½ inches. Foll. 240. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Rāmasvāmi Śāstri of Virincipuram in the North Arcot district.

Bound in two volumes. Foll. 21*b*, 23*b*, 25*b*, 27, 28, 32*a*, 41*b* to 44*b*, 71*a*, 73*a*, 172, 177*b* to 180*b*, 186, 187*a*, 189 to 191*a*, 106*a*, 197, 199*b*, 201, 202*a*, 212*b* to 220*b*, 228*b* to 225*a*, 227 to 230, 232 to 237, and 238*b* are left blank.

अजितागमः.

AJITĀGAMAḤ.

An Āgama work on Śaivism dealing with details of ceremonies and festivals connected with the worship of Śiva in temples.

Contains Paṭalas 1 to 62 and the names of these Paṭalas are given below :—

१. तन्त्रावतारः.

२. शिवस्वरूपविधिः.

३. लिङ्गोत्पत्तिविधिः.

४. लिङ्गलक्षणम्.

५. शिलासंग्रहणम्.

६. देशनिर्देशः.

७. कर्षणविधिः.

८. वास्तुपूजा.

९. Broken.

१०. Do.

११. उपपीठविधिः.

१२ to १५. Wanting.

१६. पिण्डिकालक्षणम्.

१७. गर्भन्यासविधिः.

१८ and १९. Wanting.

२०. अर्चनाविधिः.

२१. अग्निकार्यविधिः.

२२. अर्चनाङ्गद्रव्याणि.

२३. आरात्रिकम्.

२४. नीराजनम्.

२५. नित्योत्सवविधिः.

२६. मुद्रालक्षणम्.

२७. Wanting.

२८. स्नपनलक्षणम्.

२९. विशेषार्चनविधिः.

३०. क्षीराभिषेकविधिः.

३१. लिङ्गपूरविधिः.

३२. घृतस्नानविधिः.

३३. शीतकुम्भविधिः.

३४. Broken.

३५. सकललक्षणस्थापनविधिः.

३६. मण्डपलक्षणविधिः.

३७. प्राकारलक्षणविधिः.

३८. परिवारालयविधिः.
३९. प्रतिमास्थापनविधिः.
४०. सुखासनस्थापनविधिः.
४१. ब्रह्मकेशवस्थापनविधिः.
४२. सोमश्रीविष्णुपद्मजस्थापनविधिः.
४३. हर्यर्चाप्रतिष्ठाविधिः.
४४. अर्धनारीश्वरप्रतिष्ठा.
४५. वृषेन्द्रप्रतिष्ठा
४६. ब्रह्मप्रतिष्ठा.
४७. मातृस्थापनम्.
४८. विनायकस्थापनम्.
४९. सूर्यस्थापनविधिः.
५०. चण्डेशस्थापनविधिः.
५१. विष्णुस्थापनम्.
५२. शूलस्थापनम्.
५३. विमानप्रतिष्ठा.
५४. गोलकादिस्थापनम्.
५५. गुरुप्रतिष्ठाविधिः.
५६. वृषदानविधिः.
५७. वसन्तोत्सवविधिः.
५८. प्रत्ययादिपटलः.
५९. जीर्णोद्धारपटलः.
६०. संप्रोक्षणविधिः.
६१. पिण्डिकास्थापनविधिः.
६२. प्रायश्चित्तविधिः.
सकलार्चनविधिः.
विशेषोत्सवविधिः.

**Beginning:**

श्रीमद्गिरितटे रम्ये मन्दरे चारुकन्दरे ।
देवदानवगन्धर्वदैत्यदिव्याङ्गनाजनैः ॥

*     *     *     *

वस्वादित्यैश्च रुद्राद्यैः सर्वदेवैः समावृतम् ।
विनयेनाच्युतो गत्वा पृच्छति स्म जगद्गुरुम् ॥

अच्युत उवाच—

भगवन् देवदेवेश त्रिपुरान्तक शंकर ।
अजितं नाम यत्तन्त्रं शिवात्प्राप्तस्त्वया पुरा ॥
तन्ममाचक्ष्व देवेश तस्योत्पत्तिपुरःसरम् ।
एवमुक्तो महादेवः स्फुरल्लालाटलोचनः ॥
उवाच तन्त्रं हृष्टात्मा गिरिजापतिरव्ययः ।
यथाश्रुतं सुशिवादच्युताय महात्मने ॥

महेश्वर उवाच—

आसीत्पूर्वं हि सर्गादौ व्योमरूपात्पराच्छिवात् ।
शब्दस्ततोऽक्षरस्तस्माच्छब्दराशिरनुत्तमः ॥

*     *     *     *

**Colophon:**

इत्यजिताख्ये महातन्त्रे तन्त्रावतारः प्रथमः ॥

**End:**

द्वादशादावसानान्तं ध्वजावस्थानमेव वा ।
जीर्णादिदोषये (षे तं) त्यक्त्वा ध्वजमन्यं निवेशयेत् ॥

**Colophon:**

इत्यजिताख्ये महातन्त्रे विशेषोत्सवपटलः ॥

चैत्रमासविधेयः (या) स्याद्दमना(द् ध्वजस्या)रोहणक्रिया ।
पवित्रं प्रकृतिर्यस्स्यात्तदनन्तरमुच्यते ॥

*     *     *     *

वक्त्राणामग्निजिह्वानां ज्वालानां च निरूपिणाम् ।
मुष्टिं काम्यविधानेषु प्रसङ्गादभिधीयते ॥
कुण्डमानमुखं त्वाहुर्हृदाहुतिभिरीप्सितम् ।
पश्चिमे शिष्यसंस्कारनित्यहोमौ समाचरेत् ॥

R. No. **1331.**

Paper. 11¼ × 9⅞ inches. Foll. 72. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam in the Chingleput district.

तत्त्वचिन्तामणिव्याख्या—प्रकाशः.

TATTVACINTĀMAṆIVYĀKHYĀ : PRAKĀŚAḤ.

By Rucidatta. Same work as that described under No. 4013 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa incomplete.

**Beginning:**

व्यालोलकर्णमणिकुण्डलकान्तिपूरकिर्मीरिताद्विगुणगण्डमरी(चि)भाजः ।
तत्पातु पञ्चशरसङ्गरसाहसस्य . . . . . . म्बिकायाः ॥
आलोच्य निखिलं शास्त्रं विचार्य च पुनःपुनः ।
शब्दतन्त्रप्रकाशोऽयं रुचिदत्तेन तन्यते ॥

उपमानस्य शक्तिग्राहकत्वेन शब्दोपजीव्यत्वात्तन्निरूपणानन्तरं शब्दो निरूप्यत इत्यत्राह—अथेति । यद्यप्यतिदेशवाक्यसामान्यस्य शब्दसामान्यस्य उपमानोपजीव्यत्वं तथापि न सर्वस्य तथात्वम् ।

**End:**

भेदस्य विरहमभेदमवगाहते । तदभाने द्वितीयस्य उभयत्रापि च स एवायं गकार इति व्यपदेशः । यत्र तु तद्वृत्तिजात्यवच्छिन्नजातिमत्त्वमन्यत्र भासते तत्त्वयमिति । केचित्तु.

---

R. No. **1332.**

Paper. 12 × 9¾ inches. Foll. 39. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. C. Paṭṭābhirāmamūrti of Vizianagaram.

शाण्डिलच्यशतसूत्रभाष्यम्.

ŚĀṆḌILYAŚATASŪTRABHĀṢYAM.

By Svapnēśvarācārya. Similar to the work described under No. 5150 of the D.C.S. MSS., Vol. XI.

Complete in three Adhyāyas.

**Beginning:**

प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा ।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥
गोविन्दचरणद्वन्द्वमधुनो महदद्भुतम् ।
यत्पायिनो न मुह्यन्ति मुह्यन्ति यदपायिनः ॥

जीवानां ब्रह्मभावापत्तिर्मुक्तिरिति वक्ष्यते । जीवाश्च ब्रह्मणोऽत्यन्तमभिन्ना इति तेषां संसारस्त्रिगुणात्मकान्तःकरणोपाधिकृतो न साहजिकः, स्फटिकस्येव जपादिसान्निधिकृतं लौहित्यादिकम्; स चौपाधिकत्वादेव न ज्ञानेन निवर्तनीयः, किं तु उपाध्युपधेययोरन्यतरहानेन तत्सम्बन्धहानेन वा । न हि निपुणतरदर्शनेनाप्युपाधियोगे स्फटिकलौहित्यभ्रमनिवृत्तिरस्ति । तथेह न सर्वसत्तास्फुरणात्मनो हानिः सम्भवति ।

* * * *

सर्वसत्ताप्रकाशकतयेति । सर्वमेतद्द्वितीये तृतीये स्फुटीभविष्यति । तस्मात्पुरुषार्थहेतुत्वाद्धर्मस्येव भक्तेः मीमांसावित्सयेदं सूत्रम्—अथातो भक्तिजिज्ञासा । अथेत्यधिकारार्थो नानन्तर्यार्थः ।

* * * *

**Colophon:**

इत्याचार्यस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिलच्यशतसूत्रीयभाष्ये प्रथमाध्यायस्य प्रथममाह्निकम् ॥

**End:**

प्रलये प्रलयाख्यविकारातिरिक्तस्य विकारस्याभाव एव । संस्कारास्तु सूक्ष्मात्मना तिष्ठन्तीति न कोऽपि दोषः ॥

पर्यवसिता त्रिलक्षणी भक्तिमीमांसा ॥

परिवीतपीतवसनं घनोपमं शतपत्रपत्रसदृशायतेक्षणम् ।
धृतवेणु रेणुपरमण्डितं गवां हृदि नोऽस्तु कौस्तुभविभूषणं महः॥
गौडक्ष्मावलये विशारद इति ख्यातादभूद्भूमणेः
सर्वोर्वीपतिसार्वभौमपदभाक् प्रज्ञावतामग्रणीः ।
तस्मादानजलेश्वरो बुधवरस्सेनाधिपः क्ष्माभृतां
स्वप्नेशेन कृतं तदङ्गजनुषा सद्भक्तिमीमांसनम् ॥

**Colophon:**

इति श्रीस्वप्नेश्वरविद्वद्वरविरचिते शाण्डिल्यशतसूत्रीये भाष्ये तृतीयस्याध्यायस्य द्वितीयमाह्निकम् ॥

समाप्तश्चाध्यायः ॥

समाप्तेयं भाक्तिमीमांसा ॥

विश्वनाथ अच्युतरामेण लिखितम् ॥

---

## R. No. 1333.

Paper. 11 × 8¾ inches. Foll. 218. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1914–15 from a palm-leaf MS. of **M.R.Ry.** S. Gōpālacārya of Villiyambākam

तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ: TARKACŪḌĀMAṆIḤ.

By Dharamrājādhvarin, native of Kaṇḍramāṇikkam.

Same work as that described under No. 4102 of the **D.C.S.** MSS., Vol. VIII.

Contains up to the Vidhivāda in the Śabdakhaṇḍa. It is stated in this manuscript that it has been copied from the manuscript of Dvivēdi Vēṅkaṭācāriyar.

**Beginning:**

अवसरसंगत्या एककार्यत्वसंगत्या वा आसक्तिनिरूपणमभिप्रेत्यासक्तिलक्षणमुक्तं मणौ--आसक्तिश्चेति । तदनुपपन्नम्, घटेन शुभ्रं जलमाहरेत्यादावव्याप्त्यापत्तेरित्यत आह—अव्यवधानमिति ।

**End:**

तज्जन्येति । याजनाद्यत्रोपायत्रयान्विते धनार्जने कृष्याद्युपायान्यस्यार्थान्निरासे धनान्तरार्जने तदन्वयनिरासात् तदर्थं तन्त्रं प्रवर्तेतैवेत्यर्थः ॥

**Colophon:**

इति विधिवादः समाप्तः ॥
इति रुचिदत्तविवरणं धर्मराजाध्वरिविरचितम् ॥

---

R. No. **1334.**

Paper. 10¼ × 9⅜ inches. Foll. 104. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of Śrīnivāsavaradatātācāriyār of Villiyambākam.

## विक्रान्तकौरवम्.

## VIKRĀNTAKAURAVAM.

The plot of this drama is the marriage of Kauravēśvara or Sōmēśvara, son of Sōmaprabha, with Sulōcana, the daughter of the king of Kāśi. By Hastimalla, son of Bhaṭṭāragōvindasvāmin or Gōvindabhaṭṭasvāmin of Śrīvatsagōtra, who had five other sons, viz., Kumāra, Satyavākya, Dēvaravallabha, Udayabhūṣaṇa (the elder brothers of the author) and Vardhamāṇa, the author's younger brother.

The author is said to have been honoured by the Pāṇḍya king in hundred eulogistic stanzas in the open assembly for his prowess in having fought with elephants. He was apparently a resident of Dīpaṅguḍi. His father Gōvindabhaṭṭa is traced to Samantabhadra as the remote disciple of the latter thus :

Samantabhadra (author of Tattvārthasūtravyākhyā)
|
Śivakōti and Śivāyana (disciples)
|
Vīrasēna (descendant)
|
Jinasēna (disciple and author of Ādipurāṇa)
|
Guṇabhadra (disciple)
|
Gōvindabhaṭṭa (remote disciple and the author's father).

Complete in six Aṅkas, namely, (१) वाराणसीसंदर्शन, (२) गङ्गामज्जन, (३) स्वयंवरयात्रा, (४) कौरवपौरवीय, (५) कौरवपौरवीयसंकेत, (६) कौतुकबन्ध.

**Beginning:**

असिमषिमुखा वृत्तिर्येन क्षितौ प्रकटीकृता
भरतमहिपः सम्राडचस्यात्मजो भुवनोत्तरः ।
सुरपमकुटीकोटीनीराजिताङ्घ्रिसरोरुहः
प्रथमजिनपः श्रेयो भूयो ददातु मुदा सदा ॥

(नान्द्यन्ते) सूत्रधारः—अलमलमतिप्रसङ्गेन । मारिष इतस्तावत् ।

(प्रविश्य) पारिपार्श्वकः—भाव, अयमस्मि । आज्ञापयत्वार्यः ।

सूत्रधारः—श्रृणु तावत् । नानादिगन्तवास्तव्यपण्डिताखण्डमण्डलमण्डितामिमां परिषदं प्रार्थितवानस्मि ।

मारिषः—किमिति ।

सूत्रधारः—चिराभ्यासपल्लविता मदीयनाट्यशास्त्रविद्या सादरावलोकनेन सफलीक्रियतामिति ।

* * * *

सूत्रधारः—(स्मरणमभिनीय) आः, स्मृतम् । अस्ति किल सरस्वतीस्वयंवरवल्लभेन भट्टारगोविन्दस्वामिसूनुना हस्तिमल्लनाम्ना महाकवितल्लजेन विरचितं विक्रान्तकौरवं नाम रूपकमिति ।

मारिषः—अपि तादृशो हस्तिमल्लः ? ।

सूत्रधारः--

सरस्वत्या देव्याः श्रुतियुगवतंसत्वमयते
सुधासध्रीचीना त्रिजगति यदीया सुभणितिः ।
कवीन्द्राणां चेतःकुवलयसमुल्लासनविधौ
शरज्ज्योत्स्नालीलां कलयति मनोहारिरचना ॥

* * * *

(नेपथ्याभिमुखमवलोक्य) अहो सुलोचनास्वयंवरयात्रामहोत्सवसंदर्शनाय चतुरङ्गबलेन सह वाराणसीं प्रस्थितेन कौरवेश्वरेण समानीतस्य तत्प्रियसुहृदो विशारदस्य भूमिकामादाय रङ्गतरङ्ग इत एवाभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

* * * *

श्रीवत्सगोत्रजनभूषणगोपभट्टप्रेमैकधामतनुजो भुवि हस्तियुद्धात् ।
नानाकलाम्बुनिधिपाण्ड्यमहेश्वरेण श्लोकैः शतैः सदसि सत्कृतवान् बभूव ॥

**Colophon:**

इति श्रीगोविन्दस्वामिनः सूनुना हस्तिमल्लेन विरचिते विक्रान्तकौरवीयनाटके वाराणसीसंदर्शनं नाम प्रथमोऽङ्कः ॥

**End:**

राजा—

संबन्धमीदृशमवाप्य नवीकृतोऽसावस्मास्वनल्पशुभपङ्क्तिरनुग्रहो वः ।
प्राप्तो मनोरथपथाभ्यधिकः प्रमोदो भूयः प्रियं मम किमस्ति गवेषणीयम् ॥

तथाप्येतद्भवतु—

भूयाद्भूतेषु धर्मप्रकृतिरसुमतां निष्प्रकम्पानुकम्पा
धर्म्यं पात्रे विसृष्टयै व्ययनियतिवशादार्जयन्त्वर्थमार्याः ।

संतानस्थापनायै विदधतु गृहिणः कामखेदापनोदं
चेष्टन्तामात्मनीना निरुपधिशुचये मोक्षसौख्योदयाय ॥

महाराजः—एवमस्तु, वयं च संवित्प्रकाशकौटस्थ्यमयीं मायातिलङ्घि-नीवापवर्गस्य पदवीं त्रयीमाराधयामहे ॥

(निष्क्रान्ताः सर्वे)

श्रीमूलसंघव्योमेन्दुर्भारते भावितीर्थकृत् ।
देशे समन्तभद्राख्ये मुनिर्जीयात्पदर्द्धिकः ॥

तत्त्वार्थसूत्रव्याख्यानं गन्धहस्तिप्रवर्तकः ।
स्वामी समन्तभद्रोऽभूद्देशो गमनिर्देशकः ॥

अवटतटमटति झटिति स्फुटपटुवाचाटधूर्जटिरपि ।
जिह्वावादिनि समन्तभद्रे स्थितवति सति का कथान्येषाम् ॥

शिष्यौ तदीयौ शिवकोटिनामा शिवायनः शास्त्रविदां वरेण्यौ ।
कृत्स्नश्रुतश्रीगुणपादमूलेऽप्यधीतवन्तौ भवतः कृतार्थौ ॥

तदन्वयेऽभूद्विदुषां वरिष्ठः स्याद्वादनिष्ठः सकलागमज्ञः ।
श्रीवीरसेनो जनितार्कश्रीः प्रध्वस्तरागादिसमस्तदोषः ॥

यस्य वाचां प्रसादेन ह्यमेयं भुवनत्रयम् ।
आसीदष्टाङ्गनैमित्तज्ञानरूपविदां वरम् ॥

तच्छिष्यप्रवरो जातो जिनसेनमुनीश्वरः ।
यद्वाङ्मयं पुरोरासीत्पुराणं प्रथमं भुवि ॥

तदीयप्रियशिष्योऽभूद्गुणभद्रमुनीश्वरः ।
शलाकाः पुरुषा यस्य सूक्तिभिर्भूषिताः सदा ॥

गुणभद्रगुरोस्तस्य माहात्म्यं केन वर्ण्यते ।
यस्य वाक्सुधया भूमावभिषिक्ता जिनेश्वराः ॥

तच्छिष्यानुक्रमे याते सङ्घचेयो विश्रुतो भुवि ।
गोविन्दभट्ट इत्यासीत् विद्वान् मिथ्यात्ववर्जितः ॥
देवागमनसूत्रस्य श्रुत्वा सद्दर्शनान्वितः ।
अनेकान्तमतं तत्त्वं बहु मेने विदां वरः ॥
नन्दनास्तस्य सञ्जाता वर्धिताखिलकोविदाः ।
दाक्षिणात्या जयन्त्यत्र स्वर्णयक्षिप्रसादतः ॥
श्रीकुमारकविः सत्यवाक्यो देवरवल्लभः ।
उद्यद्भूषणनामा च हस्तिमल्लाभिधानकः ॥
वर्धमानकविश्चेति षडभूवन् कवीश्वराः ॥
श्रीमद्दीपङ्गुडीशः कुशलवरचितस्थानपूज्यो वृषेशः
स्याद्वादन्यायचक्रेश्वरगजवशकृद्धस्तिमल्लाह्वयन ।
गद्यैः पद्यैः प्रबन्धैर्नवरसभरितैराद्दतोऽयं जिनेशः
पायान्नः पादपीठस्थलविकटलसत्पाण्डचमौलिप्रभौघः ॥

Colophon:

इति श्रीगोविन्दभट्टस्वामिनः सूनुना श्रीकुमारसत्यवाक्यदेवरवल्लभोद-यभूषणानामार्यमिश्राणामनुजेन कवेर्वर्धमानस्याग्रजेन कविना हस्तिमल्लने विरचितं (ते विक्रान्तकौरवीयनाटके) कौतुकबन्धो नाम षष्ठोऽङ्कः ॥

समाप्तश्चायं ग्रन्थः ॥

---

R. No. **1335.**

Paper. $11\frac{1}{8} \times 8\frac{1}{2}$ inches. Foll. 75. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam.

**नयमयूखमालिका.**

NAYAMAYŪKHAMĀLIKĀ.

By Appayadīkṣita. Same work as that described under No. 4908 of the D.C.S. MSS., Vol. X.

From the twenty-fifth Sūtra of the third Pāda of the first Adhyāya to the tenth Sūtra of the second Pāda of the second Adhyāya

**Beginning:**

तदुपर्यपि बादरायणः संभवात् ॥ १-३-२९ ॥ मनुष्याधिकारप्रसङ्गात् देवादीनां ब्रह्मविद्यायामधिकारोऽस्ति नवेति विचार्यते । तत्र पूर्वपक्षः—नास्त्यधिकारः शरीररहितानाम्, तेषां ब्रह्मविद्यानुष्ठाने सामर्थ्याभावात् । नच तेषां शरीरवत्त्वे प्रमाणमस्ति ।

* * * *

**Colophon:**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य तृतीयः पादः ॥

**End:**

सर्वेऽपि ते धर्मा उपपद्यन्ते ब्रह्मणि । तद्वैकल्यं प्रधानादौ ॥

**Colophon:**

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे द्वितीयस्याध्यायस्य प्रथमः पादः ॥

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ प्रथमाध्यायप्रतिपादिते ब्रह्मणो जगत्कारणत्वे प्रधानपरमाणुकारणवादिभिः सांख्यवैशेषिकादिभिः केवलतर्कमवष्टभ्यापादितानि दूषणानीति प्रथमपादे निराकृतानि ।

* * * *

समवायिकारणं च त्रसरेणोर्नैव शक्यमनुमानं तु बहुबाधकसद्भावात्.

R. No. **1336**.

Paper. 11¼ × 8½ inches. Foll. 94. Lines, 21 in a page. Dēvanāgarī. Good.

Transcribed in the Central Library, Baroda, in 1914-15 from a MS. of M.R.Ry. Bāla Śāstri, son of Gōvinda Śāstri of Vaṭapattana (Baroda ?).

## वैखानसश्रौतसूत्रम्.

## VAIKHĀNASAŚRAUTASŪTRAM.

This work deals with the ceremonial rites to be performed in connection with Vedic sacrifices conducted in accordance with the Vaikhānasa school.

Breaks off in the 20th Praśna.

**Beginning:**

यस्य चिर (द्विरद) वक्राद्याः ( . . ) विष्वक्सेनं तमाश्रये: ॥

अथाग्न्याधेयं व्याख्यास्यामो ब्राह्मणो वसन्ते राजन्यो ग्रीष्मे वैश्यः शरदि रथकारो वर्षासु सर्वे शिशिर इत्येके । रोहिणीकृत्तिकामृगशिरः-पुनर्वसूत्तरानूराधाश्रवणहस्तविशाखेष्वेकस्मिन् नक्षत्रेऽमावास्यायां पौर्णमास्यां वादधीत ।

* * * *

**Colophon:**

प्रथमोऽध्यायः ॥

**End:**

यज्ञे पवमानः सुवर्जन इति अन्येन वोदुम्बरेण तत्स्थाने वसिष्ठस्यादुखा स्रवन्ति दैवतेषु यस्यानपवृत्तौ यूपमित्येकोनचत्वारिंशत् ॥

**Colophon:**

इत्येकोनविंशः प्रश्नः ॥

अथ प्रायश्चित्तम् । अथ सौम्याग्नी यदि दीक्षितोऽनृतं वदेत

* * * *

पृषदाज्येनैकामाहुतिं जुहुयाद्यत्र तु गृहे मुग्धा स्यातां विस्रष्टेषोः.

## R. No. 1337.

Paper. 10⅜ × 9½ inches. Foll. 29. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Sōmanātha Śāstri of Challapalle in the Kistna district.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: PHAKKIKĀ.

By Madhurānātha. Same work as that described under No. 4019 of the D.C.S. MSS., Vol. VIII.

Contains the Ākāṅkṣāvāda, of which the beginning is wanting, and the Āsattivāda in the Śabdakhaṇḍa.

**Beginning :**

मित्यादौ घटमित्याद्यानुपूर्वीविशेषाकाङ्क्षानिश्चयरूपविशेषसामग्रीविरहात् । यथा घटवृत्ति कर्मत्वामित्याद्यन्वयबोधाभावः तथा नीलो घट इत्यादिष्वपि तत्तदानुपूर्वीविशेषरूपाकाङ्क्षानिश्चयरूपसामग्रीविरहादेव नोद्देश्यविधेयभावापन्नतादृशान्वयबोधः इति चेत्तर्हि नीलो घटोऽस्ति नीलं घटमानयेत्यादौ तादात्म्यसंबन्धेन नीलादेर्घटादावन्वयः कथं स्यात् ।

* * * *

**Colophon :**

इति शब्दपरिच्छेदरहस्ये आकाङ्क्षाग्रन्थरहस्यम् ॥

**End :**

तथाच ओदनं पचतीत्यादौ सति तात्पर्यग्रहे यथाकथंचिदुपस्थिताकाशकलायादेव(र)प्यन्वयबोध एवेत्यर्थाध्याहारपक्ष एव सम्यगित्यवधेयम् ॥

**Colophon :**

आसत्तिग्रन्थवादरहस्यम् ॥

---

## R. No. 1338.

Paper. 10⅜ × 9½ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Yajña Nārāyaṇa Śāstri of Challapalle in the Kistna district.

तर्कसंग्रहव्याख्या—वाक्यवृत्तिः.

TARKASAṄGRAHAVYĀKHYĀ: VĀKYAVṚTTIḤ.

This is a commentary on the Tarkasaṅgraha of Annambhaṭṭa, which work has been described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

**Beginning:**

शिवया सहितं नत्वा शिवमम्बां गुरूनपि ।
वाक्यवृत्तिं सङ्ग्रहस्य कुरुते बालसिद्धये ॥

ग्रन्थस्य निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यवृत्तये प्रयोजनाभिधेयौ च श्लोकेनाह—निधायेति । हृदि मनसि निधानं स्वविषयकज्ञानजनकत्व-संबन्धेन स्थापनम् । मनसा विश्वेशं ध्यात्वेति भावः । बालानां ग्रहणपूर्वक-धारणयोग्यानाम् ।

**End:**

न्यायनये षोडशपदार्थेषूक्तेष्वपि न सप्तत्वहानिरित्याह—सर्वेषामिति । सर्वेषां प्रमाणादीनामित्यर्थः । तथा च काणादन्याययोरविरोध इति भावः । तदेवाह—काणादेति ।

यदि यामादिरापन्न भवं(वेत्) किमबलाबलम् ।
गोपिताः कर्त्रपादानकर्माधिकरणक्रियाः ॥

**Colophon:**

इति वाक्यवृत्तिस्समाप्ता ॥

---

R. No. **1339.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 15. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of Śrīnivāsa Pāṭrācārya of Kumbakonam.

अग्निहोत्रसञ्जीविनी.

AGNIHŌTRASAÑJĪVINĪ.

Deals with the expiatory rites to be performed for mistakes arising in the maintenance of the Vedic sacrificial fire. By Rāmānujācārya, son of Gōpālācārya of Śrīśaila family.

Complete in four Paricchēdas.

The author mentions Bhāṣya (Kapardibhāṣya ?), Vṛtti (Kauśikarāma ?) and Prayōgavṛtti (Tālavṛntanivāsin's ?).

**Beginning :**

श्रीमानस्मद्गुरुर्जीयाद्गोपालाचार्यशेखरः ।
येनाहूताः क्रतुशते स्वपुरं नास्मरन् सुराः ॥

मदीयाः परमाचार्यास्तथा शेषरघूद्वहाः ।
जीयासुर्यद्यशोवार्धेः सारिण्यः सर्वसिन्धवः ॥

वेदान्तदेशिकगुरुश्चिरं विजयतेतराम् ।
यज्जिह्वारङ्गमासाद्य भारती लासिकायते ॥

श्रीरामानुजयतिराडङ्गीकुरुतां मयाञ्जलिं रचितम् ।
यं गत्सानलगरमं विमताळनापतङ्गलाय द्राक्(?) ॥

तिन्त्रिणीमूलरसिकं तेजः किमपि चिन्तये ।
यस्य पार्श्वकुलस्यन्दिमारन्द . . . सादरी ॥

सेनानाथं नमस्यामि सूत्रवत्याः सहायिनम् ।
यदाज्ञा ब्रह्मरुद्राद्यैः शिरस्सु स्रगिवोह्यते ॥

श्रीरस्तु मे समृद्धीनामुदयाय दयानिधिः ।
यल्लीला(या व)शः शौरिर्भक्तदोषान् न बुध्यते ॥

श्रीरङ्गेश्वरमाश्रितैकसुलभं श्रीवेङ्कटाद्रीश्वरं
कारुण्याम्बुनिधिं नृपं (च) वरदं वात्सल्यवारां निधिम् ।

सीतावल्लभमार्तरक्षणपरं श्रीशार्ङ्गपाणिं सुरे-
रीड्यं कोमलवल्लिनायकमहं सर्वान् गुरून्संश्रये ॥

आपस्तम्बमुनिं चिरन्तनसदाचारव्यवस्थापकं
नत्वान्याचार्यभाष्य . . . . . . . . . . ।
गोपालार्यसुतः शतक्रतुचतुर्वेदीह रामानुजः
प्रायश्चित्तविधिं करोति सुखबोधायाग्निहोत्रास्पदम् ॥

प्रथमं तावदग्निहोत्रप्रायश्चित्तमुच्यते । प्रणयनकालात्पूर्वं गार्हपत्योऽनुगच्छेच्चेत्तद्भस्मना नित्यारणी संस्पृश्य मथित्वा तदायतने निधाय आहवनीयं प्रणीय तत्र मित्रादिद्वादशाहुतीर्हुत्वा तमाहवनीयं त्यक्त्वा विहारकाले यथापूर्वं धृष्टचाधानाद्यग्निहोत्रं कुर्यात् । भस्मस्पर्शमथननिधानापहरणेषु चतुर्ष्वपि तूष्णीमिति ज्ञेयम् ।

* * * *

**Colophon:**

इति श्रीशैलान्वयसम्भवस्य विद्वच्चूडामणिचतुर्वेदिशतक्रतुगोपालाचार्यतनूभवस्य रामानुजाचार्यस्य कृतावग्निहोत्रसञ्जीविन्यां प्रथमः परिच्छेदः समाप्तः ॥

**End:**

न तावदस्मिन् सङ्ग्रहे सर्वाणि प्रायश्चित्तानि साकल्येन प्रतिपादयितुं शक्यन्ते, विस्तरप्रसङ्गात् । अतोऽत्रानुक्तमस्पष्टं वा भाष्ये वृत्तौ प्रयोगवृत्तौ वा सम्यग्बोद्धव्यमिति ॥

**Colophon:**

इति श्रीशैलान्वयसम्भवस्य शतक्रतुचतुर्वेदिगोपालाचार्यतनयस्य रामानुजाचार्यस्य कृतावग्निहोत्रसञ्जीविन्यां चतुर्थः परिच्छेदः समाप्तः ॥

अग्निहोत्रसञ्जीविनी समाप्ता ॥

---

R. No. **1340.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914-15 from a palm-leaf MS. of Taṅgal Rāmasvāmi Śāstri of Viriñcipuram.

## कविकण्ठपाशः—सव्याख्यः.

## KAVIKAṆṬHAPĀŚAḤ WITH COMMENTARY.

A short erotic poem in which a lover describes the physical charms of his beloved in various fanciful ways.

Incomplete.

**Beginning :**

लीलावासगृहं गिरिक्षतिकरं लक्ष्मीनिवासास्पदं
कोकाह्लादविघातकं परशिशुत्राणप्रवृत्त्यातुरम् ।
वक्षोजद्वितयं विभाति हरिणीलोलेक्षणे तावकं
कान्तावत्करिदन्तवत्कमलवत्काकुत्स्थवत्काकवत् ॥

* * * *

कोकोल्लासि मदप्रसूतिसदनं तारागृहारोचितं
नानाभोगसमागमाद्यकरणं तालप्रमाणोज्ज्वलम् ।
वक्षोजद्वितयं विभाति हरिणीलोलेक्षणे तावकं
गङ्गावद्गजगण्डवद्गगनवद्राङ्गेयवद्गेयवत् ॥

कोकोल्लासि कोकस्य चक्रवाकस्य उल्लासः सौन्दर्यं सोऽस्यास्तीति कोकोल्लासि । 'उत्साहकान्त्योरुल्लासः' इति टीकासर्वस्वे । गङ्गापक्षे कोकमुल्लासयत्यानन्दयतीति कोकोल्लासि[नि] गङ्गायाः चक्रवाकस्थानत्वेन तदुल्लासकत्वं सम्भवति ।

**End :**

वीणालाबुसदृग्दिवाकरकरैः सत्स्पर्शनैः पावनै-
रप्यस्पृष्टमलभ्य . . मनिशं गुर्वक्षरं निर्मलम् ।
वक्षोजद्वितयं विभाति हरिणीलोलेक्षणे तावकं
वाणीवद्वनराजिवद्वलयवद्वागीशवद्वारिवत् ॥

वीणालाबुसदृक् वीणाया वल्कल्याः (वल्लक्याः) अलाब्वोः तुम्बी-

फलयोः सदृक् समानम् । . . . . . . . . . . त्यमरः । वाणीपक्षे . . . . . . सङ्कल्पे स्यन्दनपथेन्द्राध्याने निवारणे इति रत्नमाला ।

* * * *

विष्वग्भारतमालयं नवसुधारूपं सदागौरवं
नालीकेरकृतगौरवं नखरभूश्रीकल्पितालेपनम् ।
वक्षोजद्वितयं विभाति हरिणीलोलेक्षणे तावकं
क्षोणीवत्क्षणदेशवत्क्षतजवत्क्षीणात्मवत्क्षान्तिवत् ॥

---

R. No. **1341.**

Paper. 10¾ × 9½ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry M. Rāmakṛṣṇakavi of Vanaparty.

अद्वैतसिद्धान्तविद्योतनम्.

ADVAITASIDDHĀNTAVIDYŌTANAM.

A treatise in support of the Advaita school of Vēdānta. It refutes the doctrines of the Nyāya school of philosophy in regard to illusory appearances. By Brahmānandasarasvatī, the author of the commentary on the Advaitasiddhi and of the Candrikā.

Contains the Anirvacanīyatāvādārtha; complete.

**Beginning:**

सदनन्तचिदानन्दे जगती यत्र जायते ।
रजतादीव शुक्त्यादौ तदेवाहं परा गतिः ॥

ननु इदं रजतमिति प्रतीत्यन्यथानुपपत्त्या विषयापेक्षायामपि न तदनुवृत्त्यपेक्षते देशान्तरीयस्यैव विषयव्यभिचारादित्याशङ्कते—नन्विति । भ्रमस्थल इति ।

**End:**

प्रारब्धभोगोपयुक्तप्रपञ्चस्य सत्त्वेऽप्यग्रे तदसत्तायां तत्त्वप्रमायास्तत्त्वाज्ञानतत्प्रयुक्तपूर्वानवस्थाननियतत्वादिति दिक् ॥

**Colophon:**

इत्यद्वैतसिद्धान्तविद्योतने परमहंसपरिव्राजकाचार्यश्रीब्रह्मानन्दसरस्वतीविरचितः अनिर्वचनीयवादार्थः समाप्तः ॥

श्रीब्रह्मानन्दसरस्वतीविरचितः अद्वैतवादार्थः समाप्तः ॥

---

R. No. **1342.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 11. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Cinnasvāmi Śāstri of Mylapore.

**भस्मोद्धूलनवादावलिः.**

BHASMŌDDHŪLANAVĀDĀVALIḤ.

A discussion showing that smearing the body with the holy ashes, which is said to be a preliminary ceremony in connection with the Pāśupatavidyā inculcated in the Atharvaśirōpaniṣad, is not restricted to that Vidyā alone, but is general in character and has to be observed in connection with all kinds of Brahmavidyā. The work is attributed to Appayadīkṣita.

Complete.

**Beginning:**

विष्णुभागवता मन्यन्ते—अग्निरित्यादिना भस्म गृहीत्वा विमृज्य अङ्गानि संस्पृशेत् व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय इत्यथर्वशिरसि पाशुपतविद्याप्रकरणे समाम्नातं भस्मोद्धूलनं प्रकरणवशात् तन्मात्राङ्गम्, न तु सकलब्रह्मविद्याङ्गम्। नहि पूर्वोऽतिथिभ्योऽश्नीयादिति वैश्वानरविद्याप्रकरणे समाम्नातमतिथिभोजनं सकलब्रह्मविद्याङ्गमिति सैद्धान्तिकी मर्यादा।

* * * *

तत्रेयं सैद्धान्तिकी प्रथमा कक्ष्या—अग्निरित्यादिमन्त्रविधेयं भस्मोद्धूलनं सकलब्रह्मविद्याङ्गम्, विद्याङ्गत्वे सति सकलब्रह्मविद्यापेक्षितोपकारजनकत्वात्।

**End:**

तस्य मुक्तिफलकत्वस्य विद्याद्वारा समर्थनीयत्वात् तस्यां विद्याविशेषानुक्रमणाभावात् विनिगमनाविरहेण सर्वासां ब्रह्मविद्यानां द्वारत्वेन निवेशनात् ॥

**Colophon:**

इत्युद्धूलनत्रिपुण्ड्रयोः सकलब्रह्मविद्याङ्गत्वसमर्थनो वादः ॥

---

## R. No. **1343.**

Paper. 11 × 8⅞ inches. Foll. 82. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Sthalaśāyi Ayyaṅgār of Agaram, a village in the Chingleput district.

(*a*) भगवत्प्रतिष्ठाविधिः.

BHAGAVATPRATIṢṬHĀVIDHIḤ.

Foll. 1*a*—20*a*.

Similar to the work described under No. 5328 of the D.C.S. MSS., Vol. XI.

Complete; as found in the Tāntrika portion of the Pāñcarātrāgama.

**Beginning:**

पाञ्चरात्रे तान्त्रिकप्रकारेण विष्णुप्रतिष्ठाप्रयोग उच्यते—

वन्दे विष्णुं जगद्योनिं पीतकौशेयवाससम्।
चतुर्भुजं विशालाक्षं श्रीदेव्या सह संयुतम् ॥

अथादौ कर्ताचार्यादीनमुं विष्णुप्रतिष्ठामहोत्सवं यूयं कारयध्वमिति विज्ञाप्य तैः सह मङ्गलस्नानं कृत्वा यस्मिन् दिने प्रतिष्ठा कार्या तस्य पूर्वदिने सायन्त(न्दि)ने शास्त्रोक्तनिर्मितदेवालयादीनलंकृत्य यागमण्डपे

रङ्गवल्ल्यादि कृत्वा अष्टदलपद्मं विलिख्य शालिना विकीर्य पालिकादीन्यासाद्य वस्त्रमालिकालंकृतं खनित्रमादाय ग्रामस्योदीच्यां वल्मीकभूमिमासाद्य ।

**End:**

स्वर्णशलाकया मन्त्रवतोच्चारणं कुर्वन् नयनोन्मीलनं कृत्वा पुरुषसूक्तविधानेनाभिषिच्य वस्त्रादिभिरलंकृत्य ध्यायामीत्यादिषोडशोपचारान् कृत्वा मुद्गान्नं निवेद्य नीराजनं दत्वा आचार्यादीन् संपूज्य ब्राह्मणान् भोजयेत् । गृष्टिधेन्वादिकमाचार्याय दातव्यम् ॥

**Colophon:**

इति श्रीपाञ्चरात्रोक्तप्रकारेण भगवत्प्रतिष्ठाविधिः समाप्तः ॥

चलने चाग्निदाहे च चिरलुप्ते च पूजने ।
पुनः प्रतिष्ठा कर्तव्या शास्त्रोक्तेन विधानतः ॥

---

(b) भगवद्विवाहप्रयोगः.

BHAGAVADVIVĀHAPRAYŌGAḤ.

Foll. 20b—41a.

On details of procedure to be observed in connection with the festival celebrating the marriage of God Viṣṇu with Goddess Lakṣmī in Viṣṇu temples.

Complete; as found in the Bharadvājasaṃhitā of the Pāñcarātrāgama.

**Beginning:**

पाञ्चरात्रतान्त्रिकप्रकारेण भगवद्विवाहप्रयोग उच्यते—

शुक्लाम्बरधरं (. . . .) विघ्नोपशान्तये ॥ अथैकादश्यां प्रातराचार्यादयो नित्यकर्मादिकं निर्वर्त्य देवालयं गत्वा ध्रुवादीनभिषिच्यालं-

कृत्य यागमण्डपे नवधान्यादीन्यासाद्य सायंतनसमये तत्र यागबिम्बं निनीय तदेव लग्नादिकं पठित्वा ग्रामदेवताभ्यः कुलदेवताभ्यो महा . . . नेभ्यो नम इत्युक्त्वा प्राणानायम्य अस्तु श्रीभूमिनीलासहित-श्रीमन्नारायणस्य तिरुकल्याणमहोत्सवं करिष्यमाणः

* * * *

भगवतो बलेनेत्यादि शुभमित्यन्तं भगवत्पुण्याहं वाचयेत् ।

**End:**

स्पृष्टास्पृष्टिनिवृत्त्यर्थं पुष्पयागमहोत्सवं करिष्ये इति संकल्प्य तत्र देवस्य द्वादशाराधनद्वादशनैवेद्यप्रबन्धपठनादिकं कुर्यात् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे भरद्वाजसंहितोक्तप्रकारेण भगवद्विवाहानुक्रमणिका समाप्ता ॥

प्रज्वाल्य पश्चिमे कुण्डे द्वादशाक्षरविद्यया ।
प्रस्थमर्धाधिकं चाज्यं वा (हुत्वा) पूर्वमुखे गुरुः ॥
द्वादशाक्षरमन्त्रेण पूर्णसुस्वरमुच्चरन् ।
नासिकापुटमुद्धृत्य जुहुयात्साधकोत्तमः ॥

---

(*c*) भारद्वाजसंहिता.

BHĀRADVĀJASAṀHITĀ.

Foll. 41*a*—55*a*.

Same work as that described under No. 5331 of the D.C.S. MSS., Vol. XI. The names of the one hundred and eight Tantras of the Pāñcarātrāgama are mentioned in the extract from the beginning given below.

Beaks off in the eleventh Adhyāya. The headings of the Adhyāyas contained in this MS. are given below.

१. अष्टोत्तरशतसंहिताकथनम्.
२. पाञ्चरात्रोत्पत्तिकथनम्.
३. विष्णुस्थापनक्रमकथनम्.
४. अङ्कुरारोपणम्.
५. धान्याधिवासकथनम्.
६. मूर्तिहोमकथनम्.
७. भगवाद्विवाहानुक्रमणिका.
८. विमानगोपुरादिप्रतिष्ठा.
९. नित्यार्चनविधिः.
१०. शतसहस्रतुलसीकल्पः.
११. गोपुरमण्डपादिप्रतिष्ठाप्रयोगः.

Beginning:

मेरुपृष्ठे सुखासीनं भरद्वाजं द्विजोत्तमम् ।
वेदवेदान्ततत्त्वज्ञमात्मज्ञानपरायणम् ॥

विनयेनोपसंगम्य कण्वो नाम महानृषिः ।
प्रणम्य शिरसा भूमौ पप्रच्छेदं जगत्पतिम् ॥

कण्वः—

भरद्वाज महाप्राज्ञ श्रुतिपूर्वं मयानघ ।
न श्रुतं पाञ्चरात्राख्यं शास्त्रं विष्णुमुखोद्गतम् ॥

तच्छास्त्रं विस्तरेणैव वक्तुमर्हसि मेऽनघ ।

भरद्वाजः—

साधु पृष्टं महाप्राज्ञ कण्व वेदविदां वर ।
अष्टोत्तरप्रभेदेन पाञ्चरात्रं श्रुतं मया ॥

सनत्कुमारेण मया गदितं बदराश्रमे ।
तत्ते वक्ष्यामि संक्षेपाच्छृणुष्व द्विजसत्तम ॥

कण्वः—

कथंभेदानि तन्त्राणां नामधेयं कथं भवेत् ।
वक्तुमर्हसि विप्रर्षे यदि तुष्टोऽसि मे प्रभो ॥

भरद्वाजः—

आचार्या वहवो ज्ञेयास्तन्त्राणां च पृथक् पृथक् ।
तस्माद्भेदा बहु प्रोक्ता नामधेयाः(यं) प्रवक्ष्यते ॥
आद्यं सनत्कुमारं च चतुर्मूर्तिश्च शाश्वता ।
नारदेश्वरकापिलं वाराहं शौनकं तथा ।
पद्मपुष्करहैरण्यं पाराशर्यं नृकेसरी ।
काश्यपागस्त्यकपिलयाज्ञवल्क्यात्रिसंभवाः ॥
विष्णुसिद्धान्ततिलकजयासात्त्वतसंहिताः ।
पुष्कर(श्च)महालक्ष्मीकुशलानन्दपावनाः ॥
गार्ग्यं बोधायनं तन्त्रमानन्दाख्यं च शाश्वतम् ।
पञ्चप्रश्नं श्रियः प्रश्नं प्रह्लादं नलकूबरम् ॥
मौद्गलमौ(श्वौ)शनं तन्त्रं मार्कण्डेयमतः परम् ।
मायावैभवविन्यासं वासिष्ठं जैमिनं तथा ॥
नारायणं च ब्रह्मोक्तं वैखानसमतः परम् ।
वीरमाङ्गलिकं चैव तथाच परमेश्वरम् ॥
जयोत्तरंव(च)शालल्यं मारीचं च तथोत्तरम् ।
पञ्चतत्त्वं महाज्ञानं वैजयन्तं च पैप्पलम् ॥
विष्वक्सेनं तथा तार्क्ष्यं वाल्मीकं भूमिसंहिता ।
सनत्कन्दं सनन्दं च विश्वामित्रं तथाङ्गिरम् ॥
ऐन्द्रं दूर्वासतन्त्रं च कौबेरं वारुणं तथा ।
पावकं पावनं चैव याम्यं च वसुसंहिता ॥
मुद्गलं रोमशं चैव मैत्रेयं मत्स्यमेव च ।
ब्रह्माण्डं वापि कौमारं पद्मं कूर्मं तथैव च ॥

वामनं पुरुषं लैङ्गं शातातपमतः परम् ।
दत्तात्रेयं तथा ज्ञेयं भारद्वाजं च गौतमम् ॥
मुकुन्दं जामदग्न्यं च वामदेवं सुबोधिकम् ।
मेरुगङ्गा च सत्योक्तं गान्धर्वं गणसंहिता ॥
नारदोत्तरविज्ञानं गजेन्द्रमनुसंहिता ।
पुलस्त्यं पुलहं तन्त्रं मायातन्त्रमतः परम् ॥
विहगेन्द्रं महातन्त्रं पुरुषोत्तममेव च ।
एतानि नामधेयानि अष्टोत्तरशतानि च ॥
एवं सनत्कुमारेण कीर्तितं विप्रसत्तम ।

Colophon:

इति श्रीपाञ्चरात्रे भरद्वाजसंहितायां प्रथमोऽध्यायः ॥

End:

एवमुक्त्वा जगामाशु भरद्वाजो महामुनिः ।
आश्रमं स्वं श्रिया जुष्टमाश्रितश्रमनाशनम् ॥

Colophon:

इति श्रीपाञ्चरात्रे भरद्वाजसंहितायां शतसहस्रतुलसीकल्पं नाम दश-मोऽध्यायः ॥

ध्रुवं तु ग्रामरक्षार्थमर्चनार्थं तु कौतुकम् ।
स्नानार्थं स्नपनं प्रोक्तमुत्सवं चोत्सवार्थकम् ॥

* * * *

रथस्य गोपुरादीनां वाहनानां द्विजोत्तम ।
भङ्गे वा पतने वापि शान्तिहोमं समाचरेत् ॥

---

(*d*) देवताप्रतिष्ठाविधिः.

DĒVATĀPRATIṢṬHĀVIDHIḤ.

Foll. 55*a*—56*b*.

Similar to the work described under No. 3704 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning :**

अधुना सर्वदेवानां प्रतिष्ठाविधिवक्ष्य(रुच्य)ते ।
सा चोदनगये(गयने) शुद्धा इति शास्त्रे प्रतीयते ॥
कुर्यान्नान्दीमुखश्राद्धं स्वस्तिवाचनपूर्वकम् ।
अङ्कुरारोपणं कुर्यात् त्वमेव इति कृण्वताम् ॥

**End :**

युक्तेन विधिनानेन कारयेत् स्नापनं यथा ।
तस्य यज्ञफलप्राप्तिः सुखं चास्य सदा भवेत् ॥

**Colophon :**

इति बोधायनोक्तदेवताप्रतिष्ठा समाप्ता ॥

---

(e) प्राणप्रतिष्ठामन्त्रः.

PRĀṆAPRATIṢṬHĀMANTRAḤ.

Foll. 57*a*—58*a*.

Same work as that described under No. 6682 of the D.C.S. MSS., Vol. XIII, but with the addition of following stanzas.

Complete.

**End :**

एवमात्मनि क . . . वा पश्चाच्चामुष्य एव च ।
प्रतिष्ठादिषु देवानां मन्त्रादिषु तथैव च ॥
स्पृष्ट्वा च मनुमन्त्रेण अष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा ॥
प्राणप्रतिष्ठां कृत्वैव पञ्चकर्मणि कारयेत् ॥

**Colophon :**

इति प्राणप्रतिष्ठाविधिः संपूर्णः ॥

(*f.*) संप्रोक्षणविधिः.
SAMPROKṢAṆAVIDHIḤ.

Foll. 58*a*—59*a*.

Similar to the work described under No. 5400 of the D.C.S. MSS., Vol. XI.

Complete.

**Beginning:**

संप्रोक्षणविधिं वक्ष्ये विष्णुसांनिध्यकारणम् ।
शूद्रस्पृष्टे शुना स्पृष्टे प्रसवे मरणेऽपि वा ॥
रजस्वलाप्रवेशे वा सिक्ते वर्षजलैरपि ।

* * * *

पुनः संप्रोक्षयेद्बिम्बं न प्रतिष्ठां समाचरेत् ।

**End:**

गोभूतिलहिरण्याद्यैराचार्यं पूजयेद्बहु ।
कलशान् स्थापयत्पश्चाद्ब्राह्मणान् भोजयेत्ततः ॥

**Colophon:**

इति श्रीपराशरोक्तः संप्रोक्षणाविधिः संपूर्णः ॥

---

(*g*) नित्यार्चनविधिः.
NITYĀRCANAVIDHIḤ.

Foll. 59*a*—66*b*.

Similar to the work described under No. 5325 of the D.C.S. MSS., Vol. XI.

Complete.

**Beginning:**

प्राणानायम्य विध्युक्तप्रकारेण स्वस्तिपुण्याहवाचनं कृत्वा ब्राह्मे मुहूर्ते उत्थाय अर्चकः स्नानादिकं कृत्वा देवागारं प्रणम्य कवाटोद्घाटनं कृत्वा स्वर्णकलशेन शुद्धोदकं नयित्वा देवस्य पुरत उपविश्य प्राणानायम्य संकल्प्य।

**End:**

ततः श्रीमदष्टाक्षरन्यासं कृत्वा ततः नित्यप्रकारवत् पर्यङ्कासनार्थं (न्तं) तिरुवाराधनं कुर्यात् ॥

(h) विष्णुभक्तप्रतिष्ठाविधिः.
VIṢṆUBHAKTAPRATIṢṬHĀVIDHIḤ.

Foll. 67a—72b.

Similar to the work described under No. 5322 of the D.C.S. MSS., Vol. XI.

Complete; as found in the Pāñcarātrāgama.

**Beginning:**

सरोभूतमहायोगिभक्तिसारपराङ्कुशकुलशेखरभट्टनाथभक्ताङ्घ्रिरेणुयोगि-वाहनपरकालमधुरकविगोदारामानुजाचार्याणां प्रतिष्ठाविधिं वक्ष्ये—

भगवन्मन्दिरात्पुरतः योगमण्डपं तन्मध्ये शयनवेदिकां तत्प्राच्यामग्निकुण्डं च कुर्यात् । तत्सदनं वितानरङ्गवल्लीतोरणादिभिरलंकृत्य आचार्यो यजमानेन सार्धं नद्यादिकं गत्वा स्वसूत्रोक्तविधिना स्नात्वा

* * * *

भक्तजनप्रतिष्ठाकर्मणि भाचार्यं त्वां वृणे इति आचार्यादिवरणं कुर्यात् ।

**End:**

एवं प्रत्यहं श्रीभूमिनीलासमेतस्य भगवतः तद्भक्तानामाराधनं कुर्यात् ॥

**Colophon:**

इति श्रीपाश्चरात्रागमप्रकारसंग्रह (हे) भक्तप्रतिष्ठाविधिः समाप्तः ॥

Foll. 72b—74a contain a portion of भूतशुद्धिमन्त्र, which is described under No. 6838 of the D.C.S. MSS., Vol. XIII.

---

(i) भगवत्प्रतिष्ठाविधिः.
BHAGAVATPRATIṢṬHĀVIDHIḤ.

Foll. 74a—82a. Fol. 82b is left blank.

Similar to the work described under No. 5328 of the D.C.S. MSS., Vol. XI. As taught by Vasiṣṭha.

Complete.

**Beginning:**

ऋषय ऊचुः—

भगवन् श्रोतुमिच्छामो हरिसंस्थापनक्रियाम् ।
कस्मिन् काले च कर्तव्यं विधिना केन सत्तम ॥

वसिष्ठः—

हरिसंस्थापनविधिं वक्ष्यामि मुनिसत्तमाः ।
यत्कर्तव्यं द्विजैस्तत्र तच्छृणुध्वमशेषतः ॥
सालग्रामशिलायां तु कर्तव्यं विग्रहं हरेः ।
पुण्यतीर्थे शुभे क्षेत्रे पुण्यपर्वतमस्तके ॥

* * * *

एकादश्यां शुक्लपक्षे द्वादश्यां श्रवणेऽपि वा ।
रोहिण्यां मन्दवारे तु तथैवादितिभे शुभे ॥

**End:**

विश्वभुजे नमः । सर्वभुजे नमः । आत्मने नमः । इति होमान्ते बलिं दद्यात् ॥

---

R. No. 1344.

Paper. $11\frac{1}{4} \times 8\frac{7}{8}$ inches. Foll. 71. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāriya of Villiyambākkam.

तन्त्रविलासः.

TANTRAVILĀSAḤ.

By Lakṣmaṇārya. Same work as that described under No. 4416 of the D.C.S. MSS., Vol. IX.

Complete.

**End:**

अथ ताभ्यो न दद्यादित्यर्थो विवक्ष्येत ततः शास्त्रप्राप्तनिषेधे विकल्पापत्तिरित्यलमतिविस्तरणे । विशिष्टभावनान्तरविधिपक्षस्तु दध्नेन्द्रियकामाधिकरणेऽस्माभिर्निरस्त इति नेह प्रपञ्च्यते इति दिक् ॥

अभ्युदयेष्ट्यधिकरणे सिद्धान्तः स्थापितः पुरा न्यायैः ।
भूयः स एव बहुलो विशकलितो लक्ष्मणार्यधीरेण ॥

**Colophon:**

तन्त्रविलासः समाप्तः ॥
अधिकरणषट्कभङ्गः ॥

कौशिकान्वयसम्भूतकृष्णेनाशु शुभात्मना ।
भङ्गोऽधिकरणषट्कस्यालेखि वादार्थमात्मनः ॥

---

R. No. **1345.**

Paper. 12 × 9¾ inches. Foll. 75. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam.

**बाधबुद्धिप्रतिबन्धकतारहस्यम्.**
**BĀDHABUDDHIPRATIBANDHAKATĀRAHASYAM.**

Foll. 1*a*—67*a*. Foll. 67*b* and 68 are left blank.

A minor treatise in Sanskrit logic dealing specially with the manner in which a knowledge of Bādha (negation of Sādhya in Pakṣa) prevents a proper syllogistic inference. By Gadādhara-bhaṭṭa.

Complete.

**Beginning :**

सधर्मितावच्छेदककविशिष्टबुद्धौ समानधर्मितावच्छेदककग्राह्याभावनिश्चयो विरोधीति तदभावोऽपि हेतुः । तादृशबुद्ध्योश्च तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशालिलौकिकान्यदोषविशेषाजन्यबुद्धित्वतद्धर्मावच्छिन्नविशेष्यतानिरूपितविशेषणताविशेषसम्बन्धावच्छिन्नतत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रकारकनिर्णयत्वाभ्यां प्रतिबध्यप्रतिबन्धकभावः ॥

**End :**

घटवान्वह्निमानित्याकारकशाब्दबोधानुरोधेन विशेष्यतावच्छेदककोटिप्रविष्टघटत्वादिनिष्ठप्रत्यासत्त्या क्लृप्तहेतुकतथाविधयोग्यताज्ञानादिना फलजनने उक्तव्यापकतासम्बन्धेन क्लृप्तहेतुताकवह्नित्वादिभेदस्य सहकारितयैवोपपत्तिरिति दिक् ॥

**Colophon :**

इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्त्तिविरचिते बाधबुद्धिप्रतिबन्धकतारहस्यं सम्पूर्णम् ॥

Foll. 69*a*—75*a* contain a portion of Siddhāntalakṣaṇa.

## R. No. 1346.

Paper. 11 × 8⅛ inches. Foll. 47. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a paper MS. of M.R.Ry. M. Rāmakṛṣṇakavi of Vanaparti.

### वेदान्तसिद्धान्तमुक्तावली.

### VĒDĀNTASIDDHĀNTAMUKTĀVALĪ.

By Prakāśānanda, pupil of Jñānānanda and Guru of Nānādīkṣita. Same work as that noticed under No. 2331 on page 746 of the India Office Library Catalogue.

Complete.

**Beginning:**

अदृष्टाद्वयमानन्दमात्मानं ज्योतिरव्ययम् ।
विनिश्चित्य श्रुतेः साक्षाद्युक्तिस्तत्राभिधियेते ॥

तत्रादौ मङ्गलं कृ(त)त्वानुस्मरणरूपं सूचयन् अभिधेयप्रयोजने साक्षात्प्रतिपाद्य कर्तव्यं प्रतिजानीते—अदृष्टेत्यादिना । आत्मानमुक्तविशेषणचतुष्टयविशिष्टं श्रुतितोऽपरोक्षीकृत्य तत्रोक्तविशेषणचतुष्टयविशिष्टे आत्मनि युक्तिश्रुत्यनुग्राहकस्तर्कोऽभिधीयत इत्यन्वयः ।

**End:**

तथा कुलपवित्रहेतुत्वमपि ब्रह्मविदा पठ्यते—

कुलं पवित्रं जननी कृतार्था सर्वेद्वा(र्वा ध)रा पण्यवती च तेन ।
अपारसंवित्सुखसागरेऽस्मिन् नीलं(लीनं) परे ब्रह्मणि यस्य चेतः ॥

तस्माद्यथोक्तब्रह्मात्मैकत्वविज्ञानेन कृतकृत्यो भवतीति नात्र विवदितव्यम् ।

इति गुणिना मुनिना यतता स्वबुद्ध्यातिशुद्धये (विमला) ।
रचिता प्रकाशयतिना सिद्धान्तमुक्तावली मौक्तिकश्रेणिः ।

अद्वैतानन्दसन्दोहसत्यज्ञानादिलक्षणा ।
नारायणसमासक्ता य(म)या सापत्न्यदूषिता ॥
श्रृणु प्रकाशवरि(गदि)त[ा]मद्वैतं तिमिरापहम् ।
वादीभकुम्भनिर्भेदसिंहदंष्ट्राधरी(वदी)क्षताम् ॥
वेदान्तसारसर्वस्वमज्ञेयमधुनातनैः ।
अशेषेण मयोक्तं तत्पुरुषोत्तमयत्नतः ॥
स्नातं तेन समस्ततीर्थसलिले सर्वापि दत्तावनी
यज्ञानां च कृतं सहस्रमखिला देवाश्च सम्पूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीज्ञानानन्दपूज्यपादशिष्यश्रीप्रकाशानन्दविरचिता सिद्धान्तमुक्तावली समाप्ता ॥

इदं स्वर्णपुरीमठीयं पुस्तकम् ॥

---

R. No. **1347.**

Paper. 11⅛ × 8⅞ inches. Foll. 39. Lines, 17 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

**प्रयोगदीपिका.**

PRAYŌGADĪPIKĀ.

On details of ritualistic procedure to be observed in relation to a person after his death according to Āpastamba.

Breaks off in the fourth Khaṇḍa.

**Beginning:**

(पुनर्नः पा)हि विश्वतः स्वाहा—अग्नये अभ्य(ावर्तिन इदम्) । विश्वप्स्निया विश्वतस्परि स्वाहा—अग्नये अभ्यावर्तिन इदम् । तूष्णीं पुनः परिषिच्य प्रेतौ च . . . . . . . . . मेव जुहुयात् । तथैव सूत्रम्—अथ यदि सायं हुतेऽग्निहोत्रे पृथक् प्रक्रुष्य प्रातरग्निहोत्रं जुहुयात् इति ।

* * * *

प्रजापतिः प्रीयतामिति पुण्याहं वाचयित्वा शान्तिहोमाग्नौ दीपमादीप्य गृहानानयन्तीति लोकाचारः ॥

**Colophon:**

इति प्रयोगदीपिकायां दशाहविधौ तृतीयः खण्डः समाप्तः ॥

अथ चतुर्थः खण्डः ।

एकोद्दिष्टप्रयोगः—

एकोद्दिष्टे नाग्नौ करणं नाभिश्रवणं न दैवं न स्वधा ।

**End:**

उत्तिष्ठ पितरः अनुगच्छन्तु विश्वैर्देवैः सह तूष्णीमेक्षणं जयादिहोमशेषं समापयेत् । ओं शान्तिश्शान्तिश्शान्तिः ॥

आपस्तम्बकारिका—

प्रणीतिरर्घ्यशुद्धिश्च विधिर्घृतसमित्पदोः ।
क्षालनं वरणं चेध्ममुस्समावाहनं तथा ॥
अर्घ्यदानमलङ्कारः पितृहोमो यमाहुतिः ।
तत स्विष्टकृतं कृत्वा उपस्थानाच्च पूर्ववत् ॥

---

R. No. **1348.**

Paper. $11\frac{1}{8} \times 8\frac{1}{4}$ inches. Foll. 44. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Mārkaṇḍēya Śarma of Guntur.

## नलहरिश्चन्द्रीयम्—सव्याख्यानम्.

## NALAHARIŚCANDRĪYAM WITH COMMENTARY.

A work dealing with the leading incidents in the life of Nala and Hariścandra. If the stanzas of this work are read in their natural order they describe the life of Nala, while if read in the reverse order they give a description of the life of Hariścandra. The author, as usual in such classes of works, takes care to add a commentary of his own.

Complete.

**Beginning :**

श्रीमानेष हरिश्चन्द्रः प्रतापे यशसां भरे ।
सदा नलो विधुर्जीयादवनेरवनेऽपि च ॥

व्या—श्रीमान् भाग्यवान् प्रतापे पराक्रमे हरिः सूर्यः यशसां भरे चन्द्रः । अवनेः भूम्याः अवने रक्षणे विधुरपि च विष्णुश्च एष नलः नलाख्यो महाराजः सदा जीयात् सर्वोत्कर्षेण वर्तताम् । हरिश्चन्द्रपक्षे तु श्रीमान् प्रतापेऽनलः अग्निः । यशसां भरे अवनेरवने च विधुश्चन्द्र इन्द्रश्च विष्णुश्च ।

* * * *

निजमोऽतिप्रजारागी नलोऽच्छस्सदमोऽजनि ।
यः श्रियश्चन्द्र इन्द्रश्च गोप्ता गोस्सर्वपूरिह ॥

आनुलोम्ये नलो राजा बभूवेत्यर्थं प्रातिलोम्ये हरिश्चन्द्रो बभूवेत्यर्थं च प्रतिपादयन्तं श्लोकमाह । निजा नित्या मा लक्ष्मीर्यस्य निजमः । स्वके नित्ये निजं त्रिषु—इत्यमरः । अतिप्रजारागी अत्यन्तं प्रजासु रागी । अच्छः निर्मलः सदमः इन्द्रियनिग्रहवान् दम इन्द्रियनिग्रह इत्यर्थः । नलः नलाख्यो महाराजः अजनि बभूव ।

* * * *

प्रातिलोम्ये तु

हरिपूर्वस्स गोप्ता गोश्चन्द्र इन्द्रश्चयश्श्रियः ।
निजमोदस्सच्छलोनगी राजाप्रतिमोऽजनि ॥

गोः भूमेः स्वर्गस्य च गोप्ता रक्षकः श्रियः साम्राज्यस्य चयः प्राकारभूतः वासस्थान(म्) इत्यर्थः; 'स्याच्चयो वप्रमस्त्रियाम्, इत्यमरः। अत एव इन्द्रः इन्द्रसमानः, अग्निर्माणवक इतिवत्। निजमोदः नित्यानन्दवान्। सच्छलोनगीः सत् सत्यरूपं छलेन वञ्चनया ऊना रिक्ता गीर्वाणी यस्य सः सच्छलोनगीः। अप्रतिमः निस्तुलः। हरिपूर्वः चन्द्रः हरिश्चन्द्राख्य इत्यर्थः सः प्रसिद्धः राजा अजनि बभूव।

**End:**

अथ प्रतिपादमानुलोम्यप्रातिलोम्ययोरेकरूपत्वमापन्न(म्) एकस्मिन् श्लोके श्लेषमहिम्ना उभावपि राजानौ सुखं प्राप्तवन्तौ इत्यर्थं प्रतिपादयन्तमाह—

लीलाकलो मध्यमलोकलाली त्यागी सुखी मुग्धमुखी सुगीत्या।
सभाप्रयानङ्गनयाप्रभास सहासया तत्र तया सहास॥

---

## R. No. **1349.**

Paper. 11¼ × 9⅜ inches. Foll. 57. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Śrīnivāsapāṭrācārya of Kumbakonam.

### यतिधर्मः.

YATIDHARMAḤ.

This treatise, after authoritatively pointing out at what stage of life a twice-born may become a Sannyāsin, lays down his duties and conduct after embracing that order.

Incomplete.

**Beginning:**

वादिद्विपशिरोभङ्गपञ्चाननपराक्रमः।
श्रीमान् वेङ्कटनाथार्यो वेदान्तगुरुरेधताम्॥

अत्र यतिधर्मसमुच्चयात् सुखग्रहणार्थं मुख्यप्रयोगोऽत्र लिख्यते । अधिकारिदशानिरूपणम्—वनवासादूर्ध्वमेव पारिव्रज्यं न ब्रह्मचर्यादित्येके । तथा च मनुः—

ऋणानि त्रीन(ण्य)पाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ इति ।

End:

मध्ये भिक्षां करोत्येष प्राजापत्यद्वयं चरेत् ।

इति बोधायनः ।

ऐश्वर्यवद्गृहस्थस्य दासीदा[illegible]तु(ने) गृहे ।
भार्या रजस्वला त(वा)स्या(द)न्तर्वत्नी भवेद्यदि ॥
एका स्त्री पचते चान्नमिति ज्ञात्वा भुजेद्यतिः ।
न तस्य निष्कृतिः सास्ति पातकी यतिवृत्तिहा ॥
चतुर्दिनानि मासान्तं संत्यक्त्वा भैक्षमाचरेत् ।

इति मनुः ।

इत्येकदाराविभक्तविषयम् ॥

---

R. No. **1350.**

Paper. $11\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Śrīnivāsapāṭrācārya of Kumbakonam.

**सन्न्यासविधिः.**

SANNYĀSAVIDHIḤ.

Lays down the general duties and conduct of a Sannyāsin and also the ceremonial rites to be performed after his death.

Complete.

**Beginning:**

(मो)क्षाश्रमं करिष्यन् पूर्वपापनिवृत्तिद्वारा सयोग्यतासिद्ध्यर्थं कृच्छ्रचतुष्टयं स्वरूपेण कर्तुमशक्तः तत्प्रत्याम्नायं गोमूल्यतुरीयांशदानप्रकारेण द्रव्यदानं यत्किञ्चिद्धिरण्यरूपेण करिष्ये—इति सङ्कल्प्य एकसूकरपरिमितं द्रव्यं नानागोत्रेभ्यो ब्राह्मणेभ्यस्तेभ्यस्तेभ्यः संप्रददे न मम इति दत्वा अशेषे हे परिषदित्यादि मम मोक्षाश्रमस्वीकारे योग्यतासिद्धिमनुगृहाणेति दक्षिणादानपुरस्सरं ब्राह्मणाननुज्ञाप्य ।

**End:**

समुद्रे त्वा नृमणा अप्स्वन्तिना(न्तर्ना)के सुपर्णमिति लवणेन प्रच्छाद्य प्रपूरयेत् । यथा श्वशृगालादिभिर्न बाध्येत तथा पुनः पुनः पूरयेत् । भूमिर्भूमिरगात् माता मातरमप्यगात् भूयास्मे पुत्रः पशुर्यो नो द्वेष्टि समभिद्यतां शम् । सर्वेषां स्नानतः शुद्धिः नाशौचं नोदकक्रिया । वहनं कुर्वतां पदे पदे अश्वमेधफलं भवेदित्याह भगवान् बोधायनः ।

इति यतेः खननसंस्कारविधिः ॥

---

## R. No. 1351.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914-15 from a palm-leaf MS. of M.R.Ry. Pañcāpagēśa Śāstri of Paḻamānēri (Tanjore district).

अङ्गत्वनिरुक्तिः.

ANGATVANIRUKTIḤ.

A tract on what constitutes the exact definition of Aṅgatva, the relation of subsidiary and principal: by Murārimiśra.

Incomplete.

**Beginning:**

नमामि कुलजां स्वीयां कुलजाद्यधिदेवताम् ।
सर्वाभीष्टफलप्राप्त्यै ब्रह्मादिभिरभिष्टुताम् ॥

मुरारिसंसेवनलब्धबुद्धिः कुमारिलप्रोक्तमतानुयायी ।
मुरारिरङ्गत्वनिरुक्तिमेतां तनोति सद्युक्तिगुणैरुपेताम् ॥

तत्राङ्गत्वं न तावत् जातिः, तत्साधकाभावात् क्रियात्वादिना साङ्कर्याच्च, जात्यादिसाधारणाङ्गत्वस्य जातित्वायोगाच्च ।

**End:**

न हि व्रीहीनवहन्तीत्यादिवाक्यनिरपेक्षप्रवृत्तिकेन व्रीहिभिर्यजेतेत्यादिवाक्येन व्रीहीणामिव प्रकृतवाक्यनिरपेक्षेण केनचिद्वाक्येन पयसोऽपूर्वसाधनत्वमवगतम्. . . . . . . . . . . . .
एवंविधाङ्गत्वे च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि षट् प्रमाणानि ।

---

R. No. **1352.**

Paper. $10\frac{7}{8} \times 8\frac{3}{4}$ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Manasālakaṭṭai Gōvindācārya of Tirupati.

**उत्तररामचरितव्याख्या.**

UTTARARĀMACARITAVYĀKHYĀ.

Foll. 1*a*—72*b*.

A commentary on the Uttararāmacarita, a well-known drama of Bhavabhūti: by Ghanaśyāmapaṇḍita of Mauna Bhārgava family. He was the son of Kāśī Mahādēva and the domestic minister of Tukkāji Rāja. His paternal grandfather was Cauṇḍo Bālāji and his maternal grandfather was Timmāji Bālāji of Kauṇḍinyagōtra and his elder brothers were called Śakambharī-Paramahaṁsa and Cidambara-Brahma. He had two wives, viz., Sundarī and Kamalā. This commentary . . has been printed in Bombay in the year 1915 with the help of this manuscript.

Complete.

**Beginning:**

चतुर्दशजगद्भ्योऽद्य नतिमाचक्ष्महे वयम् ।
वञ्चिता भेदजैर्मोहैरेतावन्तमनेहसम् ॥

यद्याख्याता विद्धसालभञ्जिका चित्रितार्थके ।
विद्धे स्तम्भे सालभञ्जिकायिता यत्र नायिका ॥

तनुरुचि यो न श्यामः कविः कवीनां स यदि घनश्यामः ।
कवते कमनश्यामः किमसूयाभिर्मुधैव नश्यामः ॥

इति यमुद्दिश्य रहसि निजात्मानमतिविनिन्दन्ति मनसि सञ्जातविविधवैकलयानि कुकविसाकल्यानि ।

लग्ने कीटे झषेष्वासनदलनिलयौ भूजकेतू धनुर्हेयैंश काव्योऽथ नक्रे क्रियघटकटकांशेषु सौम्येनचन्द्राः ।
सौरिर्मेषे तुलांशे वृषमिथुनदले सैंहिकेयोऽथ जीवः
कौलीरे सिंहभागेऽध्यलियननवमांशे यदीयोऽवतारः ॥

आत्मा यश्शिवयोश्चिदम्बरमहायोगीन्द्रशाकम्भरिभ्राता श्रीद्वयसुन्दरीकमलजः काशीमहादेवजः ।
बद्धाञ्जल्यखिलप्रयोगसमयः कोशावलीवल्लभः
नम्रस्सत्प(स्संस)दि वावदीति स घनश्यामः कवीनां कविः ॥

पत्रं पुष्पं वर्तते यद्गृहे मे तत्ते वृध्यै लेखकेभ्यो ददामि ।
योगक्षेमे संसृतेर्ग्रन्थकीर्तौ चाचन्द्रार्कं देवि वाचे जय त्वम् ॥

मद्ग्रन्थवैरिषु महाकाली मद्वाङ्नुतिषु महालक्ष्मीः ।
मत्कृतिपाटीषु च महासरस्वती वसतु तरुणि मत्कविते ॥

धन्ये चतुष्षष्टिनिबन्धि(न्ध)कन्ये निर्मातुमन्या भगिनीर्मुहुस्ते ।
जीवामि शुक्रामि मृकण्डुजामि श्रीदाम्यहं सौभरितापसामि ॥

नमः सद्भ्यो महान्तो ये भस्मच्छन्नानला इव ।
नमोऽसद्भ्यो महान्तो ये भस्मच्छन्ना नला इव ॥
निश्शेषं भुवनं सशेषमपि हा विष्णुस्तदन्तर्गता
हे लोकाः शृणुतार्थिचातकमनस्कारे घनस्याम्यहम् ।
उन्मार्गा बलिदायिकद्वदमृगव्यूहाङ्कदेशे पुनः
श्यामाम्याग्रहभागतः किल घनश्यामोऽस्मि भूमण्डले ॥
त्वं चेत् किंपच दक्षसे पठ कृतिं नो चेद्गृहाणायुधं
व्यापारं कुरु पाशुपाल्यमथ वा धिक् केरलान् वा व्रज ।
मां नो चेत्परिभाषसेऽस्मि भणितो भक्त्या त्वया मत्कृते
सृष्टौ गुग्गुलुधूपजः परिमलो न स्यात्समासो यदि ॥
चोलेन्दोः सचिवोद्वहे मयि चतुष्षष्टिप्रतीबन्धकौ(के)
द्वित्रिश्लोकजगत्प्रजापतिगणो हा दुष्कवीनां जनः ।
अन्धोपस्थनयान्नरस्तुतिधनैः खद्योतवद् द्योतते
मन्ये जाग्रति चन्द्रचूडसुरते के ताम्रचूडारते ॥
युक्त्या जीवितविद्धसालतनवः सार्धप्रबन्धद्वयी-
कन्थाकृद्भवभूतिगीर्विवरणे सङ्कोचभाजोऽप्यमी ।
कीर्तौ दत्तदृशः शिरोधृतजयस्वा . . सुमाः कुर्महे
खेलेनोत्तरमेव रामचरितं टीकाकृतार्थोत्तरम् ॥
इतरपूर्वकविग्रथनाधिकाः सपुनरुक्तपदा भवभूतिजाः ।
अतिहिनामयति स्म तु चापयोः मनसि सद्यतराः सघृणैर्बुधैः ॥
ग्रन्थो(न्थे) मे मित इह विस्तरे(रो) वृथा स्यात्
गायत्र्यष्टकपठने बुधोऽलसो यत् ।
यल्लेखेष्वपि शिवरामकृष्णनाम्नां
यच्चायं वटुगणपाठने धनेच्छुः ॥

वृत्तोक्तिसालङ्कृतिभावफक्किकारसार्थसूत्राद्यनुवादचातुरीम् ।
पश्यन्तु सन्तोऽनुपमानमत्कृतप्रचण्डराहूदयदीपिकादिषु ॥

अथैतन्नाटकस्थायिसंविधानावबोधने ।
वस्तुपात्रादिनिर्देशः संग्रहात् क्रियते मया ॥

इदं कविभ्य इत्यस्मिन् पद्ये प्रामाणिकैरितः ।
वन्द्यो गणेशः पूर्वार्धे उत्तरार्धे सरस्वती ॥
श्रीमान् कालप्रियानाथो देवः सूत्रधरो नटः ।

* * * *

अथ कालिदासादिसमानकालिको भोजराजाश्रयः श्रीकण्ठनामा 'साम्बा पुनातु भवभूतिपवित्रमूर्तिः' इति श्लोकनिर्माणवेलागुणवशादानन्दभरितेन राज्ञैव भवभूतिरिति ख्यापितः कविः

'नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥'

'आवयोरन्तरं नास्ति'

इत्यादिवचनसिद्धान्तेन शिवरामकृष्णादिनाम्ना एकार्थतैव प्रामाणिकसंमतेत्यवगच्छन्नतितुच्छबौद्धकुलशासनपूर्वकं गोब्राह्मणवेदशास्त्रोद्धारणाय भगवत्पादावतारो भावीति स्वप्न(दशा)यामाज्ञापयतः साम्बशिवस्य प्रसादादद्वैतमेव जगदवलोकयन्नेष तदा मतान्तरग्रन्थाभावादवैरबुद्धिर्यथा तथायं स परब्रह्मणोऽपि 'सम्भवामि युगे युगे' इति प्रतिज्ञया लीलामानुषविग्रहस्य श्रीरामस्य चरितं चिकीर्षुः अविघ्नपरिपूरणाय प्रतिभाविशेषाय च पूर्वार्धोत्तरार्धाभ्यां गजाननसरस्वतीप्रणामात्मकं मङ्गलं चरीकर्ति—

इदं कविभ्यः पूर्वेभ्य इति । इदमिति सामान्ये नपुंसकम्। अत एव 'शक्यमञ्जलिभिः पातुं वाताःकेतकिगन्धिनः' इति वाल्मीकिः, 'शक्यमर-

विन्दसुरभिः' इति भर्तृमीढश्च। इदं नमोवाकं नम इत्युक्तिम्; 'नमउक्तौ नमोवाकः' इत्यगस्त्यः। पूर्वेभ्यः पुरातनेभ्यः अलौकिकेभ्य इत्यर्थः; वैदिकेभ्य इति यावत्। वेदानां लोकपूर्वत्वादिति भावः। 'यस्य निश्वसितं वेदाः' इति स्मरणात्। कविभ्यः कवय गणपतय इत्यर्थः; 'गणपतिं हवामहे कविं कवीनाम्' इत्यादिश्रुतेः, 'कविः शुक्रगजाननौ' इति जयः। कविभ्य इति पूजायां बहुत्वम्।

**End:**

येन नान्दी कृता तस्य भरतस्य वाक्यमिति सम्प्रदायः। अथ कविः पूर्वार्धेन रामकथाफलमाह—पापेभ्यश्च इति। या गङ्गेव पुनाति जगतो मातेव लक्ष्मीरिव 'इन्दिरा लोकमाता' इत्यमरः। वर्धयति च इयं कथा रामस्येति शेषः। मङ्गले ऐहिकफलरूपे साधुः मङ्गल्या। मनोहरा च आमुष्मिकफलदानेनेति भावः। 'स याति ब्रह्मणः स्थानम्' इति स्मरणात्। चत्रयं पादपूरणे।

अथ उत्तरार्धेन स्ववाणीप्रयोजनमाह—तामिति।

* * * *

भावयन्तु लालयन्तु 'आदरे लालने च स्याद्भावना' इति जयः।

अलमतिविस्तरेण॥

**Colophon:**

इति महाराजपदमहनीयतुक्काजिराजगृहामात्येन मौनभार्गवकुलाकूपारचन्द्रचौण्डोबालाजिपौत्रेण कौण्डिन्यगोत्रपारावारनिस्तुलकौस्तुभतिम्माजिबालाजिदौहित्रेण काशीमहादेवतनूजेन शाकम्भरीपरमहंसचिदम्बरब्रह्मानुजेन नवरसभुवातिशायिचतुरचतुरधिकषष्टिप्रबन्धिदशभाषाभव्याष्टपदीपदपद्यवर्णविलसदन्यूनाक्षरमालिकार्यास्तवनकवनधौरन्धरीपारीणेन गीतगाधासहस्रचतुष्टयदिव्यदेवीताटङ्कलिपिकल्पकेन दुर्जनातिनिन्द्येन सज्जनाभिनन्द्येन

सुन्दरीकमलाजानिना वश्यवचस्सर्वज्ञसरस्वतीनामत्रयमण्डितेन श्रीराम-नवमीनिशीथजागरण एवारब्धपरिपूरिते उत्तररामचरितसञ्जीवनाख्य-टिप्पणे सप्तमोऽङ्कः संपूर्णः ॥

इति घनश्यामपण्डितविरचिते उत्तररामसञ्जीवनाख्यटिप्पणे सप्त-मोऽङ्कः ॥

Foll. 73a—79a contain an index of the stanzas contained in the above drama. Foll. 79b and 80 are left blank.

---

R. No. **1353.**

Paper. $11\frac{1}{4} \times 8\frac{7}{8}$ inches. Foll. 166. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914-15 from a MS. of Bībliotheca Regia Monacensis in Germany.

(*a*) वैखानसश्रौतसूत्रम्.

VAIKHĀNASAŚRAUTASŪTRAM.

Foll. 1*a*—161*b*. Fol. 162 is left blank.

Same work as that described under R. No. 1336 *ante*.

Breaks off in the 20th Praśna.

The original German manuscript, which is said to have been acquired from Baroda, appears to be a copy of the MS. from which the one under R. No. 1336 has been transcribed for this library.

---

(*b*) वैखानसप्रवरसूत्रम्.

VAIKHĀNASAPRAVARASŪTRAM.

Foll. 163*a*—166*a*. Fol. 166*b* is left blank.

This forms the eleventh Praśna of the work described under No. 5 in pages 155—156 of the M. Seshagiri Sastri's Report No. 2.

Complete.

R. No. **1354.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 58. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a palm-leaf MS of M.R.Ry. Yajñanārāyaṇa Śāstri of Challapalli, Kistna district.

## श्रीराजमहाविद्या.

## ŚRĪRĀJAMAHĀVIDYA.

Similar to the work described under No. 6907 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning:**

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

ऐं आत्मतत्त्वं परिशोधयामि जुहोमि स्वाहा, क्लीं विद्यातत्त्वं परिशोधयामि जुहोमि स्वाहा, सौः शिवतत्त्वं परिशोधयामि जुहोमि स्वाहा। ऐं क्लीं सौः महाकारणदेहं परिशोधयामि जुहोमि स्वाहा।

**End:**

ध्यानम्—सकुङ्कुमविलेपनां . . बिकाम् । पञ्चपूजा ।

शङ्खं चक्रं गदाखड्गं पद्मं योनिं त्रिशूलकम् ।
तार्क्ष्यं धेनुं च शक्तिं च शार्ङ्गं नाराचकौस्तुभम् ॥
श्रीवत्साङ्कुशमुद्राश्च पञ्चदश्यां प्रकीर्तिताः ।

ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क ल ह्रीं सौभाग्यविद्येश्वरीश्रीपादुकां पूजयामि नमः ॥

## R. No. **1355.**

Paper. $11\frac{1}{4} \times 8\frac{5}{8}$ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācārya of Villiyambākkam, Chingleput district.

### शाब्दिकचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIḤ.

By Gōpālakṛṣṇa Śāstrin, son of Vaidyanātha Sumati and disciple of Rāmabhadrādhvari, and honoured by King Vijayaraghunātha. Same work as that described under R. No. 143 *ante.*

The portion of the work beginning from the second Āhnika of the third Pāda of the first Adhyāya is said to have been completed by Anantanārāyaṇa Śāstri, elder brother of Anantavēṅkaṭēśvara and disciple of Gōpālakṛṣṇa Śāstrin.

Contains the first Āhnika of the first Pāda, the third Pāda from the second Āhnika and the first Āhnika of fourth Pāda in the first Adhyāya.

**Beginning:**

वन्दे सर्वेश्वरं सर्वशक्तिं सर्वार्थदायिनम् ।
सर्वज्ञं ज्ञानवपुषं विष्णुं सर्वार्थसिद्धये ॥

पाणिन्यादिमुनीन्द्राणां समष्टिं लोकविश्रुतम् ।
श्रीरामभद्रमखिनं वन्दे वाग्वृद्धये गुरुम् ॥

प्रणम्य परमात्मानं पाणिन्यादीन् गुरूनपि ।
चिन्तामणिं शाब्दिकानां कलये विदुषां मुदे ॥

विद्वत्प्रियेण विजयरघुनाथमहीभृता ।
पोषितः सर्वसत्कारैः पूर्णभक्तिप्रयोजितैः ॥

गोपालकृष्णशर्माहमिष्टसर्वार्थदायिनीम् ।
गुरुभक्तिं पुरस्कृत्य ग्रन्थान् कर्तुं समुत्सहे ॥

अथ यत् सप्रयोजनं तदेव प्रेक्षावदुपादेयम् । व्याकरणं तु न तथेति नारम्भणीयम् । अविहितत्वाच्च न विश्वजिन्न्यायेन कल्पनं स्यात् । उच्यते— प्रयोजनाभावेऽप्यवश्याध्येतव्यं व्याकरणम्, 'ब्राह्मणेन निष्कारणेन धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इत्यागमात् ।

* * * *

**Colophon:**

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्व-भौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य श्रीगोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमपादे प्रथममाह्निकं समाप्तम् ॥

महाभाष्यमहाम्भोधिमहापारीणतार्चनान् ।
महात्मनः सदा वन्दे महाकीर्तीन् महागुरून् ॥

अनुदात्तङित आत्मनेपदम् । समाहारद्वन्द्वात् ङसिः । इदिति प्रत्येकं संबध्यते । उपदेश इत्यनुवृत्तं ङिदित्यस्य विशेषणम् ।

**End:**

एवमेवानुकर्षणार्थाः सर्वेऽपि चकारा भाष्ये प्रत्युक्ता इति सर्वेष्ट-सिद्धिः ॥

**Colophon:**

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौम-श्रीरामभद्राध्वरीन्द्रगुरुचरणश्लाघितमतिकौशलस्य श्रीगोपालकृष्णशास्त्रिणः कृतौ तन्महागुरुकानन्तवेङ्कटेश्वराग्रजश्रीमदनन्तनारायणशास्त्रिपरिपूरिते शा-ब्दिकचिन्तामणौ प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥

उपग्रहाह्निकस्यान्तगमनेन महेश्वरः ।
प्रीयतां गुरुरूपो मे सच्चिदानन्दलक्षणः ॥
पातञ्जलसुधोदन्वत्पारावारीणतार्चनान् ।
पादं तुरीयमारिप्सुः प्रपद्येऽहं महागुरून् ॥

आकडारादेका संज्ञा ॥ कडारादिति पञ्चमीनिर्देशादाकारः प्रथमान्तपदम् ।

* * * *

एतच्चान्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते इति प्रत्ययोत्तरपदयोश्चेत्यत्र ज्ञापनात् सिद्धम् ॥

**Colophon:**

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरीन्द्रगुरुचरणश्लाघितमतिकौशलस्य श्रीमद्गोपालकृष्णशास्त्रिणः कृतौ तन्महागुरुकानन्तवेङ्कटेश्वराग्रजश्रीमदनन्तनारायणशास्त्रिपरिपूरिते शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकम् ॥

आकडाराह्निकस्यान्तगमनेन महेश्वरः ।
प्रीयतां गुरुरूपो मे सच्चिदानन्दलक्षणः ॥

---

## R. No. 1356.

Paper. 11 × $8\frac{7}{8}$ inches. Foll. 90. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Tāṅgal Rāmasvāmidīkṣitar of Viriñcipuram.

### शिवधर्मोत्तरखण्डः.
### ŚIVADHARMŌTTARAKHAṆḌAḤ.

On doctrin esconnected with Śaivism. This is different from the work described under No. 2208 of Dr. Rajendra Lal, Mitra's Catalogue, but is apparently the same as the one mentioned on page 195 (*a*) of Dr. Burnell's Catalogue.

Apparently complete in the following twelve Adhyāyas.

(१) गोषडङ्गविधानम्.
(२) विद्यादानफलम्.
(३) पञ्चमहायज्ञगुणाध्यायः.
(४) दानस्वरूपनिरूपणम्.
(५) शिवधर्मस्वरूपकथनम्.
(६) पापभेदनिरूपणम्.
(७) नरकविशेषकथनम्.
(८) प्रसवाख्यानम्.
(९) स्वर्गनरकचिह्नकथनम्.
(१०) ज्ञानयोगकथनम्.
(११) प्रायश्चित्तकथनम्.
(१२) गोमूत्रलोकवर्णनम्.

**Beginning :**

ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजम् ।
देवारिसूदनं स्कन्दमगस्त्यः परिपृच्छति ॥
भगवा(व)न् दर्शनात्तुभ्यमन्त्यजस्यापि सद्गतिः ।
सप्तजन्मनि विप्रश्च स्वर्गाद्भ्रष्टः प्रजायते ॥
तेनासि नाथ भूतानां सर्वेषामनुकम्पकः ।
अतः सर्वहितं धर्मं सङ्क्षेपात् प्रब्रवीम्यहम् ॥
धर्मा बहुविधा देव्या देवेन कथिताः किल ।
ये स्तु(तु)श्रुतास्त्वया स्स(स)र्वे पृच्छामि त्वामहं ततः ॥
किंप्रधानाः शिवे धर्माः शिववाक्यं च कीदृशम् ।
लिङ्गेऽर्चितः शिवः केन विधिना संप्रसीदति ॥
विद्यादानं च सर्वेषां दानानामुत्तमं किल ।
तच्च श्रुतं द्विजेन्द्राणां नान्येषां समुदाहृतम् ॥
तत्पुण्यं सर्ववर्णानां जायते केन कर्मणा ।
ज्ञेयं कतिविधं तच्च विद्यादानमनुत्तमम् ॥
कानि कृत्वैव कर्माणि गृहिनः(णः) स्वर्गत(ा)ः पुनः ।
मनुष्यलोके संभूता योगं विन्दन्ति शङ्करम् ॥
कर्मयज्ञस्तपोयज्ञः स्वाध्यायोऽध्यायनिर्वृतः ।
ज्ञानयज्ञं च पञ्चैते महायज्ञाः प्रकीर्तिताः ॥

एषां च पञ्चयज्ञानामुत्तमं कतमः स्मृतः ।
एतद्यज्ञतरा(रता)नां च प्रदाने कीदृशं फलम् ॥
धर्माधर्मप्रभेदाश्च क्रि(कि)यन्तः परिकीर्तिताः ।
तत्साधनानि कतिधा गतयश्च तदात्मकाः ॥
स्वर्गी नारकिणां पुंसामायातपतनं क्षितौ ।
कानि चिह्नानि जायन्ते भुङ्क्ते शेषेण कर्मणा ॥
संसारसागराद् घोराद्धर्माधर्मोर्मिसङ्कुलात् ।
गर्भादिदुःखफेनाढ्याम्मु(न्मु)च्यते(न्ते) देहिनः कथम् ॥

* * * *

इति सञ्चोदितः स्कन्दः सम्प्रश्नार्थानुभासकः ।
प्रत्युवाच महासेनः प्रणिपत्य महेश्वरम् ॥
स्वर्गापवर्गफलदं नरकार्णवतारणम् ।
शिवधर्मोत्तरं नाम शास्त्रमीश्वरभाषितम् ॥

**End:**

नाकाले लीयते राजा पीड्यते न च शत्रुभिः ॥
शृणोति यच्च सततं शिवधर्मं नराधिप ।
तस्य देशे भवेन्नित्यं सर्वेष्टं देहिनां सदा ॥
एकश्लोकमथार्धं वा वाचयेद्भावयेत्ततः ।
सदानुमोदते भक्त्या शिवलोके महीयते ॥

**Colophon:**

इति शिवधर्मोत्तरशास्त्रे गोमूत्रलोकवर्णनं नाम द्वादशोऽध्यायः ॥

---

R. No. **1357.**

Paper. 11 × 8¾ inches. Foll. 33. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Rāmasvāmidīkṣitar of Viriñcipuram.

## वाक्यसुधाटीका.
## VĀKYASUDHĀṬĪKĀ.

This is a commentary on Śaṅkarācārya's Vākyasudhā, which is an original work on the leading principles of the Advaita school of the Vēdānta. By Brahmānandabhāratīmuni, pupil of Ānandabhāratī, and Rāmānandamuni. He also mentions with respectful homage Bhāratītīrtha and Vidyāraṇya.

The work referred to on page 91*a* of Burnell's Catalogue as Vākyasudhāvyākhyā is apparently the same as this.

Complete.

**Beginning:**

कारणं खदि(चादि)जगतां मारणार्थमनागसम् (?) ।
वारणाननमात्मानमद्वयं समुपास्महे ॥

परात्या(पश्यन्त्या)दिदेहां प्रणताभीष्टदायिनीम्
सत्यज्ञानानन्दरूपां ध्यायेऽनन्यां सरस्वतीम् ॥

अभिषिच्य कृपावर्षैरात्मस्थं यः करोति माम् ।
तं सर्वसाक्षिणं वन्दे रामानन्दमुनीश्वरम् ॥

यत्कटाक्षसुधासिन्धौ मज्जता पुण्यपाकतः ।
मया ज्ञानमणिर्लब्धस्तमानन्दगुरुं भजे ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
मया वाक्यसुधाटीका यथामति विरच्यते ॥

न ख्यातिलाभपूजेच्छा टीकाकरणकारणम् ।
न विद्वत्ताबलं वात्र मुक्तिरेव हि कारणम् ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च केवलकूटस्थप्रत्यग्बोधरूपपरमात्मस्वरूपानुस्मरणलक्षणं मङ्गलमाचरन् सच्चिदानन्दाखण्डैकरसस्वरूपावस्थानलक्षणस्य मोक्षस्य तत्त्वमस्यादिमहावाक्यस्यार्थापरोक्षज्ञानफलत्वात् वाक्यार्थज्ञानस्य चान्वयव्यतिरेकाभ्यां पदार्थपरिशोधनपूर्वकत्वात् ।

*    *    *    *

श्रीमद्भाष्यकारैः प्रतिपादितमर्थं हृदि निधाय प्राण्यनुजिघृक्षया दृग्दृश्यविवेकद्वारा प्राधान्येन त्वम्पदार्थपरिशोधनपरमिदं प्रकरणमारभमाणः परमकृपानिधिः श्रीभारतीतीर्थगुरुः प्रकरणप्रतिपाद्यमानमर्थं सङ्क्षिप्य प्रथमश्लोकेन तावद्दर्शयति—

रूपं दृश्यं लोचनं दृक् तद्दृश्यं दृक्तु मानसम् ।
दृश्या धीवृत्तयस्साक्षी दृगेव न तु दृश्यते ॥

लोके चक्षुरिन्द्रियग्राह्यं यद्रूपमस्ति असन्दृश्यं भवति । तद्ग्राहकं चक्षुरिन्द्रियं स्वग्राह्यरूपापेक्षया दृग्भवति द्रष्टृ भवति । तथा तत्पुनः चक्षुरिन्द्रियं स्वस्मादप्यान्तरस्य मनसो दृश्यं भवति। स्वभावस्य चक्षुरिन्द्रियापेक्षया मानसमपि दृग्भवति द्रष्टृ भवति। मनसः सर्वेन्द्रियावभासकत्वात्सामर्थ्यं द्योतयति तुशब्दः।

**End:**

अत एव मोक्षशास्त्रस्यापि साफल्यं स्यादित्ययमेवास्य प्रकरणस्य समस्तवेदान्तशास्त्रस्य च महातात्पर्यविषयत्वेन पिण्डितोऽर्थः। तस्मात्सर्वमनवद्यम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदानन्दभारतीमुनिवर्यशिष्यब्रह्मानन्दभारतीमुनिप्रक्लृप्ता वाक्यसुधाटीका समाप्ता ॥

वन्दे वरप्रदमहं वरवारणेन्द्रं वक्त्रस्स(क्त्रे स)दा क्षितिभृदीश्वर(जातनूजम्)। विघ्नेश्वरं विबुधवन्दितपादपद्मं संसारसम्भवभयापहमानतानाम् ॥

---

## R. No. 1358.

Paper. 10⅜ × 9⅜ inches. Foll. 55. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Paṭṭābhirāma Śāstri of Vizianagaram.

## आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.
## ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ: PRAYŌGARATNAMĀLĀ.

By Cauṇḍappācārya. Same work as that described under R. No. 795 *ante*.

Contains the third and the fourth Paṭalas of the second Praśna.

**Beginning:**

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डपाचार्यः संमार्गादिकृतिं कृती ॥

पत्नींसंनहनमेते(के) पूर्वं समामनन्ति स्रुक्संमार्जनमेके । यदा पत्नीसंनहनं पूर्वं तदा संप्रैषनिवृत्तिः क्रमविरोधादित्याह आनुपूर्व्यताया इति लिङ्गविरोधात् तूष्णीं यवमयमिति लिङ्गाच्च पत्नीसंनहनमेके पूर्वमिति संनहनमात्रप्रतिकर्षः ।

* * * *

**Colophon:**

इति श्रीप्रयोगरत्नमालायां द्वितीयप्रश्ने तृतीयः पटलः ॥

**End:**

ब्रह्मणानुज्ञात आश्रावय ओं श्रावयाश्रावय ओमाश्रावयेति वा श्रावयत्यथाग्नीध्रोऽस्तु श्रौषडिति प्रत्याश्रावयति ॥

सामिधेन्यादिसत्तन्त्रमन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुमर्थान् पुरुषोत्तमः ॥

**Colophon:**

इति प्रयोगरत्नमालायां द्वितीयप्रश्ने चतुर्थः पटलः ॥

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डप्पाचार्यः प्रवरादिकृतिं कृती ॥

R. No. **1359.**

Paper. $10\frac{5}{8} \times 9\frac{3}{8}$ inches. Foll. 37. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Kumārasvāmi Śāstri of Pedakallapalli.

(*a*) रामायणकथाविमर्शः.

RĀMĀYAṆAKATHĀVIMARŚAḤ.

Foll. 1—31*b* and 32.

Similar to the work described under No. 1909 of the D.C.S. MSS., Vol. IV, Part I. The story contained in the Rāmāyaṇa is briefly given in this work together with the time of the occurrence of the leading events.

Complete; as found in the Skāndapurāṇa.

**Beginning:**

स्वामिनो जननानन्त(र)मष्टमे वर्षे उपनयनम् । द्वादशे विश्वामित्रेण निर्गमः । ततस्ताटकावधयज्ञसंरक्षणसीतापाणिग्रहणाद्यनेकव्यापारयुक्तस्य श्रीरामस्य पुनरयोध्याप्रवेशपर्यन्तं द्वादश संवत्सरा एव । तत्र अयोध्यायां द्वादश संवत्सराः ।

**End:**

अभिषेके ततस्तत्र तदा रामस्य धीमतः ।
भूमिः सस्यवती चैव फलवन्तश्च पादपाः ॥
गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ।

**Colophon:**

इति वेङ्कटार्यकृतश्रीरामायणसारसङ्ग्रहे अर्धदिनोत्तरविंशाद्दि(तिदि)नसम्मितो युद्धकाण्डः समाप्तः ॥

---

(*b*) रामायणमाहात्म्यम्.

RĀMĀYAṆAMĀHĀTMYAM.

Foll. 31*b*—37*a*. Fol. 37*b* is left blank.

Fol. 32 belongs to the previous work.

Contains two Adhyāyas, one taken from the Pādmapurāṇa and the other from the Skāndapurāṇa. The former describes the daily duties of Rāma after his coronation and the latter treats of the greatness of the Rāmāyaṇa.

Complete.

**Beginning:**

रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥

श्रीरामस्याभिषेकानन्तरं नित्यकृत्यदिनचर्या । पाद्मे पुराणे पार्वतीं प्रतीश्वर उवाच—

अथ रामस्तु वैदेह्या राजभागान् मनोरथान् ।
बुभुजे . . . . . . . त्रिभिश्चारुविलोचनः ॥

* * * *

एवं प्रशासतो भूमिं राघवस्य महेश्वरः ।
अत्ययाद्वर्षसाहस्रं रममाणस्य सीतया ॥

**Colophon:**

इति पाद्मे पुराणे उत्तरखण्डे उमामहेश्वरसंवादे त्रयोदशोऽध्यायः ॥

प्रणम्य सर्वलोकेशं ब्रह्माणं शाश्वतं विभुम् ।
वसिष्ठः पारिपप्रच्छ सर्वमानवतां वरम् ॥
ब्रूहि मे भगवंस्तत्त्वं रामस्य चरितं प्रति ।
श्रावकस्यापि यत्पुण्यं श्रोतुश्चापि विशेषतः ॥
तयोर्नियामनं चैव आनुपूर्व्येण देहिनः ।
चरितं शृण्वतां पुण्यं व्रतं चानुवदस्व भो ॥

**End:**

इत्येवं ब्रह्मणोक्तस्तु वसिष्ठो मुनिसत्तमः ।
अत्यन्ताश्चर्यसंयुक्तो मुनीनामपि सन्निधौ ॥
श्रुत्वा रामायणं कृत्स्नं प्रत्यहं चानुमोदते ।
स्वयं रामायणं कृत्वा प्रहर्षं परमं गतः ॥

श्रृण्वन्ति साधवो लोके तस्माद्रामायणं परम् ।
वाञ्छितार्थप्रदं सर्वं सम्पदां हि विवर्धनम् ॥

**Colophon:**

इति श्रीस्कान्दे महापुराणे ब्रह्माण्डे रामायणमहोत्सववर्णनं नाम पञ्चाशच्छततमोऽध्यायः ॥

---

R. No. **1360.**

Paper. $11\frac{1}{8} \times 8\frac{5}{8}$ inches. Foll. 45. Lines, 18 in a page. Grantha. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

**बोधायनगोपालकारिका.**

BŌDHĀYANAGŌPĀLAKĀRIKĀ.

A metrical treatise by Gōpāla regarding the post-natal rites and obsequies to be performed as laid down by Bōdhāyana.

Complete.

**Beginning:**

पुत्रं जातं पिता श्रुत्वा स्नात्वा दानादि कारयेत् ।
अस्थ्य इत्यनुवाकेन निवीती मन्त्रयेत्सुतम् ॥
नोपयेत् क्षात्त्रियैः षड्भिर्यूयंपातान्तमेव च ।
अङ्गादिति समारोप्य पितुरङ्के शिशुं ततः ॥
अश्मा भवेति चाघ्राय मूर्धानं बालकस्य च ।
नक्षत्रनाम बालस्य दक्षिणश्रवणे वदेत् ॥

*    *    *    *

**Colophon:**

इति बोधायनगोपालकारिकायां पूर्वविषयः समाप्तः ॥

**End:**

शोचिषोऽग्निमुखं कृत्वा हुत्वा मिन्दाहुतिद्वयम् ।
पक्कं च पूर्ववद्धुत्वा ततः पञ्चदशाहुतीः ॥

पालाशाश्च चतस्रः स्युरग्ने व्रतपते ततः ।
अनुवाकश्च . . . . . . . प्राशनं ततः ॥

**Colophon:**

इति बोधायनगोपालकारिकायामपरविषयः समाप्तः ॥ गोपालकारिका समाप्ता ॥

Foll. 16*b* and 45*b* are left blank and foll. 44*b* and 45*a* contain a few stanzas taken from a work in astrology and dealing with यात्रा (starting).

---

R. No. **1361.**

Paper. 11 × 8¾ inches. Foll. 50. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

This is a commentary on the Tattvacintāmaṇidīdhiti of Raghunāthaśirōmaṇi. By Gadādharabhaṭṭācārya.

Contains the Vyāptivāda in the Anumānakhaṇḍa.

**Beginning:**

अन्योन्याभावगर्भव्याप्तिद्वयाभेदमाशङ्क्याह—अत्यन्तेति । अत्यन्ताभावगर्भवदिति । अत्यन्ताभावगर्भव्याप्तिद्वयं यथा सामान्यविशेषभेदेन उक्तमित्यर्थः । एतेन सामान्यविशेषभेदेन भेदगर्भव्याप्तिद्वयानाभिधानन्यूनतेति सूचयित्वा उक्तरीत्याभेदे ग्रन्थकारस्वरस इति दर्शितम् ।

**End:**

लाघवादित्यस्य व्यभिचारोन्नायकतापेक्षयेत्यादिः । साध्यव्यापकतामात्र इति दूषणौपयिकान्तर्गतसाधनाव्यापकत्वांशस्य व्यवच्छेदः । व्यभिचारसाधने व्यापकस्य साध्यव्याप्यत्वनियमेन स्वनिष्ठव्याप्तिसङ्क्रामकताभावादनतिप्रसङ्गादिति ॥

**Colophon:**

गादाधर्यां व्याप्तिवादः समाप्तः ॥

## R. No. 1362.

Paper. 11 × 8¾ inches. Foll. 14. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914-15 from a palm-leaf MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam.

### नाथमुनिप्रपन्नत्वसमर्थनम्.

### NĀTHAMUNIPRAPANNATVASAMARTHANAM.

This treatise purports to maintain that Nāthamuni is a Prapanna and that he sought and obtained salvation through Prapatti, thus contradicting the view of those who thought that he considered Bhakti as the sole means of obtaining salvation. The work is also called Nāthamunivijaya. By Dēśikasudhī, a disciple of Aṇṇayārya.

Complete.

**Beginning :**

जयति गुरुरण्णयार्यो जगति गतिद्वयं(युगं) प्रपेदुषां विदुषाम् ।
रुन्धे मनोऽन्धकारग्रन्थेर्गन्धर्वकन्धरः सन्धिम् ॥
सत्यां समग्रभक्तौ समधिकशक्तौ सलालसो मुक्तौ ।
प्रायुङ्क्त यः प्रपत्तिं विप्रतिपत्तिं विहन्त्वसौ नाथः ॥
व्याघातमात्रदृष्ट्या व्याकुलितां कैश्चिदल्पसन्तुष्ट्या ।
देशिकसुधीरमृष्या? द्रढयति नाथप्रपन्नतां हृष्ट्या ॥
प्राचामाचार्याणां वाचामाचान्तसिन्धुबन्धूनाम् ।
अनुवादमपविवादं वाण्या श्रेण्या चराणि गीर्वाण्याः ॥

इह खलु निखिलमुनिवर(नि)करसमधिकनिरवधिकपरिकरसमग्रशक्तिकोऽपि भगवान् नाथमुनिरपि सोढकालविलम्बः स्वतन्त्रप्रपत्तिमवलम्बे इति समीचीनसम्प्रदायसरणिसङ्गिनः सङ्गिरन्ते ।

**End :**

तदेवं नाथमुनेः साधनभक्तिनिष्ठत्वेना(न)न्यथासिद्धसाधकलेशाभावात् प्रबलबहुलविपुलबाधसत्त्वाच्च नाथमुनिः स्वतन्त्रप्रपत्तिनिष्ठः फलभक्तिनिष्ठश्च न साधनभक्तिनिष्ठ इति निष्कण्टको घण्टापथः ॥

देशिकदासेनासौ शिष्येण श्रीमदण्णयार्याणाम् ।
नाथमुनिविजयनामा कृतिरभिरामा कृता सतां प्रीत्यै ॥

**Colophon:**

नाथमुनेः प्रपन्नत्वसमर्थनं समाप्तम् ॥

---

R. No. **1363.**

Paper. 11 × 8½ inches. Foll. 50. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Paṭṭābhiramamūrti of Vizianagaram.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ: PRAYŌGARATNAMĀLĀ.

By Cauṇḍappācārya. Same work as that described under R.No. 795 *ante.*

Wants the beginning in the fourth Pāṭala of the third Praśna and ends in the fourth Praśna.

**Beginning:**

प्रज्ञातवान् । अतएवास्मद्गृहे न यज्ञो वावृथे पुनः पुनरवर्धत स यज्ञोऽस्माभिरिज्यमानानां देवानामधिकं पालयिता भवतु । स यज्ञोऽस्मानप्यधिपतन्नधिकमनुष्ठानस्य पालकान् करोतु । वयमपि तस्य यज्ञपुरुषस्य प्रसादनात् रयीणां यज्ञसाधनानां धनानां पतयो भूयास्म ।

* * * *

**Colophon:**

इत्यापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां तृतीयप्रश्ने चतुर्थः पटलः ॥

**End:**

प्रवसद्याजमानान्ततन्त्रव्याख्यासुगान्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुरुषान् पुरुषोत्तमः ॥
संकल्पादिप्रवासान्तपदार्थोक्तिसमुज्ज्वलः ।
चतुर्थो व्याकृतः प्रश्नो याजमानाभिधानवान् ॥

**Colophon:**

इत्यापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां चतुर्थप्रश्ने चतुर्थः पटलः ॥

समाप्तश्चतुर्थः प्रश्नः ॥

---

R. No. **1364.**

Paper. 11¾ × 9 inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Sthalaśāyi Ayyaṅgār of Agaram.

(*a*) व्यावहारिकसत्यत्वखण्डनम्.

VYĀVAHĀRIKASATYATVAKHAṆḌANAM.

Foll. 1*a*—10*b*.

Similar to the work described under R.No. 608(*b*) *ante*. A refutation of the view that the phenomenal universe possesses only a phenomenal and relative reality: by Varadācārya of Kauśikagōtra and a disciple of Lakṣmaṇayōgin.

Complete.

**Beginning:**

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।

विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

आकर्णयध्वमाचार्या वर्णयामस्तावद्वेदान्तनिर्णयमवधूतदुर्नयविप्रजापं भवतु च लब्धवर्णानां भवतां कर्णामृतत्वाय । अत्रानाद्यविद्यासश्चयवञ्चितहृदया मृषावादिनः केचिदाहुः—सत्यत्वं त्रिविधं पारमार्थिकं व्यावहारिकं प्रातिभासिकं चेति । तत्र पारमार्थिकसत्यत्वं निर्विशेषस्य परस्य ब्रह्मणः ।

**End:**

ननु नेह नानास्तीत्यभेदबोधकानां वाक्यानां का गतिरिति नाशङ्कनीयम्; उपक्रमोपसंहारानुगुण्येन शरीरशरीरिभावलक्षणार्थान्तरपरत्वेन निर्णयादिति सर्वं समञ्जसम् ॥

**Colophon:**

इति व्यावहारिकसत्यत्वखण्डनम् ॥

(*b*) प्रपञ्चमिथ्यात्वखण्डनम्.

PRAPAÑCAMITHYĀTVAKHAṆḌANAM.

Foll. 11*a*—22*b*.

Similar to the work described under R.No. 608(*g*) *ante*.

Complete.

**Beginning:**

इह कतिचिदतिसमुचितदुरितविन्ध्याटवीं सञ्चरन्तः प्रपञ्चस्य मिथ्यात्वमाहुः । तद्विषयमिदमनुमानं प्रयुञ्जते—प्रपञ्चो मिथ्या दृश्यत्वात्; यत्र दृश्यत्वं तत्र मिथ्यात्वं यथा शुक्तिरूप्यम् । घटादयोऽपरमार्थाः व्य(ा)वर्तकत्वात् रज्ज्वधिष्ठानसर्पादिवदिति ।

**End:**

ननु क्वचिद्बाधदर्शनाद्भागासिद्धो हेतुरिति न वाच्यम्; तस्य प्रतिपन्नोपाधिजन्यबाधस्याहेतुत्वादित्युपरमः ॥

**Colophon:**

प्रपञ्चमिथ्यात्वखण्डनं सम्पूर्णम् ॥

(*c*) आश्रयानुपपत्तिः.

ĀŚRYĀNUPAPATTIḤ.

Foll. 22*b*—27*b*.

A short critical treatise showing with authoritative Vedic quotations that Avidyā or primordial nescience cannot be said to find its abode in the Supreme Brahman.

Complete.

**Beginning:**

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

प्रत्यस्तमितभेदं विज्ञानैकरसं ब्रह्म अनाद्यविद्यातिरोहितस्वरूपमनन्तभेदात्मकं प्रपञ्चं पश्यतीति मृषावादिनामाघोषः ।

**End:**

तस्मान्नित्यमुक्तस्य नित्यसर्वज्ञस्य ब्रह्मणोऽविद्याश्रय(त्व)वचनं दीपस्य तिमिराश्रयत्ववचनवदपहास्यम् ॥

**Colophon:**

इत्याश्रयानुपपत्तिः ॥

---

(*d*) तिरोधानानुपपत्तिः.

TIRŌDHĀNĀNUPAPATTIḤ.

Foll. 27*b*—28*b*.

A short pamphlet showing that Avidyā cannot be said to conceal the true nature of the Supreme Brahman.

Complete.

**Beginning:**

किं च ब्रह्मणस्तिरोधानमविद्याकृतम् । तदुत्पत्तिप्रतिबन्धकत्वं तत्स्वरूपविरोधो वा विनाशो वा स्यात्? उत्पत्तिशून्यत्वाद्ब्रह्मणः नाद्यः । नोत्तरः नित्यत्वाद्ब्रह्मणः । न चाविद्याजन्यप्रपञ्चभ्रमाधारत्वमेव ब्रह्मणस्तिरोधानमिति वाच्यम् ।

**End:**

तस्माद्ब्रह्मणि स्वरूपातिरिक्ताकारानभ्युपगमात्तस्य तिरोधानं तान्निवृत्तिरेव स्यात् । अतो ज्ञानैकरसं ब्रह्म अविद्यातिरोहितमित्यसङ्गतम् ॥

**Colophon:**

इति तिरोधानानुपपत्तिः ॥

---

(*e*) स्वरूपानुपपत्तिः.

SVARŪPĀNUPAPATTIḤ.

Foll. 28*b*—29*b*.

Herein it is stated with reasons that the nature of Avidyā, as postulated by the followers of the Advaita school of Vēdānta, cannot be defined.

Complete.

**Beginning:**

किं च अविद्या सत्या असत्या वा । नाद्यः भेदवादापत्तेः । न द्वितीयः असत्यत्वे दोषमूलत्वस्य प्रयोजकत्वाद्दोषान्तरापेक्षायामनवस्था स्यात् । न चाविद्यायाः स्वसिद्धौ दोषान्तरापेक्षा नास्तीति वाच्यम् ।

**End:**

किं च न ह्यविद्यायाः पारमार्थिकत्वं सुवचम्, ज्ञाननिवर्त्यत्वानुपपत्तेः भेदवादप्रसङ्गाच्च । नाप्यपारमार्थिकत्वं भ्रमोपादानत्वानुपपत्तेः । तस्माद-विद्यास्वरूपमपि दुर्निरूपम् ॥

**Colophon:**

इति स्वरूपानुपपत्तिः ॥

---

(*f*) लक्षणानुपपत्तिः.

LAKṢAṆĀNUPAPATTIḤ.

Foll. 29*b*—31*a*.

Similar to the work described above.

Complete.

**Beginning:**

किं च किमविद्याया लक्षणम्? अवाच्यत्वानधिकरणत्वं वा, तुच्छ-त्वं वा, सत्त्वासत्त्वात्यन्ताभावाधिकरणत्वं वा, ब्रह्मतुच्छविलक्षणत्वं वा?। न प्रथमः; सदसद्विलक्षणत्वेन वाच्यत्वमङ्गीकुर्वतः स्ववचनव्याघातात् ।

**End:**

तत्किं ब्रह्मतुच्छविलक्षणत्वं सत्यमसत्यं वा? नाद्यः असत्ये भाव-रूपाज्ञाने सत्यस्य तस्यावस्थानं व्याहन्येत । न द्वितीयः ब्रह्मतुच्छता-दात्म्यप्रसङ्गात् ॥

**Colophon:**

इति लक्षणानुपपत्तिः ॥

---

(*g*) प्रमाणानुपपत्तिः.

PRAMĀṆĀNUPAPATTIḤ.

Foll. 31*a*—34*b*.

Herein it is explained that the grounds set forth by Advaitins for establishing the existence of what is called 'Avidyā' are unacceptable.

Complete.

**Beginning :**

यच्च भावरूपाज्ञानसद्भावे प्रमाणमाहुः—अहमज्ञो मामन्यं च न जानामीति प्रत्यक्षमेव प्रमाणम् । न चेदं ज्ञानप्रागभावगोचरमिति वाच्यम्; तस्य षष्ठप्रमाणागोचरत्वात् ।

**End :**

नापि जीवब्रह्मैक्यान्यथानुपपत्तिप्रसूतार्थापत्तिस्तत्प्रमाणम्; शरीरशरीरिभावनिबन्धनेनास्य प्रतिपादनाविरोधः ॥

**Colophon :**

इति प्रमाणानुपपत्तिः ॥

---

(*h*) अविद्याखण्डनम्.

AVIDYĀKHAṆḌANAM.

Foll. 35*a*—37*a*.

A hostile criticism of the doctrine of Avidyā as propounded by the Advaita school, tending to show in particular that the eradication of Avidyā would not be possible by any means.

Complete.

**Beginning :**

किमज्ञानस्य निवर्तकं जीवब्रह्मैक्यगोचरज्ञानं वा? शुद्धब्रह्मस्वरूपं वा, जीवस्वरूपं वा? नाद्यः अभेदज्ञानस्य वृत्तिज्ञानतया मिथ्यात्वेनानिवर्तकत्वात्, निवर्तकत्वेऽपि तस्य निवर्तकान्तराभावेन निश्शेषनिवृत्त्ययोगात् ।

**End :**

आद्ये ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वव्याघातः । अन्त्ये ब्रह्मणोऽनादित्वेन प्रपञ्चभ्रमो न स्यात् । न हि निवृत्तौ सत्यां निवर्त्यं तिष्ठतीति वक्तुं शक्यम्— इत्यलमतिदूषणायासेन ॥

**Colophon:**

अविद्याखण्डनं सम्पूर्णम् ॥

(i) भेदसमर्थनम्.

BHĒDASAMARTHANAM.

Foll. 37*a*—45*a*.

A treatise endeavouring to maintain the distinction between the individual self and the Supreme Brahman.

Complete.

**Beginning:**

इह कतिचिदतिचिरसमुपचितदुरितसञ्चया वञ्चयन्ति भेदतत्त्वम् । एष खलु तेषामाघोषः—प्रमाणात्प्रमेयसिद्धिरिति तेषां समयः । तत्र भेदे न किञ्चित्प्रमाणं पश्यामः । प्रत्यक्षमिति चेन्न, शास्त्रप्रत्यक्षयोर्विरोधे शास्त्रवत्प्रत्यक्षस्यापि निर्विशेषवस्तुग्राहित्वस्यावर्जनीयत्वात् ।

**End:**

ननु निर्गुणमित्यादिश्रुतेः का गतिरिति चेत् हेयगुणनिषेधपरत्वेन निर्णयात्, विजरो विशोक इति वाक्यान्तरानुगुण्याच्च, अधिकं तु भेदनिर्देशादित्यादि भेदशब्दप्रसङ्गाच्च ॥

**Colophon:**

भेदसमर्थनं सम्पूर्णम् ॥

(j) परतत्त्वनिर्णयः.

PARATATTVANIRṆAYAḤ.

Foll. 45*a*—49*b*.

In this work the author tries to establish that Nārāyaṇa of transcendental qualities is the Supreme Brahman, and that the external world is real and the individual self is distinct from the Supreme Brahman. It is a refutation of the view of the Advaita school of Vēdānta that the Supreme Brahman is devoid of all qualities.

Complete.

**Beginning:**

अथ परतत्त्वं निश्चीयते—

अथातो ब्रह्मजिज्ञासेति तापत्रयातुरैरमृतत्वाय ब्रह्म ज्ञातव्यमिति प्रतिज्ञातं सूत्रकारेण। व्याख्यातं च भाष्यकारैः—तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्य इति। श्रूयते च ब्रह्मज्ञानस्य मोक्षसाधनत्वम्।

**End:**

तस्मादनन्तकल्याणगुणगणः निर्दोषो नारायणः शिवादिशब्दवाच्यः परमात्मा जगत्कारणमिति सर्वमवदातम्।

जगतः परमार्थत्वं तन्मृषात्वानिराकृतिम्।
अविद्यादोषभङ्गं च भेदं विश्वेशयोरपि ॥
पारम्यं श्रीनिवासस्य पश्यन्त्यत्र मुमुक्षवः।
अनादिमायासञ्छन्नकौतस्कुतजिगीषया ॥

* * * *

भेदो विकल्पात्कस्तर्हि विशेषणविशेष्ययोः।
यदि स्वरूपग्रहणं तदसारं हि तार्किकम् ॥
समवायस्याग्रहणं निर्विकल्पविकल्पयोः।
भेदे पश्य मृषावादिन् . . . . . तम् ॥

---

(*k*) **अभेदखण्डनम्.**

ABHĒDAKHAṆḌANAM.

Foll. 50*a*—55*a*. Foll. 55*b* and 56 are left blank.

A refutation of the leading principle of the Advaita school of the Vēdānta that the individual self is identical with the Supreme Brahman.

Complete.

**Beginning:**

अत्र खलु कश्चिच्चिरन्तनसरस्वतीसीमन्तोदन्तानभिज्ञं भेदमहं खण्डयामीति जल्पति। तं प्रति पृच्छामः—किं करोषि वृथा जल्पं भेदमहं खण्डयामीति ?। तदिदं भेदखण्डनं स्वाशिरःखण्डनं च(न)जानीषे। कुतस्त-

दिति चेत् भेदमहं खण्डयामीति खण्डनीयस्य खण्डयितृशिरसश्च भेदाभावेन भेदखण्डनस्य स्वाशिरःखण्डनत्वापातात् ।

* * * *

अतो भेदो धर्म इति पक्षोऽपि साधीयान् । अतस्सर्वथा भेदो न दुर्निरूपः । अपि च भेदस्य दुर्निरूपत्वे त्व(दुक्त)स्याभेदस्यापि दुर्निरूपत्वं प्रसज्येत । अभेदेऽपि त्वदुक्तसकलदोषानतिवृत्तेः । अभेदः किं स्वरूपः उत धर्मः ? । न तावत्स्वरूपत्वं सम्भवति ; ब्रह्मेति स्वरूपव्यवहारवत् प्रतियोगिनिरपेक्षभेदव्यवहारप्रसङ्गात् ।

End :

तदुक्तं वरदाचार्यैः—

न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत्
किं त्वद्वैतमनन्यगोचरतया तद्वेद य . . . !
अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थप्रयासो यतः
प्रख्याता च परस्तु शास्त्रविषयो भेदस्तदद्वैतवत् ॥

इति सर्वमवदातम् ॥

Colophon :

इत्यभेदखण्डनम् ॥

---

R. No. **1365.**

Paper. $11\frac{3}{8} \times 8\frac{3}{4}$ inches. Foll. 455. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācārya of Villiyambākkam. Bound in two volumes.

शाब्दिकचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIḤ.

By Gōpālākṛṣṇa Śāstrin, son of Vaidyanāthasumati of Śrīvatsa family and pupil of Rāmabhadrādhvarin. Same work as that described under R. No. 143 *ante*.

Contains from the second Āhnika to seventh Āhnika of the first Pāda of the first Adhyāya.

**Beginning :**

अथाक्षरसमाम्नायसूत्राणां कृत्स्नशास्त्रोपोद्घातरूपत्वात् तद्विचारः प्रथममारभ्यते । यद्यपि पूर्वस्मिन्नाह्निके अथ किमर्थो वर्णानामुपदेश इत्यादिना वर्णविषयविचारः कृतः, तथापि तत्र सामान्येन वर्णविषय-विचारः कृतः । अस्मिन्नाह्निके ककारादिवर्णविषयो विचारः क्रियत इति न पौनरुक्त्यम् । अइउण् । अत्रत्यणकारानुबन्धः आदिरन्त्येनेति संज्ञार्थ-मकारमात्रेण संबध्यते ।

* * * *

**Colophon :**

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्व-भौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य गोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥

**End :**

इह नानेकाल् शिदिति पठित्वान्त्यस्यादेरिति चानुवर्त्यानुसंहारद्वय-निषेधात् सर्वग्रहणं शक्यमकर्तुमित्याहुः ॥

**Colophon :**

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौम-श्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य श्रीगोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमे पादे सप्तममाह्निकं संपूर्णम् ॥

---

R. No. **1366.**

Paper. $11\frac{1}{2} \times 9$ inches. Foll. 247. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1914–15 from a MS of M.R.Ry Tirumalai Kuḻappalūr Anantayyavādhyār.

## जिनसंहितासंग्रहः—द्राविडटीकासहितः.

## JINASAṀHITĀSAṄGRAHAḤ WITH TAMIL MEANING.

Deals with the conduct of worship in Jaina temples and other incidental things connected therewith. The subjects dealt with are clear from the headings of the Paricchēdas.

By Ēkasandhibhaṭṭāraka. Contains Paricchēdas 1 to 20 as given below :—

१. शास्त्रमुखम्.
२. शास्त्रोपक्रमवर्णनम्.
३. पूजकलक्षणम्.
४. जातिनिर्णयः.
५. शौचविधिः.
६. प्रतिष्ठाविधिः.
७. होमविधिः.
८. नित्यसंध्याक्रियाविधिः.
९. वेदार्चनक्रमविधिः.
१०. स्नपनाविधिः.
११. कलशस्थापनविधिः
१२. स्नपनकालविधिः.
१३. बलिविधानम्.
१४. कार्त्तिकदीपार्चनविधिः.
१५. श्रीविहारविधिः.
१६. ध्वजारोहणविधिः.
१७. अङ्कुरार्पणविधिः.
१८. प्रायश्चित्तविधिः.
१९. जीर्णोद्धारणविधिः.
२०. मन्त्रविधिः.

Complete.

**Beginning :**

विज्ञानं विमलं यस्य विशदं विश्वगोचरम् ।
नमस्तस्मै जिनेन्द्राय सुरेन्द्राभ्यर्चिताङ्घ्रये ॥

* * * *

वन्दित्वा च गणाधीशं श्रुतस्कन्धमुपास्य च ।
संग्रहीष्यामि मन्दानां बोधाय जिनसंहिताम् ॥

* * * *

इत्यनुश्रूयते वीरः पुरा लोकत्रयीगुरुः ।
विपुलाद्रौ सभां दिव्यामध्युवास कदाचन ॥

* * *

तत्रासीनं तमभ्येत्य मगधेन्द्रः कृताञ्जलिः ।
त्रिः परीत्याभिसंपूज्य स्तुत्वा नत्वा च पूरुषम् ॥

*　　*　　*　　*

**Colophon:**

इत्यार्षे भगवदेकसन्धिभट्टारकप्रणीते महाशास्त्रे जिनसंहितासंग्रहे शास्त्रमुखं नाम प्रथमः परिच्छेदः ॥

**End:**

इति परमजिनेन्द्रं पूजयत्युक्तमन्त्रैर्य इह परमभक्त्या पूजितं लोकनाथैः।
विधुतनिखिलबन्धं स स्वरूपं प्रयाता जननमरणदूरं ध्वस्तरोगादिदुःखम् ॥

*　　*　　*　　*

**Colophon:**

इत्यार्षे भगवदेकसन्धिभट्टारकप्रणीते महाशास्त्रे जिनसंहितासंग्रहे मन्त्रविधिर्नाम विंशः परिच्छेदः ॥

---

## R. No. 1367.

Paper. $11\frac{1}{2} \times 8\frac{7}{8}$ inches. Foll. 16. Lines, 27 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. D. V. Prakāśa Rao, B.A., of Cocanada.

Fol. 27*b* is left blank.

### विजयविक्रमव्यायोगः.

### VIJAYAVIKRAMAVYĀYŌGAḤ.

This work represents one of the ten varieties of dramatic composition and is technically known as Vyāyōga. The plot of this drama is the story of the killing of Jayadratha by Arjuna in revenge for the former having been instrumental in killing the latter's son in battle. By Āryasūrya.

Complete.

The original manuscript is said to have been copied by Lakṣmīnārāyaṇa, son of Kandarpa Sītārāma Śāstri, the copying having been completed on Wednesday, the 8th day of the dark fortnight of the Śrāvaṇa month in the year Krōdhi.

**Beginning :**

श्रेयस्तनोतु स महाहवनित्यपुष्ण(ष्ट):
कृष्णाश्रिराय जगतः प्रथितार्तिहारी ।
यः सिन्धुराजमथनं प्रविधाय दर्पा-
ल्लक्ष्मीं प्रसह्य मिषतां द्विषतामवाप ॥

* * * *

अलमतिप्रसङ्गेन । आदिष्टोऽस्मि परिषदा—

अस्ति प्रशस्तगुणशालिनि कुण्डिनानां
गोत्रे पवित्रचरितः कविरार्यसूर्यः ।
यस्य स्खलत्पदवतीमपि सूरयोऽमी
वाचं शिशोरिव रसादुपलालयन्ति ॥

तस्य कृतिर्विजयविक्रमो नाम वीररसप्रायो व्यायोगोऽभिनेतव्य इति ।

* * * *

(ततः प्रविशति युद्धसंनद्धः सकृष्णः ससुहृज्जनोऽर्जुनः ।) रथी— सखे यदुनन्दन.

वीराभिरक्षितममुं जगदेकवीरं हन्तुं जयद्रथमहं विहितप्रतिज्ञः ।
तत्सज्जयाद्य विजयाय रणं प्रयातुं जैत्रं द्विषां मम रथं च मनोरथं च ॥

**End :**

रथी—किमतः परं प्रियमस्ति । तथाप्येतद्भवतु ।

अविहतविभवं कवीश्वराणां स्फुरतु यशश्चिरमिन्दुकुन्दगौरम् ।
हरिहरचरणेषु भक्तियुक्तो भवतु जनो भुवि भुक्तिमुक्तिसिद्धः ॥

(इति निष्क्रान्ताः सर्वे) ॥

**Colophon :**

इति श्रीमदार्यसूर्यकविना विरचितो विजयविक्रमो नाम व्यायोगः ॥

## R. No. 1368.

Paper. 11 × 8½ inches. Foll. 59. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Rājagurukkaḷ of Rāmēśvaram.

### शैवोत्सवविधिः.

### ŚAIVŌTSAVAVIDHIḤ.

Similar to the work described under No. 5533 of the D.C.S. MSS., Vol. XI.

Incomplete.

**Beginning:**

आदौ आचार्य उत्सवात् पूर्वदिवसे क्षौरकर्म समाप्य . . . . . . . . . . . . . . स्नात्वा शुद्धवस्त्रोत्तरीयविभूतिरुद्राक्षं सन्धार्य विधिवत् भस्मधारणं . . . . . . . . . . . . दिकं समाप्य भूतशुद्धिशोषणदाहनप्लावनान्तं त्रिर्मातृकाबहिर्मातृक . . . . . . . . . . . पश्चात् शिवागमोक्तप्रकारेण मन्त्रन्यासादिषडध्वान्यासं

* * * *

अथ प्रार्थयेत्—

स्कन्दाग्रज गणाधीश देव्या वल्लभया सह ।
शिवयागं प्रवृत्तोऽस्मि निर्विघ्नं त्वं प्रसीद मे ॥

एवं संप्रार्थ्य पुण्याहं वाचयित्वा पुष्पाञ्जलिं दत्वा अथ गर्भगृहं प्रविश्य मूललिङ्गस्य गन्धपुष्पधूपदीपनैवेद्यताम्बूलनीराजनं दत्वा प्रार्थयेत् ।

**End:**

तत्तच्छिरःप्रदेशेषु तत्तत्कुम्भं निविन्यसेत् ।
मध्यमे शिवकुम्भं तु उत्तरे वर्धनीं तथा ॥

तन्मध्ये स्कन्दमभ्यर्च्य विद्येशान् परितः क्रमात् ।
पूर्वादीशानपर्यन्तं लोकपालान् घटे न्यसेत् ॥
सद्योजातेन मन्त्रेण आवाहनं प्रकल्पयेत् ।
वामदेवेन संस्था.

---

R. No. **1369.**

Paper. 11 × 8¾ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a paper MS. of M.R.Ry. S. Narasiṁha Rāmānujācārya of Villiyambākkam.

(*a*) उपसर्गद्योतकताविचारः.

UPASARGADYŌTAKATĀVICĀRAḤ.

Foll. 1*a*—3*b*.

A discussion as to the significance and force of Upasargas. The author Paṭṭabhirāma tries to maintain that an Upasarga has no independent force of its own, but that it adds force and significance to the following expression.

Seems complete.

**Beginning:**

उपकुम्भमित्यत्र पूर्वपदार्थप्रधानः समासः । उपपदार्थसमीपस्यैव विशेष्यतया बोधात् । ननु उपशब्दस्य कथं समीपवाचकत्वम्? उपशब्दस्य प्रादिमध्ये पठितत्वेन उपसर्गत्वात् । उपसर्गाणां वाचकताया नैयायिकसिद्धान्तविरुद्धत्वात् । अत्रोच्यते—उपसर्गाः क्रियायोगे इति प्रादीनां क्रियायोग एव उपसर्गसंज्ञाविधानात् नात्रोपसर्गत्वम्; अतो वाचकत्वं सम्भवत्येव ।

**End:**

इत्थं चोपोदे(पाद)योऽपि यथोक्तक्रियायोगवन्तो द्योतका एव न वाचकाः । यथोक्तक्रियायोगशून्यास्तु न वाचका इति ध्येयम् ॥

**Colophon:**

इति पट्टाभिरामविरचित उपसर्गद्यो॰क(ता)विचारस्समाप्तः ॥

(*b*) कर्मधारयविचारः.

KARMADHĀRAYAVICĀRAḤ.

Foll. 3*b*—4*b*.

An investigation of the nature, use, etc., of the Karmadhāraya or epithetic compound : by Paṭṭābhirāma.

Complete.

**Beginning :**

शक्त्या अभेदान्वय्युपस्थापकः कर्मधारय इति वृत्तिः । स्वघटकशक्तिप्रयोज्याभेदान्वयबोधजनकसमासत्वं कर्मधारयत्वमित्यर्थः । तथा च राजपुरुष इत्यत्र राजसम्बन्धी पुरुषः इति वा राज्ञः पुरुष इति वा विग्रहवाक्ये राजसम्बन्धिपुरुषयोरभेदान्वयबोधेऽपि न तादृशस्य कर्मधारयत्वापत्तिः ।

**End :**

प्रयोज्यत्वं च प्रातीतिकस्वरूपसम्बन्धविशेषः । स्वप्रयोज्या या स्वजन्यान्वयबोधप्रयोजकता, तच्छून्यलक्षणासामान्यकत्वे सति समासत्वं कर्मधारयत्वमिति निष्कर्षः इति संक्षेपः ॥

**Colophon :**

इति पट्टाभिरामकृतकर्मधारयविचारः समाप्तः ॥

---

(*c*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 5*a*—32*a*. Fol. 32*b* is left blank.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. S. Gōpālācaryā of Villiyambākkam.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4041 of the D.C.S. MSS., Vol. VIII.

Contains the Sāmānyābhāvāvyavasthāpana only.

R. No. **1370.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 42. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Vādhyār Svāmi of Mannargudi.

श्रीवैष्णवसदाचारसिद्धान्तनिर्णयः.

ŚRĪVAIṢṆAVASADĀCĀRASIDDHĀNTANIRṆAYAḤ.

A treatise containing certain rules of conduct for the guidance of Śrī-Vaiṣṇavas. It is said to have been based upon the works of Rāmānujabhaṭṭārya, Nigamāntaguru and Nārāyaṇaguru, and upon Smṛtiratnākara, Saccaritrasudhānidhi. By Śrīraṅganātha Sannyāsin of the Mutt at Ahōbila and a disciple of Śrīnivāsayati.

Complete.

**Beginning:**

यस्याभवद्भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णम् ।
स्तम्भेऽवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥
श्रीवीरराघवयतीन्द्रपराङ्कुशादिरामानुजार्यकमलानिधियोगिवर्यैः ।
संप्रेक्षितं करुणया परिपूर्णबोधं श्रीरङ्गनाथयतिशेखरमाश्रयामः ॥
लक्ष्मीनृसिंह तव पादसरोजयुग्मे ब्रह्मेन्द्ररुद्रमुनिबृन्दशिरोऽभिवन्द्ये ।
श्रीमच्छठारियतिराजसुपूजिते च शुद्धं मदीयहृदयं दृढमस्तु लग्नम् ॥
श्रीरामानुजसिद्धान्तनिर्धारणधुरंधरः ।
श्रीनिवासयतीन्द्रो मे संनिधत्तां सदा हृदि ॥
श्रीरामानुजभट्टार्यवागीशानां शुभाः कृतीः ।
निगमान्तगुरोः श्रीमन्नारायणगुरोरपि ॥
स्मृतिरत्नाकरं चैव सच्चरित्रसुधानिधिम् ।
संवीक्ष्य तेभ्यः संगृह्य सारानर्थान् सतां मुदे ॥
श्रीरङ्गनाथयमिना प्रमाणपथवर्तिना ।
श्रीवैष्णवसदाचारसिद्धान्तोऽयं निबध्यते ॥

ब्राह्मे मुहूर्ते उत्थाय हरिर्हरिरिति सप्तकृत्व उच्चार्य—

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः ।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥

* * * *

इति गुरुपरम्परानुसंधानपूर्वकं भगवन्तं प्रपद्य भगवच्छास्त्रतदुपबृंहणनित्यगद्यस्तोत्रादिषु विप्रकीर्णोक्तं ध्यानं यथावगमनं समाहृत्यानुतिष्ठेत् ।

**End :**

उक्तेषु धर्मेषु प्रमाणानि निषिद्धानुष्ठाने प्रत्यवायः तत्प्रायश्चित्तानि तेषु प्रमाणानि च रत्नाकरादिषु द्रष्टव्यानि ॥

अहोबिलस्थलाधीशलक्ष्मीनृहरिशासनात् ।
श्रीरङ्गनाथयमिना निर्णयोऽयं निबध्यते ॥
श्रीरामानुजसिद्धान्तनिर्धारणपटीयसे ।
श्रीनिवासयतीन्द्राय नमोऽस्तु गुरवे सदा ॥

**Colophon :**

इति श्रीरङ्गनाथयमिकृतः श्रीवैष्णवसदाचारसिद्धान्तनिर्णयः ॥

---

## R. No. 1371.

Paper. 11 × 8½ inches. Foll. 53. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. M. A. Tiruvēṅkaṭācārya of Dāmal.

सद्विद्याकल्पतरुः.

SADVIDYĀKALPATARUḤ.

This work lays down with authoritative quotations from various Smṛti works, the daily duties of the Prapannas. It is presumably intended for Teṅgalai Śrī-Vaiṣṇavas. By Vādikēsari Ramyajāmātṛmuni, also called A̱lagiyamaṇavāḻa Jīyar of Kāñci (Conjeeveram).

Complete.

**Beginning:**

यत्स्मृतिः सर्वसिद्धीनामन्तरायनिवारिणी ।
तमहं सर्ववेदान्तसारं नारायणं भजे ॥
पुराणसंहितावाक्यैश्शिष्टाचारानुसारतः ।
ग्रथितं स्मृतिवाक्यैश्च प्रपन्नाह्निकमुत्तमम् ॥
श्रीकाञ्चीरम्यजामातृमुनिभिस्तत्त्ववित्तमैः ।
प्रपन्नाचारशिष्टार्थं गृह्यतां तद्बुभुत्सुभिः ॥

शाण्डिल्यस्मृतौ—

निवृत्तं वैदिकं कर्म यत्प्रोक्तं भवभेषजम् ।
इत्युपक्रम्य
महाविस्तररूपोऽयमाचारः पञ्चकालिनाम् ।
संक्षेपात्प्रब्रवीम्यद्य यथाशास्त्रं यथामति ॥

इत्यन्तं तत्स्वरूपमुक्तम्—

* * * *

प्रातः सूर्योदयात्पूर्वं घटिकात्रयमात्रके ।
प्रपन्नः प्राङ्मुखोत्थाय हरिर्हरिरिति ब्रुवन् ॥
प्रक्षाल्य करपादं च गण्डूषाचमने चरेत् ।
समासीनः शुचौ देशे कार्यं गुर्वादिकीर्तनम् ॥

**End:**

ऋतुस्नातां सतीं भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥

अनन्यशरणां भार्यां यौवने यः परित्यजेत् ।
सप्तजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः ॥

**Colophon:**

इति श्रीकाञ्चीवादिकेसरिरम्यजामातृमुनिविरचितः सद्विद्याकल्पतरुनामकः आह्निकग्रन्थः समाप्तः ।

The name of the copyist and the date of transcription are given thus:

श्रीशैलानन्तपुरुषवंशजेन व्यलेख्यदः ।
श्रीरङ्गसूरिणा रम्यजामात्राह्निकमुत्तमम् ॥

शालिवाहनशके १७९५ वर्षे आङ्गिरसनामके वृश्चिकमासे १५ दिवसे विलिख्य परिसमापितोऽयं ग्रन्थः ॥

---

R. No. **1372.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Śrīnivāsapāṭrācārya of Kumbakonam.

**कार्पण्यदर्पणम्.**

KĀRPAṆYADARPAṆAM.

An investigation into the nature of the feature called Kārpaṇya, which is said to be indispensable to Prapatti, and whether this feature should be possessed by a Guru or by his disciple, etc: by (Eḻayavilli) Śaṭhakōpācārya, disciple of Bāladhanvi Vēdāntācārya and Gōpāladēśika.

Complete.

**Beginning:**

गोपालदेशिकं वन्दे सुधीशं करुणानिधिम् ।
निक्षेपविद्या यन्मूर्त्या संधानमगमद्भुवि ॥

अत्यन्ताकिंचनं मामनितरगतिकं दासमावेद्य देवे
श्रीशे श्रीशार्ङ्गपाणौ निरुपधिकृपया मद्भरं स्वं समर्प्य ।
मा भीः कैंकर्यवर्गेष्वधिकुरु समयेष्वित्यमुं योनृ(ऽन्व)गृह्णात्
सोऽयं श्रीबालधन्व्यागममुकुटगुरुः पातु मां धीसमृद्ध्यै ॥

श्रीबालधन्व्यागममौलिसूरेः पदाब्जयुग्मं प्रणिपत्य मूर्ध्ना ।
कार्पण्यवाक्येषु तदुक्तमर्थं तुष्ट्यै सतामद्य लिखामि पत्रे ॥

कार्पण्यवाचो विवरीतुकामः श्रीबालधन्व्यागममौलिसूरिः ।
पात्रीकरिष्यन्कृपयैतमर्थमपाठयन्मां शुकवद्वदान्यः ॥

पुराणवाणीशिखरार्य एष रहस्यवाणीविवृतौ हि शक्तः ।
तद्व्याकृतौ साहसवृत्ति(वर्ति)नो मे दधातु मेधां सि (च) सरस्वतीं च ॥

अत्रानुकूल्यसंकल्पप्रतिकूल्यवर्जनकार्पण्यमहाविश्वासगोप्तृत्ववरणरूपावश्यकर्तव्याङ्गपञ्चकसहितं स्वरूपफलसमर्पणगर्भं भरसमर्पणमिति भगवच्छास्त्रादिषु तत्र तत्र प्रतिपादितमिति श्रीमद्वेदान्तदेशिकदिव्यसूक्तिषु श्रीमद्रहस्यत्रयसारादिषु निष्कृष्टं वर्तत इति श्रीमत्साक्षात्स्वामिभिः श्रीमद्गोपालदेशिकैश्चास्मदाचार्यैः न्यासविद्यादर्पणसारास्वादिनीनिक्षेपचिन्तामणिप्रभृतिषु श्रीसूक्तिषु बहुशोऽनुगृहीतम् । सैव प्रपत्तिः । सा च स्वनिष्ठा उक्तिनिष्ठा आचार्यनिष्ठेति त्रिधेति च प्रत्यपादि । तत्र चतुर्ष्वङ्गेषु न विवादः । कार्पण्यरूपाङ्गमात्रे शोधनीयं किंचिदस्ति । कार्पण्यस्वरूपं तु परिकरविभागाधिकारोक्तरीत्या निक्षेपचिन्तामणावस्मदाचार्यपादैः सम्यङ् निदर्शितम् ॥

**End:**

तस्मात्पुत्रशिष्यादीन् प्रति आचार्यनिष्ठाया मोक्षार्थप्रपत्त्यनुष्ठानकालेऽङ्गानुष्ठानकाले पुत्रशिष्यादिगताकिञ्चन्यादिनिवेदनात्मकमेव कार्पण्यरूपाङ्गमनुष्ठेयमिति सिद्धमिति वर्णयामासुः ॥

श्रीबालधन्विनिगमान्तगुरूक्तिदार्ढ्या-
द्वेदान्तदेशिकमुखोक्तनिबन्धनानाम् ।
वाक्यैर्मया न्यसनमुख्यशरीरभूत-
कार्पण्यमद्य विवृतं भुवि सन्मुदेऽत्र ॥

इत्थं प्रमाणयुक्तिभ्यां शोधितं शठवैरिणा ।
कार्पण्यदर्पणं भाव्यं भुवि निक्षेपदर्शने ॥

श्रीबालधन्विवेदान्तगुरुर्गोपालदेशिकः ।
संतुष्येतां मदुक्त्याद्य शुकोक्त्येव नराधिपः ॥

जीयाच्छ्रीबालधन्व्यागममुकुटगुरुर्देशिकेन्द्रो दयालु-
र्जीयाद्गोपालसूरिर्बुधजनसदसां दत्तनिक्षेपविद्यः ।
जीयाद्वेदान्तरामानुजमुनिरनघज्ञानवैराग्यपूर्णो
जीयादाकल्पमस्मत्कुलगुरुरिह चामुत्र वेदान्तसूरिः ॥

* * * *

**Colophon:**

श्रीशठकोपाचार्यविरचितं कार्पण्यदर्पणं समाप्तिमगमत् ॥

---

R. No. **1373.**

Paper. $11\frac{3}{8} \times 8\frac{3}{4}$ inches. Foll. 81. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Śivasubrahmaṇya Śāstri, Indian Institute, Bangalore.

भाट्टदीपिकाव्याख्या—प्रभावली.

BHĀṬṬADĪPIKĀVYĀKHYĀ : PRABHĀVALĪ.

By Śambhubhaṭṭa. Same work as that described under R. No. 859 *ante*

Contains the eleventh Adhyāya complete.

**Beginning:**

अथ श्रीशम्भुभट्टविरचितायां भाट्टदीपिकाव्याख्यायां प्रभावल्याभिख्यायामेकादशाध्यायस्य प्रथमः पादः प्रारभ्यते—

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥
यो वेदशास्त्रार्णवपारदृश्वा यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्तः तं बालकृष्णं पितरं नमामि ॥
श्रीखण्डदेवं प्रणिपत्य सद्गुरुं मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ प्रभावलीटिप्पणमातनोम्यहम् ॥
शिष्येणात्र गुरोः कृतावपि मया व्युद्भाव्यते काचना-
सम्भूतिस्तदपि प्रचारचतुरे नैषा पुरोभागिता ।
किं तु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादराः
मद्वाक्यं परिहृत्य तत्कृतिमलङ्कुर्वन्त्विवयं मे मतिः ॥

प्रयोजनाभिसम्बन्धात्पृथक् सतां ततस्स्यात् ऐककर्म्यमेकशब्दाभिसंयोगात् । अत्र वार्त्तिककृता दशमे बाधाभ्युच्चयलक्षणं वृत्तमिति भाष्योक्तौ अभ्युच्चयस्य शास्त्रार्थत्वाभावेन अध्यायार्थत्वानुपपत्तिं बाधाभावस्यैव अभ्युच्चयत्वात् निरूपणीयत्वसम्भवेन ।

**End:**

तन्त्वन्यायाप्रवृत्तौ अर्थसिद्धाया एव आवृत्तेरिह अपवादत्वेनानिरूपणात् नाध्यायार्थत्वमिति अभिप्रेत्य निरूपितमध्यायार्थमुपसंहरति—तदेवमिति ॥

**Colophon:**

इति श्रीपूर्वोत्तरमीमांसापारावारीर(ण)धुरीणश्रीखण्डदेवान्तेवासिकविमण्डनश्रीशम्भुभट्टविरचितायां भाट्टदीपिकाव्याख्यायां प्रभावल्यभिख्यायामेकादशस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ॥

## R. No. 1374.

Paper. 11 × 8⅞ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākkam.

### आशौचसामान्यनिरुक्तिः.

### ĀŚAUCASĀMĀNYANIRUKTIḤ

An investigation into what constitutes Āśauca (pollution) consequent on the birth or death of a relation: by Vēṅkaṭavīrarāghavācārya.

Complete.

**Beginning:**

जननाद्यन्यतरजन्यत्वे सति स्वज्ञानाधीनकर्मानुष्ठाननिवर्त्यत्वे सति अतिशयत्वमित्याशौचसामान्यलक्षणम् । प्रथमसत्यन्तमात्रोक्तौ दुःखविषादयोरतिव्याप्तिः । अतः द्वितीयसत्यन्तम् । तावन्मात्रोक्तौ स्वज्ञानाधीनप्रायश्चित्तापनोद्यपापान्तरस्यापि प्रायश्चित्तद्वारा स्वज्ञाननिवर्त्यत्वात् कलञ्जभक्षणादिजन्यपापान्तरे अतिव्याप्तिः । अतः प्रथमसत्यन्तम् ।

**End:**

आशौचसंपातस्य ज्ञानरूपताया महता संरम्भेण धर्माब्धिसारकृता सिद्धान्तितत्वात् ज्ञातमेवाशौचसामान्यं जपस्वाध्यायादिपर्युदासकं न तु स्वरूपसदिति युक्तः पन्थाः ॥

इत्थमाशौचसामान्यनिरुक्तिर्बुधसंमता ।
व्याकृता वेङ्कटोदश्चद्वीरराघवधीमता ॥

**Colophon:**

इति वेङ्कटवीरराघवाचार्यस्य कृतिषु आशौचसामान्यनिरुक्तिः समाप्ता ॥

R. No. **1375.**

Paper. 11×8¾ inches. Foll. 79. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from the palm-leaf MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācārya of Villiyambākkam.

## वादकुतूहलम्.

## VĀDAKUTŪHALAM.

This work embodies the controversy that took place in the court of King Mallikārjunapati or Mallarāja between Svāmi Śāstri and Bhāskararāya regarding the meaning of certain expressions, such as Paśu, Sōma, etc., occurring in Vedic texts constituting scriptural commandments.

Incomplete.

**Beginning:**

प्रह्लादाभीष्टदाने विबुधसमुदयस्तूयमानापदाने
शेषक्षोणीभृदन्तःप्रबिलगतपदाहोबिलक्षेत्रगर्भात् ।
प्रादुर्भूते हिरण्यद्विरदमतिमदस्वान्ततन्त्वं निहन्तुं
धीरे सच्छास्त्रयोनौ मम भुवनगुरावस्तु भक्तिर्नृसिंहे ॥

कल्पक्षोणिरुहाश्च कल्पलतिकाश्चिन्तामणिः कामधुक्
सर्वे संमिलिता यदीयकलनां नैवाधिरोढुं क्षमाः ।
ते यातास्तत एव लाघववशान्मौस्सं(दूर्ध्वं)दिवं गौरवात्
एष क्षोणिपतिस्ततो भुवमिति स्पष्टे घ(ध)टे धीमताम् ॥

मल्लिकार्जुनमहीमहेश्वरो दानवारिनिवहोल्लसत्करः ।
सार्वभौम इति कुम्भितामगात् कुम्भिनी कथमियं भवेन्न भूः ॥

मल्लक्षोणिभुजो मितिं च समितिं तस्यामसङ्ख्यावतः
सङ्ख्यावान्निवहान् वनीपकगुणान् वीक्ष्यावनीपानपि ।

राज्यं वश्यमवश्यमप्रातितरां रुद्धान् विरुद्धान्नृपान्
आलोलोक्य च सस्मिता अभिजनास्सर्वे भृशं विस्मिताः ॥

विद्वद्वल्लभमल्लिकार्जुनमहीपालं तदीयामलं-
कुर्वाणं समितिं निजं गुरुसुतं द्रष्टुं चिरादागते ।
श्रीमद्भास्कररायनामनि बुधे राज्ञा सुविज्ञापिते
कुर्वाते कुतुकेन कामपि कथां तौ स्पर्धमानाविव ॥

श्रीनृसिंहगुरुणा . . . स्वामिशास्त्रिबुधभास्कररायौ ।
यां कथां रचयतः कृतिनस्तां दोषदृष्टिविधुराः कलयन्तु ॥
मिथः प्रसङ्गरूपत्वात् प्रसङ्गानुप्रसङ्गतः ।
अत्र प्रदर्शयिष्यावः स्वस्वोपस्थितिकल्पनाः ॥

आप्राचः कामरूपा द्रुहिणसुतनदप्लावितादाप्रतीचो
गात्वाराक्षिन्धुसान्द्राद्रघुवरचरितादा च सेतोरवाचः । (?)
आकेदारादुदीचस्तुहिनगहनतः सान्ति विद्वत्समाजाः
ये ये तानेष यत्नस्सुखयतु समजं कश्चमत्कर्तुमीष्टे ॥

तत्रेयं मध्यस्थैः प्रदर्शिता विप्रतिपत्तिः—

पशुना यजेत सोमेन यजेतेत्यादिके विशिष्टविधौ पशुसोमादिपदानां मत्वर्थे लक्षणास्ति न वेति । अत्र विधिकोटिः शास्त्रिणां निषेधकोटिस्तु रायाणाम् । तत्रायं समयबन्धः—तत्र सिद्धान्तवादिनैषा साध्या मत्वर्थ-लक्षणा उपपदे प्रतिवादिना तु धर्माद्यविरोधेनैव सा दूष्या । एवं बद्धे समये वादिनोऽयं पत्रिकामुखेनोपन्यासः ।

**End :**

एवञ्च प्रकृतेऽपि कारणत्वघटितसम्बन्धेन सोमवत्यामेव भावनायां तेन सम्बन्धेन सोमप्रकारकप्रथमबोधस्य भूमत्वाभावेन विधिवाक्यस्य प्रामाण्योपपत्तेः प्रथमबुद्धसोमकरणकत्वनिवार्हकद्वैतीयीकबोधस्य न शाब्द-

त्वम् । अत एव वामेण बाणेन ममार वाली, हस्तेन कुठारेण दारुं छिनत्ति.

---

R. No. **1376.**

Paper. 11⅛ × 8½ inches. Foll. 81. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–1915 from the palm-leaf MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācārya of Villiyambākkam.

**विधिरत्नावली.**

VIDHIRATNĀVALĪ.

An unfavourable criticism of the Vidhidarpaṇa of Kollūr Nārāyaṇa Śāstri by means of certain reasonings and arguments explained by Appayadīkṣita in his work entitled Vidhirasāyana. By Śrīnivāsadāsa, son of Nṛsiṁhārya and disciple of his paternal uncle Vādhūla Lakṣmaṇārya of Tirumaḻiśai village.

Incomplete.

**Beginning:**

यस्याभूद्भुवने जगज्जनिभुवस्स्तम्भस्स्वयं जन्मभूः
यस्यासीन्नरसिंहयोरघटितं रूपं वपुस्तादृशम् ।
यस्यासन्नखराणि तस्य विजये शस्त्राणि रक्षोविभोः
तं देवं मदभीष्टदैवतमहं वन्दे सदाभीष्टदम् ॥
सूक्तिर्यस्य कथाजयोत्सुकजुषां वादाङ्गणान्तर्जुषां
वादारम्भजुषां विचारकलनावाचालभावं जुषाम् ।
दुर्वादिद्विपदुष्टचेष्टितदुरुत्पाटोद्भटानां त्रयी-
सिद्धान्तार्थविशेषसिद्धिविदुषां सिद्धद्रुशाखायते ॥
अस्मदार्यसुधाधामा लक्ष्मणार्यगुरूत्तमः ।
कल्याणगुणभूमासौ कारुण्यं मयि कल्पताम् ॥
विधिरसायनविस्तृतयुक्तिभिः विविधतर्कविकर्कशवर्त्मभिः ।
त्रिविधलक्षणलक्ष्यविधास्वसौ वितनुते विधिदर्पणदूषणम् ॥

विधिरत्नावली सेयं विबुधानन्ददायिनी ।
सुखोपजीविनीकण्ठे भासतां भावुकार्पिता ॥
भूसारपुरवाधूलवंशवारिधिसम्भवः ।
श्रीनिवासोऽधुनानन्दं कर्तुमारभते सताम् ॥

इह किल भगवान् परमकारुणिको जैमिनिः सुगतमुखकुमतिकृत-कुकृतिशतदोषदूषितानखिलानपि वेदान् व्याचिकीर्षुः तदर्थविचारात्मकं कर्ममीमांसाख्यं शास्त्रमवतारयामास ।

* * * *

**Colophon:**

इति श्रीभूसारपुरवास्तव्यवाधूलकुलतिलकश्रीलक्ष्मणार्यगुरुचरणनलि-नसमधिगतसकलविद्याविशारदस्य तदनन्यदैवतस्य तल्लब्धात्मतत्त्वयाथा-त्म्यस्य तदनुजश्रीनृसिंहार्यसूर्य(रि)सूनोः श्रीनिवासदासस्य कृतौ विधि-रत्नावल्यामुदाहरणनिरासः संपूर्णः ॥

**End:**

श्रुतेर्लिङ्गप्राप्तानुवादत्वमेवाभ्युपगतं न परिसंख्याविधित्वमिति गर्द-भरशनाग्रहणे लिङ्गप्राप्तमन्त्रसम्बन्धनिवृत्तये स्वार्थत्यागादिकमवश्याश्रय-णीयम् ॥

**Colophon:**

इति विधिरत्नावल्यां त्रैदोष्यव्यवस्थाभङ्गः ॥

व्रीहीन् प्रोक्षति व्रीहीनवहन्तीत्यादिसंस्कारविधिषु व्रीह्यनाशादिपदा-नामपूर्वीयव्रीह्यादिषु लक्षणा कल्पनीया लौकिकेषु व्रीह्यादिषु संस्कार-विध्यानर्थक्यात् । तथा चापूर्वीयत्वं यवादिसाधारणमिति संस्काराणां यवादि-साधारण्यसिद्धिरिति मीमांसकसरणिः ।

* * * *

मन्त्राणां दृष्टादृष्टद्वारविशेषौदासीन्येन लिङ्गविनियोगात्पूर्वं प्रकरणाद-पूर्वार्थत्वसिद्धिवद्गुणप्रधान.

R. No. **1377.**

Paper. 11⅛ × 8½ inches. Foll. 148. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from the MS. of M.R.Ry. A. M. Śrīnivāsācārya of Agaram, a village in the Chingleput district.

## लक्ष्मीकाव्यम्.

## LAKṢMĪKĀVYAM.

A poem in eighteen Sargas dealing with the celebration of the marriage of Lakṣmī who was born as the daughter of a Cōla king and God Raṅganātha worshipped in the temple at Srirangam. A festival is celebrated even to this day in commemoration of this marriage in the month of Phālguna in the Sriraṅgam temple and a history and description of that festival are given herein. The names of the Śrī-Vaiṣṇava teachers who lived in Srirangam are given in the introductory portion of this work. By Uttamarāya Tirumalādhīśa, son of Cakrarāya and Lakṣmī. It is stated that Cakrarāya had two brothers, Uttamarāya and Timmaṇārya, the latter of whom became a Sannyāsin, and that he had two other sons, viz., Cakrarāya and Kṛṣṇarāya.

Wants the beginning in the first Sarga.

**Beginning:**

भूषाभुजङ्गेश्वरभुक्तशेषपक्षानिलाधूतकुलाद्रिमाला ।
रङ्गेशयाग्रेसरवैजयन्ती पुष्णातु भूतीर्मम वैनतेयः ॥

* * * *

मनोज्ञगीतामकरन्दपूर्णं सपादलक्षोज्ज्वलपद्यपत्रम् ।
चक्रे महाभारतपुण्डरीकं यस्तं मुनिं चन्द्रसरस्स्थमीडे ॥

मोक्षैकसङ्ख्याङ्गुलिमुद्रयैव मोहान्धकारं नमतां जनानाम् ।
मुष्णाति यश्चन्द्रिकयैव चन्द्रः पराङ्कुशो रङ्गनिधिस्स जीयात् ॥

मोषैः कृतैर्येन तथा प्रहृष्टो देवस्तथा सालमहानसाद्यैः ।
स्तोत्रैश्च नं प्रीतिमुपैति रङ्गी तमाश्रयाम्यादिचतुष्कवीन्द्रान् ॥

यस्योपदेशो यतिधूर्वहस्य प्रपत्तिभाजां प्रशमैकहेतुः ।
रङ्गेशपादाम्बुजभृङ्गराजो रामानुजार्यो रमतां स चित्ते ॥

रङ्गेशकैङ्कर्यकलाकलापपर्यायसेनाधिपतिप्रकाशः ।
जयत्वनन्तप्रतिमानधामा रामानुजार्यो विनतार्तिहारी ॥

* * * *

अस्ति त्रिलोकीप्रथिता मनोज्ञा विस्तीर्णवीथीविपुलापणश्रीः ।
रङ्गाभिधाना नगरी विभूत्या जितामराधीश्वरराजधानी ॥

* * * *

अनन्तशाखार्थरहस्यगर्भैरप्राकृतैर्द्राविडसूक्तिबन्धैः ।
प्रदृष्टवैकुण्ठपदो जनानां पराङ्कुशो यत्र विभाति योगी ॥

अपि प्रसिद्धावरणादिकृत्तेरपि प्रशस्तस्तुतिसंप्रयोगात् ।
मोषैः परं मोदितरङ्गिचेता जागर्ति यत्रादिचतुष्कवीन्द्रः ॥

रामानुजाख्यो यतिसार्वभौमः शेषावतारो जगदेकवन्द्यः ।
प्रकाशयन्नात्मविवेकमुद्रामास्ते सदा यत्र पवित्रकीर्तिः ॥

श्रीरङ्गनारायणनामधेयो यतीश्वरो यत्र जयत्युदारः ।
अशेषवन्द्यो विशदान्तरात्मा मुकुन्दमूर्तेरपरावतारः ॥

पुत्रीकृतो रङ्गधुरन्धरेण पराशरः कूरकुलाधिनाथः ।
गोविन्दशिष्यः स तु यामुनार्यमनोरथं पूरितवान् द्वितीयम् ॥

पुत्रत्वमाप्तः पुरुषोत्तमस्य सुदर्शनस्थापनदीक्षितात्मा ।
श्रीव्यासभट्टः प्रथितानुभावो यस्यां विजेता वचसा चकास्ति ॥

विशुद्धविज्ञानगुणेन पूर्णः पूर्णाभिधानः पुरुषोत्तमश्रीः ।
रामानुजाचार्यगुरुर्गरीयान् यस्यां निवासं कलयत्यजस्रम् ॥

आचार्यकं वेदशिरोरहस्ये तन्वन् पुनर्द्राविडवेदतत्त्वे ।
श्रीसौम्यजामातृमुनिर्हि यस्यामद्यापि जागर्ति यशःशरीरः ॥

वाग्वैखरीखण्डितवादिलोको वाधूलवंशार्णवपूर्णचन्द्रः ।
जागर्ति यस्यां वरदार्यसूनुः श्रीवेङ्कटेशो गुरुरागमानाम् ॥

गोविन्दराजान्वयजो मनीषी पराङ्कुशो यामुनवैमनस्यम् ।
अपाचकार प्रसभं तृतीयं विराजते वृत्तमणिप्रदीपः ॥
श्रीवेङ्कटेशार्पिततातनामा धीराग्रगण्यस्तिरुनम्बिवंश्यः ।
गोत्रे पवित्रे शठमर्षणीये जातः समिन्धे तिरुवेङ्कटार्यः ॥
श्रीरङ्गधाम्ना जगदेकधाम्ना वेदान्तविद्याकृतपट्टबन्धः ।
विश्वप्रतीतप्रतिवादिविद्वद्भयंकरो यत्र विभाति विद्वान् ॥
यत्र प्रपत्त्याभरणाभिरामो रामानुजाचार्य इति प्रतीतः ।
आभाति रामानुजदर्शनाब्धिप्रालेयभानुः प्रथितानुभावः ॥
आसेतुकेता(दा)रमशेषविष्णुस्थानानि येनाखिलवन्दितानि ।
उन्मीलितानि द्रविणैरुदग्रैः रामानुजार्यः स विभाति यस्याम् ॥
द्विजन्मनां यत्र सहागतानां रङ्गेश्वरेणोत्तमराय एषः ।
दीप्तोदयानां दिवि तारकाणां राकाचकोरप्रणयीव भाति ॥
द्विजोत्तमो यत्र चकास्ति साक्षात्तार्क्ष्योपमः काश्यपवंशदीपः ।
सत्पक्षपात्युत्तमरायनामा रङ्गेश्वराज्ञाधुरि वर्तमानः ॥
उदारधीरुत्तमराय एष संप्राप्तलोकोत्तमराजचिह्नः ।
रङ्गेशवंशक्रममूलभृत्यो यां शास्ति वैकुण्ठपुरादनूनाम् ॥
जीर्णां त्वचं सर्प इवालकेशसंपत्समां संपदमाशु मुक्त्वा ।
यस्यानुजो यत्र च तिम्मणार्यः प्राप्तो यतित्वं भजते मुकुन्दम् ॥
तस्याग्रजः स्थापितभूसुरेन्द्रवृन्दोऽनिशं यत्र विभाति धीमान् ।
मृष्टान्नदाता भुवि चक्ररायो हृष्टो मुकुन्दाङ्घ्रियुगप्रपत्त्या ॥
तस्यात्मजाश्चोत्तमचक्रराय श्रीकृष्णरायाः प्रथिताः पृथिव्याम् ।
यां पालयन्तो विलसन्ति राजन् सौवर्णमश्वादिनरेन्द्रचिह्नाः ॥

*   *   *   *

शय्यापन्नगमण्डलेश्वरफणासंदोहरत्नोल्लस-
द्भासा सागरसार्वभौमतनयावक्षोजकुम्भस्थलीम् ।
कुर्वन् कुङ्कुमपाङ्किलामनुकलं ब्रह्माण्डकोटीश्वरो
जागर्त्यण्डजचक्रवर्तिरथवान् श्रीरङ्गराजो हरिः ॥

**Colophon:**

देवो यस्य भुजङ्गभोगशयनः श्रीरङ्गराजो हरि-
स्तातः काश्यपचक्ररायविबुधो लक्ष्मीर्जनन्युत्तमा ।
तस्यैवोत्तमरायसत्तिरुमलाधीशप्रबन्धुः कृतौ
लक्ष्मीकाव्य उदारवैभवनिधौ सर्गोऽयमादिर्गतः ॥

* * * *

ततो जगन्मङ्गलहेतवे हरे शुभे दिने मासि च फाल्गुनेऽधुना ।
त्वया ध्वजारोहणपूर्वमुत्सवः प्रवर्ध्यतां वर्धितवाद्यनिस्वनः ॥

**End:**

एवं सप्तसु वासरेषु विहृतिं कृत्वा भुजङ्गोत्तमे
पर्यङ्के कमलामहीकुचतटीकाश्मीरपङ्काङ्कितः ।
आसीनो रसिकाग्रणीः स भगवान् सर्वान् सदा नन्दयन्
आनन्दस्य महोत्तरस्य नितरां कोटिं परामश्नुते ॥

**Colophon:**

देवो यस्य भुजङ्गभोगशयनः श्रीरङ्गराजो हरि-
स्तातः काश्यपचक्ररायविबुधो लक्ष्मीर्जनन्युत्तमा ।
तस्यैवोत्तमनम्बिसत्तिरुमलाधीशप्रबन्धुः कृतौ
लक्ष्मीकाव्य उदारवैभवनिधौ सर्गो गतोऽष्टादशः ॥

---

R. No. **1378.**

Palm-leaf. 10⅝ × 9¼ inches. Foll. 70. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Kumārasvāmi Śāstri of Pedakallapalli.

महाविद्योद्धारः.

MAHĀVIDYŌDDHĀRAḤ.

A treatise describing the Nyāsa, Japā, Pūjā and Hōma, etc., in connection with the Vanadurgā-Mahāvidyāmantra. The work is also called Kalpakaustubha.

Almost complete; as found in the Siddhāgamatantra forming part of the Rudrayāmala.

**Beginning:**

सर्वेश्वरीं जगद्धात्रीं जगदम्बां परापराम् ।
नमाम्यहं महादेवीं महात्रिपुरसुन्दरीम् ॥
सर्वकामप्रदातारं भक्तानां . . . . . ।
. . . . . त्तरहितं वटुकं प्रणमाम्यहम् ॥

* * * *

पार्वती—

भगवन्दक्षिणामूर्ते सर्वज्ञ करुणानिधे ।
वनदुर्गामहाविद्यामन्त्रस्याभीष्टदायिनः ॥
माहात्म्यं कामदं नृणां यदि तेऽस्ति कृपा मयि ।

* * * *

एवं कृत्वा च दिग्बन्धमैन्द्रादीन्व(र्व)न्दयेद्दिशः ।
निगमैरागमैर्मन्त्रैः रुद्रबन्धनपूर्वकम् ॥

**Colophon:**

इति श्रीरुद्रयामले सिद्धागमतन्त्रे महाविद्योद्धारे चतुरशीतितमः पटलः ॥

**End:**

एवंविधां महाविद्यां शिष्यायोपदिशेद्गुरुः ।
गुरुभक्ताय कान्ताय दान्ताय च कुटुम्बिने ॥

* * * *

अनन्तरदिने चैकविंशद्वारं जपेत्सुधीः ।
ब्रह्मचारी हवि.

---

## R. No. 1379.

Paper. $11\frac{1}{4} \times 8\frac{3}{4}$ inches. Foll. 7. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. S. Gōpālācārya of Villiyambākkam.

### लकारार्थमञ्जरी.
### LAKĀRĀRTHAMAÑJARĪ.

A short treatise discussing the significance of the various tenses and moods in Sanskrit: by Siddhānta Vāgiśa, probably the same as Bhavānandasiddhānta Vāgīśa.

Complete.

**Beginning:**

पचति पक्ष्यति अपाक्षीत् इत्यादौ वर्तमानत्वादिना प्रतीतेः वर्तमानत्वे लट्त्वादिना, वर्तमानप्रागभावप्रतियोगित्वरूपे भविष्यत्त्वे लृट्त्वादिना, वर्तमानध्वंसप्रतियोगित्वरूपातीतत्वे लुङ्त्वादिना शक्तिः; न त्वाख्यातत्वेन, सर्वत्र प्रत्ययापत्तेः । ननु वर्तमानत्वं न कालसम्बन्धित्वम्, अतीतादावतिप्रसङ्गात् ।

**End:**

एवंच निरुक्ताया आज्ञादिसाधारणत्वात् विजातीयेच्छैव पूर्वत्रेव याच्ञापदार्थः । एवमाज्ञानुज्ञादिरपि विजातीयेच्छैव । समिधमाहरेत्यादौ यदाज्ञाविषयसमित्कर्मकाहरणानुकूलकृतिमानित्यन्वयबोध इत्यलम् ॥

**Colophon:**

इति सिद्धान्तवागीशविरचिता लकारार्थमञ्जरी समाप्ता ॥

---

## R. No. 1380.

Paper. $11\frac{1}{4} \times 8\frac{7}{8}$ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Similar to the work described under No. 2808 of the D.C.S. MSS., Vol. V.

Incomplete

**Beginning:**

श्रोत्रियं सुभगं गां च ह्यग्निमग्निचितं तथा ।
प्रातरुत्थाय यः पश्येत् पापेभ्यः स प्रमुच्यते ॥
पापिष्ठं दुर्भगं मत्स्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत् तत्कलेरुपलक्षणम् ॥
नग्नपदं बाह्यव्यतिरिक्तविषयम् । अथ बहिर्विहारः ।

तत्र व्यासः—

नक्षत्रज्योतिरारभ्य त्वा सूर्योदयदर्शनात् ।
प्रातस्सन्ध्येति तां प्राहुः श्रि(श्रु)तयो मुनिसत्तमाः ॥

**End:**

तुलसीकाष्ठसम्भूतां स्कन्धे मालां बिभर्ति यः ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥ इति ।

गौतमः—

अनेन विधिना नित्यं जपं कुर्यात् प्रयत्नतः ।
प्रपन्नो विपुलान् भोगान् भुङ्क्ते मुक्तिं च विन्दति ॥ इति ।

---

R. No **1381.**

Paper. 11 × 8½ inches. Foll. 323. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Tiru. Śrīnivāsavarada Tātācārya of Villiyambākkam, a village in the Chingleput district.

ब्रह्मसूत्रभाष्यव्याख्या—-लघुभावप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: LAGHUBHĀVA-PRAKĀŚIKĀ.

A brief commentary on the Śrībhāṣya of Bhagavad Rāmānujācārya, which work has been described under No. 4943 of the D.C.S. MSS., Vol. X: by a disciple of Śrīnivāsa Tātārya. Reference is made herein to the Śrutaprakāśikā of Sudarśanasūri.

Contains the Catussūtrī Prakaraṇa only.

**Beginning:**

वन्दे वाञ्छितलाभाय कुन्देन्दुधवलस्मितम् ।
मन्देतरघनप्रख्यं तं देवममराधिपम् ॥
. . . . . . . . . निरस्तनिखिलाहितः ।
तं श्रीनिवासतातार्यगुरुवर्यमहं भजे ॥
सङ्गृह्य लिख्यते सेयं लघुभावप्रकाशिका ।

इह खलु भगवान् रामानुजमुनिः सकलजनानुग्रहाय बोधायनादिपूर्वाचार्यमत . . . . . . . . . . . . . शास्त्रं व्याचिख्यासुस्तदर्थतत्त्वनिर्णयस्य भक्त्या त्वनन्यया शक्य इति प्रमाणवशेन भगवद्भक्तिसाध्यत्वं मन्यमानः प्रारिप्सितभाष्यग्रन्थस्याविघ्नपरिपूर्त्यै . . . . . . . . . भक्तिप्रार्थनारूपं मङ्गलमाचरति—अखिलेत्यादिना। अत्र शिष्यबुद्धिसमाधानार्थं शास्त्रार्थसंक्षेपश्चार्थतः कृतो भवति । अखिलभुवनजन्मस्थेमभङ्गेति प्रथमाध्यायार्थः संक्षिप्तः । लीलेत्यनेन लोकवत्तु लीलाकैवल्यमिति द्वितीयाध्यायार्थः संक्षिप्तः ।

**End:**

यत्सम्बन्धि सुखं दुःखनिवृत्तिश्च पुरुषार्थः स खल्वहमर्थः । अहं निर्दुःखः सुखी स्यामिति हि प्रतीतिः । तस्य पुरुषार्थवतो नाशः कथं पुरुषार्थः पुरुषार्थान्तरं वा कथमर्थयितुस्तस्याभावे पुरुषार्थो भवेदित्यादि बहुतरं प्रपञ्चितं श्रुतप्रकाशिकायां तत्रैव द्रष्टव्यम् ॥

**Colophon :**

इति लघुभावप्रकाशिकायां श्रीमद्भाष्यव्याख्यायां चतुस्सूत्री ॥

R. No. **1382.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 241. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. M. Rāmakṛṣṇakavi of Vanaparti.

**तत्त्वंपदार्थविवेकः.**

TATTVAMPADĀRTHAVIVĒKAḤ.

Similar to the work described under R. No. 193(*h*) *ante.* By Pūrṇānandasarasvatī, a disciple of Purusōttamānandasarasvatī, who was himself the disciple of Advaitānanda.

The author discusses in this work the meaning of the words 'Tat' and 'Tvam' contained in the Śruti 'Tattvamasi.' with special reference to certain passages contained in Madhusūdanasarasvatī's Siddhāntabindu relating to the eighth verse of Daśaślōkī.

Complete.

**Beginning :**

ईशानविष्णुशब्दाद्यैर्यद्वाच्यं रामनामकम् ।
कारुण्यपूर्णनयनं कामरूपं भजाम्यहम् ॥

नमः श्रीज्ञानमुद्राय वटमूलनिवासिने ।
अज्ञानध्वान्तनाशाय गुरवे मुनये सदा ॥

सिद्धान्तबिन्दोर्व्याख्यानं ब्रह्मानन्देन भिक्षुणा ।
कृतमप्येकदेशस्य तात्पर्यं वर्ण्यतेऽधुना ॥

अथ 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः' इत्यादिश्रुत्यनुसारेण ज्ञानतज्जन्यान्तःकरणोपाधिकतया एकस्यैव चैतन्यस्य जीवेश्वरविभागसंभवेऽप्यज्ञानोपाधिकचित्स्वरूपेश्वरपदशक्यतावच्छेदकस्य विभिन्नधर्मिवाचकपदशक्यतावच्छेदकत्वाभावेन न तस्य शिवेशानादिपदवाच्यत्वम् । न वा विष्ण्वादिपदवाच्यता, तेषां तत्र केवलयोगवृत्त्यैव प्रयोगसंभवादित्याशङ्कानिराकरणायेश्वरोपाधिभूताज्ञानस्यैकरूपत्वेऽपि मैत्रायणीय-

श्रुत्यनुसारेण स्वगतसत्त्वादिगुणविशिष्टत्वेन भेदमुपेत्य तदुपाधिकतयैकस्यैव नानाशब्दवाच्यत्वं दर्शयति—तत्र ईश्वरोऽपि त्रिविधः स्वोपाधिभूताविद्यागुणभेदेन ब्रह्मविष्णुमहेश्वरभेदादिति । त्रिविधः त्रिप्रकारः ; त्रयः प्रकारा धर्मा यस्येति व्युत्पत्त्या धर्मत्रयविशिष्ट इति यावत् ।

**End :**

तत्तत्पुरुषीयतत्तज्ज्ञानतत्तदज्ञानाभावकूटविशिष्टचरममुक्तपुरुषीयचरमतत्त्वसाक्षात्कारस्यैव तत्तदधीनतत्पुरुषीयाज्ञानोभयनाशकत्वोपगमेन तदानीं सद्वितीयत्वापादनासंभवात् । अभावस्याधिकरणस्वरूपतया न तेन सद्वितीयापत्तिरिति शिवम् ॥

यं प्राहुर्निखिलागमाः प्रतिदिनं ध्यायन्ति यं योगिनो
यं ज्ञात्वैव पराशरप्रभृतयः संसारपाथोनिधिम् ।
तीर्त्वा मुक्तिमुपागताः श्रुतिमतीं निर्दुःखरूपां शुभां
तं भूमानमुपास्महे रघुवरं चिन्मुद्रयालंकृतम् ॥

* * * *

यः पौलस्त्यकुलान्तकोऽपि सततं हर्यादिसंरक्षणे
दक्षः स्वल्पफलाशनोऽप्यनुपमं स्वीयं पदं स्वेच्छया ।
दत्तं येन समस्तपुण्यनिचयैः प्राप्यं शबर्यै पुन-
स्तं भूमानमुपास्महे रघुवरं चिन्मुद्रयालंकृतम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतन्त्रस्वतन्त्रश्रीम(द)द्वैतानन्दपादपूज्यशिष्यपुरुषोत्तमानन्दसरस्वतीशिष्यपूर्णानन्दसरस्वतीकृततत्त्वंपदार्थविवेके त्वंपदार्थनिरूपणम् ॥

किंचिदत्र विरुद्धं चेदुक्तं दैववशान्मया ।
शान्तेः पुरुषधर्मत्वात् तत्क्षन्तव्यं मनीषिभिः ॥

इति पूर्णानन्दसरस्वतीकृततत्त्वंपदार्थविवेकः संपूर्णः ॥

R. No. **1383.**

Paper. $10\frac{5}{6} \times 9\frac{3}{8}$ inches. Foll. 76. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Śāstri of Viriñcipuram.

प्रत्यक्तत्त्वप्रकाशिका.

PRATYAKTATTVAPRAKĀŚIKĀ.

Same work as that described under R. No. 1168 *ante*.

Complete in four Adhyāyas.

---

R. No. **1384.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Śāstri of Viriñcipuram.

नामसङ्कीर्तनम्.

NĀMASAṄKĪRTANAM.

On the greatness and religious efficacy resulting from the repetition of the different names of God as described in the Brahmasaṁhitā, Kātyāyanasaṁhitā, etc.

Incomplete.

**Beginning:**

यन्नामकीर्तनादेव सद्यः पापक्षयो भवेत् ।
तमहं संस्मरामीशं शिवं कृष्णं विमुक्तये ॥

ननु नामकीर्तनात्सद्यः पापक्षयप्रतिपादकमन्त्रात् संवादेतिहासपुराणोपपुराणसंहितागमादीनां कर्मानुष्ठानपराणां स्वार्थे प्रामाण्यं नास्तीति चेत्, मानान्तरसंवादिविसंवादिवाक्यानामग्निर्हिमस्य भेषजम्, स प्रजापतिरात्मनो वपामुदखिदत्, यजमानः प्रस्तर इत्यादीनामे(व) प्रामाण्यम् ।

* * * *

ब्रह्मसंहितायामपि नामकीर्तनप्रस्तावे बोधायनं प्रति श्रीकृष्णः----

मन्नामकीर्तनफलं विविधं निशम्य
न श्रद्धयातिमनुते यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरविविधार्तिनिपीडिताङ्गम् ॥ इति ।

कात्यायनसंहितायाम्—

अर्थवादं हरेर्नाम्नि सम्भावयति यो नरः ।
स पापिष्ठो मनुष्याणां नरके पतति स्फुटम् ॥ इति ।

**End :**

कपिलाकोटिदानस्य कन्यादानायुतस्य च ।
यत्फलं लभते जन्तुस्तत्फलं हरिकीर्तनात् ॥

---

## R. No. 1385.

Paper. $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Foll. 98. Lines, 20 in a page. Telugu. Good.

Transcribed in 1914-15 from a palm-leaf MS. of M.R.Ry. Mārkaṇḍēya Śarma of Guntur.

ब्रह्मसूत्रलघुवृत्तिः.

BRAHMASŪTRALAGHUVṚTTIḤ.

A brief commentary on the Brahmasūtras of Vyāsa written in accordance with the Advaita school of Vēdānta. The difference in the views held by Vācaspatimiśra and others is also incidentally noticed.

Complete

**Beginning :**

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
ओं नमो गुरुभ्यः.

आत्मा वारे द्रष्टव्यः श्रोतव्य इत्यादौ

अथातो ब्रह्मजिज्ञासा । साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः । वाचस्पतिमिश्रमते तु साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्मज्ञानेच्छा भवति । कर्मफलस्यानित्यत्वात् ब्रह्मज्ञानात्पुरुषार्थश्रवणाच्च ।

शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः ।
समन्वयाविरोधौ च साधनं च फलं तथा ॥

यतो वा इमानि भूतानि जायन्त इत्यादौ जन्माद्यस्य यतः ।

**End :**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

येऽर्चिरादिमार्गेण ब्रह्मलोकं प्राप्ताः तेषामनावृत्तिरेव तेषां न पुनरावृत्तिः क्रममुक्त्यभिधायकशब्दात् । न स पुनरावर्तते न स पुनरावर्तत इति श्रुतिश्शब्दः । निर्गुणब्रह्मविदां त्वावृत्तिशङ्कैव नास्तीत्यर्थः ॥

**Colophon :**

इति ब्रह्मसूत्रलघुवृत्तिः समाप्ता ।

---

R. No. **1386.**

Paper. 11¼ × 9 inches. Foll. 167. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a paper MS. of M.R.Ry. M. Rāmakṛṣṇakavi of Vanaparti, a town in Hyderabad.

**वेदान्तसूत्रमुक्तावली.**

VĒDĀNTASŪTRAMUKTĀVALĪ.

This is a commentary on the Brahmasūtras of Vyāsa. By Brahmānandasarasvatī, pupil of Paramānandasarasvatī. He says that he has followed the Nirṇayadarpaṇa and other works of his learned predecessors.

Breaks off in the fourth Pāda of the third Adhyāya.

**Beginning :**

चरणौ शरणीकुर्मः श्रीमन्नारायणप्रभोः ।
अपि श्रीविश्वनाथस्य परमानन्दरूपिणः ॥
भाष्यार्थो निरणायि यः श्रुतिपथन्यायाम्बुधेः पारगैः
विज्ञैर्निर्णयदर्पणप्रभृतिषु ब्रह्मापरोक्षान्वितैः ।
तं बुद्ध्वा तनुते गुरुप्रभृतिभिस्तन्मात्रचेतोगतिः
ब्रह्मानन्दसरस्वती श्रुतिशिरस्सूत्रेषु मुक्तावलीम् ॥

अथेयं शारीरकमीमांसा नारभ्या, कर्तृत्वादिबन्धस्य समूलस्य सत्यतया ज्ञानानिवर्त्यत्वात् तन्निवृत्तेः फलस्य तत्कामस्याधिकारिणो जीवपरयोरैक्यस्य विषयस्य चासम्भवात्। वेदान्तानामर्थवादत्वेन विचारविधिफलादिषु तात्पर्याभावात् वेदार्थमात्रविचारस्य पूर्वमीमांसया कृतत्वाच्चेति प्रत्याह—अथातो ब्रह्मजिज्ञासेति । नित्यानित्यविवेकभोगमात्रारागशमदमोपरमतितिक्षासमाधानानन्तर्यमथशब्दार्थः । अत इति ल्यब्लोपे पञ्चम्या इमां मुमुक्षामवाप्येत्यर्थः । नित्यानित्यविवेकादिमुमुक्षान्तस्य अथशब्दार्थानन्तर्यप्रतियोगिनः सम्भवप्रदर्शनार्थमत इति भाष्यादिः ।

* * * *

**Colophon :**

इति श्रीपरमानन्दसरस्वतीपूज्यपादशिष्यश्रीब्रह्मानन्दसरस्वतीविरचितायां वेदान्तसूत्रमुक्तावल्यां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

इति प्रथमाध्यायः समाप्तः ॥

**End :**

दर्शनाच्च ॥

काम्यानां स्वप्रयोजनकामनायामनित्यत्वेनानित्यत्वदर्शनाच्च न यागाङ्ग[ा]श्रितोपासनानां समुच्चयः किं तु यथाकाम्यमिति ॥

इति यथाश्रयभावाधिकरणम् ॥

**Colophon:**

इति श्रीब्रह्मानन्दसरस्वतीविरचितायां सूत्रमुक्तावल्यां तृतीयस्याध्यायस्य तृतीयः पादः ॥

अथ पुरुषार्थाधिकरणम् । चतुर्थेन सगुणनिर्गुणविद्यानां क्रतूपकाराद्भिन्ने फले साधनत्वनिर्णयात्फलभेदे साधित एव तृतीये तासां भेदाभेदौ सिध्यत इति हेतुहेतुमद्भावः पादयोः सङ्गतिः ।

* * * *

उपेत्य तु स्त्रियं कामात्प्रायश्चित्तं विधीयते ।
प्राणायामसमायुक्तः कृच्छ्रं मन्दं समाचरेत् ॥
तत्रैव च यतिः शान्तः कुर्यात्सान्तपनं व्रतम् ।
ततश्चरति निर्दोषः कृच्छ्रस्यान्ते समाहितः ॥
पुनश्चाश्रममागत्य चरेद्भिक्षुरतन्द्रितः ।

इत्यादिः प्रणवजपादिश्च बोध्यः । कृतप्रायश्चित्तेरपि प्रकृतं प्राणायामादिविध्यर्थमिति प्रयोजनसङ्गती ॥

इति आधिकारिकाधिकरणं समाप्तम् ॥

---

R. No. **1387.**

Paper. 10¾ × 9⅝ inches. Foll. 154. Lines, 20 in a page. Telugu.

Transcribed in 1914-15 from a MS. of M.R.Ry. Puruṣōttamakavi of Masulipatam.

Bound in two volumes.

काशीमाहात्म्यम्.

KĀŚĪMĀHĀTMYAM.

Similar to the work described under No. 2388 of the D.C.S. MSS., Vol. IV, Part 2.

As found in the third part of the Brahmavaivartapurāṇa. Contains Adhyāyas 1 to 26, the headings of which are given below :—

१. गुरुभक्तिस्वरूपकथनम्.
२. काशीस्वरूपप्रकटनम्.
३. काशीमाहिमवर्णनम्.
४. सोमशर्मोपाख्यानम्.
५. महासेनोपाख्यानम्.
६. मोक्षोपायकथनम्.
७. प्रायश्चित्तप्रसङ्गः.
८. प्रायश्चित्तनिर्णयः.
९. Do.
१०. पञ्चक्रोशयात्रा.
११. क्षेत्रप्रदक्षिणम्.
१२. प्रायश्चित्तविधिः.
१३. तीर्थकथनम्.
१४. काशीप्रादुर्भावः.
१५. ब्रह्मक्षेत्रमाहात्म्यम्.
१६. स्थितिक्रमः:
१७. शिवशक्तिलिङ्गोपाख्यानम्.
१८. कामकलाख्यानम्.
१९. वीरसेनोपाख्यानम्.
२०. श्रवणविधिः.
२१. गङ्गाकथा.
२२. नरकवर्णनम्.
२३. यातनापापकथनम्.
२४. काशिकथा.
२५. Do.
२६. रहस्यातिरहस्यकथनम्.

**Beginning :**

भवानीतनयाद्याद्यतनयानन्द दायक ।
काशीवासिजनाघौघहारिन् धुण्ढे नमोऽस्तु ते ॥
जयति जयति काशी काशितज्ञानराशिः
शिवहरिहरधातृश्रीगणेशाम्बिकानाम् ।
निवसातिरियमाद्या तां भजध्वं भजध्वं
स्मरत नमत शुद्धां शुद्धये कीर्तयध्वम् ॥

ऋषय ऊचुः—

युगानि युगमानं च युगधर्माः सनातनाः ।
युगेषु लोकचरितं श्रुतमस्माभिरादितः ॥

पुनः कलियुगस्यास्य स्वरूपं वर्णयादितः ।
कलिनाधर्ममित्रेण वञ्चिता अपि सज्जनाः ॥

श्रीसूत उवात—

संहृत्य सर्वं शुद्धेऽम्भस्यद्वयो हरिरव्ययः ।
प्रबुद्धो बुधसंसेव्यस्तदा नाभेरजायत ॥

* * * *

न काशिकायां पतितोऽपि धर्मकृद् दुःखं समाप्नोति मम प्रसादात् ।
इति प्रतिज्ञा जगदीश्वरस्य महानुभावस्य शिवस्य नित्यम् ॥
काश्यां प्रदीपप्रभया प्रकाशितं पापान्धकारः खलु नाशमेति ।
विश्वेशदेहोद्भवया सुविद्यया महात्मनां पुण्यकृतां कृतात्मनाम् ॥

**Colophon:**

इति श्रीब्रह्मवैवर्ते तृतीयभागे काशीमाहात्म्ये गुरुभक्तिस्वरूपकथनं नाम प्रथमोऽध्यायः ॥

**End:**

सूतः—

इदं महाख्यानमशेषपाप्मनां विनाशनं काशिनिवाससौख्यदम् ।
शृण्वन्ति गायन्ति महानुभावाः परां मुदं प्राप्य परां लभन्ते ॥

* * * *

स्थूलादपि स्थूलतरा काशिका ब्रह्मरूपिणी ।
यथा मनुष्यदेहेऽस्मिन् शोधिते सति वस्तुतः ॥

**Colophon:**

इति श्रीब्रह्मवैवर्ते महापुराणे तृतीयभागे काशीमाहात्म्ये रहस्यातिरहस्यः षड्विंशोऽध्यायः ॥

Fol. 154*b* contains two stanzas relating to Dharmaśāstra.

## R. No. 1388.

Paper. 10⅝ × 9½ inches. Foll. 143. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambakkam.

पाण्डवपुराणम्.

PĀṆḌAVAPURĀṆAM.

A work in eighteen Sargas briefly describing the story of the Mahābhārata as current among the Jainas: by Vādicandra, younger brother of Prabhācandra. The author is said to have consulted the Aṣṭasahasrī of Vidyānanda, the Jainēndracandrikā of Pūjyapāda, the Vādasindhu of Akalaṅka and the works of Samantabhadra, Hariścandra, Vīranandi, Puṣpadanta and Janañjaya.

The story is said to have been recounted by Vardhamāna, son of Siddhārtha who reigned at Kuṇḍina in the Vidēha country, to the King, Śrēṇika, and is said to have been traditionally transmitted in that line through successive generations, such as, Nēminātha, Padmanandi, Dēvēndrakīrti, Vidyānandi, Mallibhūṣa, Vīracandra and Jñānabhūṣaṇa to the author's brother Prabhācandra, from whom the author is said to have heard it. It is stated in this work that it was written in a place named Ghanaugha in the Puṣya month in the year 1654 (?) and that it contains 2,800 stanzas.

Complete; the names of the Adhyāyas are given below:—

१. शिवपुराणाभिमतपाण्डवोत्पत्तिवर्णनम्.
२. जैनाभिमतधृतराष्ट्राद्युत्पत्तिवर्णनम्.
३. कौरवपाण्डवोत्पत्तिवर्णनम्.
४. पाण्डवक्रीडानेमिजिनजन्मवर्णनम्.
५. राक्षसजयकन्यालाभकरीन्द्रहननवर्णनम्.
६. पाण्डवस्वपुरप्रवेशार्धराज्योपलम्भवर्णनम्.
७. दुर्योधनमानोच्छेदवर्णनम्.
८. कीचकवधवर्णनम्.
९. विराटगोकुलानयनादिवर्णनम्.

१०. कृष्णपाण्डवप्राग्भवस्नेह-वर्णनम्.

११. उभयसेनामेलनवर्णनम्.

१२. गाङ्गेयस्वर्गगमनवर्णनम्.

१३. जयद्रथवधवर्णनम्.

१४. द्रोणकर्णदुर्योधनवधवर्ण-नम्.

१५. द्रौपदीहरणपाण्डवमधुरा-प्रवेशवर्णनम्.

१६. द्वारकाहरिविनाशपाण्डव-वैराग्योत्पत्तिवर्णनम्.

१७. पाण्डवभवावलिवर्णनम्.

१८. पाण्डवमुनिनिर्वाणगमन-वर्णनम्.

**Beginning:**

नमः श्रीसिद्धनाथाय ज्ञानानन्दैकमूर्तये ।
स्वापूर्वार्थप्रकाशाय सुखदृग्वीर्यमूर्तये ॥
नमो वृषभनाथाय वृषवर्धनहेतवे ।
अपारभवपाथोधिसमुत्तरणसेतवे ॥
पशूनां समजो यस्य दृष्ट्या विगतबन्धनः ।
स जीयाज्जगदानन्ददायको यदुनायकः ॥
दिदीर्वान् शम्भुजं गर्वं बभञ्ज्वान् भवपञ्जरम् ।
शिशीर्वान् लोकमिथ्यात्वं सुखं पुष्यात् स सन्मतिः ॥
त एव भूभृतां मान्या लोके स्तुत्यास्त एव हि ।
प्रातर्नमन्ति ये नित्यं भारतीपदपङ्कजम् ॥

* * *

श्रीमत्समन्तभद्राद्या जयन्तु श्रुतसागराः ।
वाक्कुठारैश्च येषां हि भिद्यन्ते कुमतद्रुमाः ॥
सप्तभङ्गान्विते यस्य वादसिन्धौ सरस्वती ।
मग्ना सुगतसंभूता स जीयादकलङ्ककः ॥
विद्यानन्दो मुनिर्जीयात् सद्गुणः पात्रकेसरी
यस्मादष्टसहस्री च संभूता परपक्षहा ॥

स नन्द्यात्पूज्यपादेशो यस्माज्जैनेन्द्रचन्द्रिका ।
अजायत सदा सर्वजनजाड्यतमोऽपहा ॥

हरिश्चन्द्रः स मे देवो वीरनन्दी जनंजयः ।
महाकाव्यस्य कर्तारो जयन्तु जगतीतले ॥

षड्भाषाकविचक्रीशः पुष्पदन्तः परार्थकृत् ।
यद्ग्रन्थास्स्तोकबुद्धीनामगम्या हि पदेपदे ॥

एतेषां ग्रन्थमालोक्य पण्डितानामपण्डितः ।
वादिचन्द्रः कथं कुर्याद्भारतं भुवनोत्तमम् ॥

शब्दशास्त्रे न कौशल्यं न पुराणपरिश्रमः ।
नालोकितोऽपि सत्तर्को नाधीतोऽप्यागमोऽपि च ॥

ईदृशं कोऽपि नो कुर्यात् धाष्टर्यं लोके विचक्षणः ।
तारी चापि न कोऽप्यत्र संतरेत्पयसां पतिम् ॥

यथा कथंचिद्वदतो यथाशक्ति पुराणकम् ।
मम दोषो न वा ग्राह्यः साधुभिः सर्वसंमतैः ॥

अस्ति विस्तरतः प्रोक्त भारतं पूर्वसूरिभिः ।
तत्संक्षिप्य प्रवक्ष्यामि सद्वाक्यैरुपयोगिभिः ॥

कविदृष्टो जनः क्षुद्रो नीरसं चापि भूतलम् ।
नास्ति चैकापि सामग्री परं शासनभक्तितः ॥

अथ श्रीभरतक्षेत्रे विषयः श्रीविदेहकः ।
यं विभूष्य स्थितं भाति पुरं श्रीकुण्डिनाभिधम् ॥

तत्र सिद्धार्थराजेशस्तद्भार्या प्रियकारिणी ।
सा सुप्ता षोडश स्वप्नानद्राक्षीत् क्षणदात्यये ॥

गजं वृषं हरिं पद्मां पुष्पदामद्वयं विधुम् ।
रविं मीनं घटद्वन्द्वं सरः सिन्धुं स(सु)विष्टरम् ॥
नाक(कं)नागालयं रत्नपुञ्जं निर्धूमपावकम् ।
प्रेक्ष्य श्रीमान्प्र(मत्प्र)भोरग्रेऽवोचत् स्वप्नान् विविच्य च ॥

* * * *

अच्युतः स्वर्गगं हित्वा विमानं पुष्पकाभिधम् ।
भगवान् प्रियकारिण्या गर्भवासमुवास च ॥
आषाढशुक्लषष्ठ्यां(तु)सोमे हस्तान्तरान्तरे ।
सौम्येषु ग्रहयोगेषु लग्ने चातीव निर्मले ॥
महामहोत्सवं गेहे प्रतिमासं प्रकुर्वति ।
शुभ्रचैत्रत्रयोदश्यां सा सुतं तमजीजनत् ॥
समेत्य सहसा देवाः सेन्द्राः साप्सरसो गृहे ।
अभिषिच्यार्भकं मेरौ वीराख्यां हर्षतो जगुः ॥
यस्य जन्मोत्सवे सर्वा वृद्धिं याता विभूतयः ।
वर्धमानोऽयमित्याख्यत् पिता तस्माज्जनैर्वृतः ॥

* * * *

चतुरङ्गबलोपेतो गत्वानम्य पदाम्बुजम् ।
अस्तावीत्सन्मतिं भक्त्या श्रेणिकः संमताहितः ॥

* * * *

इति स्तुत्वा जिनाधीशं नामंनामं च गौतमम् ॥
धारंधारं महातोषमध्यास्त नरकोष्ठकम् ।
संलभ्य समयं राजा कुड्मलीकृत्य दोर्युगम् ॥
पप्रच्छ पाण्डुपुत्राणां चरितं चित्रतास्पदम् ।
केन पुण्येन संजाताः कस्य तीर्थो जिनेशिनः ॥

* * * *

कानीनस्तु पितामहः समभवत्पित्रादयो गोलकाः
तत्पुत्राः पृथगन्यतातजनिताः कुण्डा ह्यमी पाण्डवाः ।
पञ्चानां द्रुपदात्मजा सहचरी युद्धे हता बान्धवाः
श्रीकृष्णेन कुलं कलङ्कमलिनं नीतं जगद्वन्द्यताम् ॥

इत्युक्त्वा विरराम वंशमखिलं श्रीपाण्डवानां नृपाः
श्रुत्वोवाच महामुनिर्गुणनिधिर्ज्ञानावधिर्गौतमः ।
नेदं तथ्यमसत्यतामुपगतं न श्राव्यमेतत्कथा
श्रोतव्यं प्रतिवासरं मुनिमुखाच्छ्रीपाण्डवीयं यशः ॥

**Colophon :**

इति भट्टारकश्रीप्रभाचन्द्रानुचरसूरिश्रीवादिचन्द्रविरचिते श्रीपाण्डवपुराणे शिवपुराणाभिमतपाण्डवोत्पत्तिवर्णनो नाम प्रथमः सर्गः ॥

**End :**

यो भिल्लो वणिगुत्तमस्त्रिदशभूचिन्तागतिर्यः खगः
यो माहेन्द्रपतिर्बभूव विदितो यो वाऽपराजित्प्रभुः ।
यो वा षोडश नाकिनां पतिरभूत् स्वादिप्रतिष्ठो नृपः
यो वा श्रीशजयन्तगोनरनुतः श्रीनेमिनाथोऽवतात् ॥

स जीयात् पद्मनन्दीशो भारतीग(गु)च्छभूषणम् ।
पितेव पालयामास यो बृन्दं यतिनामिह ॥

यत्कीर्तिमुज्ज्वलां श्रुत्वा मलिनाङ्गो निशाकरः ।
देवेन्द्रकीर्तिर्जीयात्(स) पालिताज्ञो नृपाधिपैः ॥

मूलसङ्घाम्बरद्योतिममतामददूरगः ।
समस्तजनतानन्दी विद्यानन्दी बभूव च ॥

तद्वंशाब्धिशरच्चन्द्रो नानामन्त्रस्फुरत्प्रभः ।
महिम्नो मन्दिरं जीयान्मल्लिभूषो मुनीश्वरः ॥

तस्य वंशाम्बरे सूर्यः लक्ष्मीचन्द्रो लसद्द्युतिः ।
सकलागमसद्वेदी लक्ष्यलक्षणलक्षितः ॥
वसुधाविदितख्यातिर्वाञ्छितार्थफलप्रदः ।
वीरचन्द्रो विदां वन्द्यो दर्शिताखिलसत्पथः ॥
अपनीतं विनेयानां येन जाड्यं हृदि स्थितम् ।
स जीयात् ज्ञानभूषेन्द्रो भवदुःखनिवारणः ॥
केचिच्छब्दप्रवीणाः कति च बुधजनास्तर्कशास्त्रेषु शूराः
केचित्सिद्धान्तसिन्धुप्रतरणपटवो मन्त्रवादाश्च केचित् ।
यं मुक्त्वान्यं यतीशं गुणगणनिलयं सर्वविद्याविनोदं
पश्यामो न (नो)पृथिव्यां वयमिह नयनैः श्रीप्रभाचन्द्रसूरिम् ॥
तत्पट्टविशदख्यातिर्वीरविद्याविशालधीः ।
वादिचन्द्रः कथामेनामप्राक्षीद्रससंभृताम् ॥
वेदबाणषडङ्गे(ङ्के) च वर्षे तैषेऽथ मासि च
घनौघनगरेऽकारि पाण्डवानां प्रबन्धकः ॥
श्रीमदृषभनाथस्य प्रासादे मङ्गलोद्धुरे ।
नित्यं हुंफडसंघे च भक्तिभारं प्रकुर्वति ॥
बोधाय स्वल्पबुद्धीनां प्रसिद्धवचनोत्करैः ।
जुगुम्भ पाण्डुजातानां चरित्रं वादिचन्द्रमाः ॥
दृश्यते लेखकैर्यत्र संख्या चाष्टशतैराधि ।
द्विसहस्री सुवृत्तानां पाण्डवानां चरित्रके ॥

**Colophon :**

इति श्रीभट्टारकश्रीप्रभाचन्द्रानुचरसूरिश्रीवादिचन्द्रकृते पाण्डवपुराणे पाण्डवमुनिनिर्वाणगमनो नामाष्टादशः सर्गः ॥

पाण्डवपुराणं संपूर्णम् ॥

## R. No. 1389.

Paper. 10⅝ × 9⅝ inches. Foll. 153. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Śāstri of Viriñcipuram.

### सौभाग्यपद्धतिः.

### SAUBHĀGYAPADDHATIḤ.

A work giving details of procedure connected with the conduct of worship of the goddess Śakti with quotations from various authoritative works.

Complete.

**Beginning:**

. . . . . . . . . . . . . . न्तदलम् ।
वासा . . . .गं च चतुर्दलं च सहिता शक्त्या गणेशं दले ।
तस्यास्स्युः प्रणवेऽजपा . . . . . मुष्टिर्मुनीन्द्रा विदुः ॥
घटिकार्धे श्रीललितासहस्रनामे श्रीहयग्रीव.

मूलाधाराम्बुजारूढा पञ्चवक्त्रा स्थले स्थिता ।
अङ्कुशादिप्रहरणवर्ण . . . . . दिनिषेविता ॥
मुद्रोदनासक्तचित्ता डाकिनीरूपधारिणी ।

श्रीमहाच्छन्दसारे—

श्रीशिवः—

उक्तलक्षणसम्पूर्णां डाकिनीं कनकप्रभाम् ।
चतुष्पत्रेषु देवेशीं वरदां च श्रियं तथा ॥

* * * *

यक्षाद्यैः सुरकिन्नरैः परिवृतैः सञ्चिन्त्य(विद्या)चणैः
पुन्नागाम्बुजनागपुष्पवकुलव्यासैस्सुरैरर्चितम् ।
नित्यं ध्यानसमस्तदीप्तकिरणं कालाग्निरुद्रोपमं
तं संहारकरं नमामि सततं पातालषष्ठं मुखम् ॥

ओं हं सः हं सां हं सस्सो हं अहर्निशमहोरात्रसङ्ख्यया गतदिवस-सङ्ख्यया षट्छतमजपाब्रह्मत्रियाब्रह्मविद्यागायत्रीमहामन्त्रजपमहर्निशमहं नि-वेदयामि ।

**End:**

तदाप्रभृति निर्भीतो निर्विकल्पस्सुखी भवेत् ।
यावद्देहं गुरोराज्ञां मनसापि न लङ्घयेत् ॥
दृढभक्तिस्सदाचारश्चिन्मयं स्वं निरीक्षयेत् ।
निर्वाणदर्पणं नाम पद्धतिः कथिता मया ।
अनया परितुष्टोऽस्तु सिद्धानन्दगुरुस्सदा ॥

इति निर्वाणदर्पणं समाप्तम् ।

ऐं विजये विजये त्रैलोक्यवशङ्करि त्रैलोक्यममुकं मे वशमानय स्वाहा..

* * * *

वामाङ्कन्यस्तवामाकरतलकलितालिङ्गितो वामबाहौ
न्यस्तारक्तोत्पलाभः स्तनविधृतिलसद्वामबाहुः प्रियायाः ।
सर्वाकल्पाभिरामो धृतपरशुमृगेष्वादरः काञ्चना . . .

The name of the scribe and the date of transcription are given thus:

बहुधान्यनामसंवत्सरे वृश्चिकमासे शुक्लपक्षे प्रथमायां भानुवासरे श्रीवत्स-गोत्रोद्भवसुब्रह्मण्यपुत्रेण पतञ्जलिना सौभाग्यपद्धतिः लिखित्वा समाप्तम् ॥

**Colophon:**

इति सौभाग्यपद्धतिस्सम्पूर्णा ॥

---

## R. No. 1390.

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 160. Lines, 20 in a page. Grantha. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāriyar of Villiyambākkam.

न्यायरत्नमाला.

NYĀYARATNAMĀLĀ.

By Pārthasārathimiśra, son and disciple of Yajñātman. Same as the work described under No. 1887 of Rājēndra Lal Mitra's Notices of Sanskrit MSS.

A treatise giving in verse and prose the reasonings and the chief doctrines inculcated by Kumārilabhaṭṭa in his work on Mīmāṁsā entitled the Tantravārtika.

Complete in five Paricchēdas.

**Beginning:**

आनन्दममृतं ज्ञानमजं साक्षिणमीश्वरम् ।
ब्रह्म सर्वमसर्वं सदसद्वन्दे विभुं हरिम् ॥
मीमांसार्णवसम्भूतैः कुमारस्वामिना कृतैः ।
न्यायरत्नैरहं मालां सङ्गृह्णामि मनोरमाम् ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ।
आचार्यदृष्टिमाश्रित्य प्रतिपक्षनिरासतः ॥
तत्र तावदिमं केचित् पूर्वपक्षं प्रचक्षते ।

* * *

कारकेण गृहीतत्वादेकत्वादेः क्रियार्थता ।
कारकश्रुतिगम्यत्वात् बाधते द्रव्यशेषताम् ॥
तथा पश्वर्थमेकत्वं पदश्रुत्या प्रतीयते ।
समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता ॥

इति तत्र समानप्रत्ययश्रुतिं दर्शयति । तस्मात् क्रिया विनियोक्त्रीति सूक्तम् ॥

**Colophon:**

इति न्यायरत्नमालायामङ्गनिर्णये प्रथमपरिच्छेदः ॥

**End:**

एतत्सर्वं वार्तिकसङ्ग्रहरूपेण भावनावचनो लिङ्शब्दस्तावत्तां स्मारयति, लोकवदित्यादिना । तस्मात् प्रकारान्तररूपोऽभिविधिस्तावत्प्रतीक्षते । यावद्योग्यमापन्ना भावना अन्यानपेक्षिणीत्यनेन दर्शितमिति वेदितव्यमिति.

**Colophon:**

इति श्रीमहोपाध्यायपार्थसारथिमिश्रविरचिते न्यायरत्नमालायामङ्गनिर्णये पञ्चमः परिच्छेदः ॥

भुवनत्रयविख्यातः श्रीमद्यज्ञात्मनन्दनः ।
तत एव श्रुतं प्राप्य विश्रुतः पार्थसारथिः ॥
मीमांसाब्धिं चाकुलं चोद्यनक्रैः मन्दप्रज्ञैर्दुर्विगाह्यं विगाह्य ।
भट्टाचार्यैराहृतैर्न्यायरत्नैः मालां कांचित् कल्पयामास धीरः ॥

---

R. No. **1391.**

Paper. $8\frac{5}{8} \times 5\frac{5}{8}$ inches. Foll. 23. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

(*a*) आत्मानात्मविवेचनम्.

ĀTMĀNĀTMAVIVĒCANAM.

Foll. 1*a*—10*a*. Fol. 10*b* is left blank.

This work investigates into the nature of the soul and matter and comes to the conclusion that the individual self is identical with the Supreme Brahman. By Mahēśvarānandasarasvatī, a disciple of Puruṣōttamānandasarasvatī.

Complete.

**Beginning:**

अथात्मानात्मस्वरूपं विभज्य प्रदर्श्यते—तत्र प्रथमतः सुखप्रतिपत्त्यर्थमनात्मस्वरूपमुच्यते। अनात्मा त्रिविधः स्थूलसूक्ष्मकारणभेदेन । तत्र स्थूलशरीरं नाम पञ्चीकृतपञ्चमहाभूतकार्यं करचरणाद्यनेकावयवविशिष्टं कर्मणा

संपादितं जीवस्य सुखदुःखानुभवयोग्यायतनमुच्यते। इदमेव स्थूलशरीरम्.

**End:**

सर्वत्र परिपूर्णेन महाकाशेनैकीभूतो भवति; तद्वत् प्रत्यगात्मापि स्थूलसूक्ष्मकारणशरीरत्रयोपाधिविलये सति सर्वत्र परिपूर्णेन सच्चिदानन्दलक्षणेन ब्रह्मणैकीभूतो भवति, सच्चिदानन्दलक्षणं ब्रह्मैव भवतीत्यर्थः। ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मैव सन् ब्रह्माप्येति, ब्रह्मविदाप्नोति परमित्यादिश्रुतेः। तस्मान्मुमुक्षुभिः ब्रह्मात्मनोः श्रुतिप्रतिपादितैक्यमनुज्ञायताम्।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्पुरुषोत्तमानन्दसरस्वती-चरणारविन्दशिष्यमहेश्वरानन्दसरस्वतीविरचितमात्मानात्मविवेचनं सम्पूर्णम्॥

---

(*b*) पञ्चीकरणम्.

PAÑCĪKARAṆAM.

Foll. 11*a*—23*b*.

Similar to the work described under No. 4636 of the D.C.S. MSS., Vol. IX.

Incomplete.

**Beginning:**

तमहं रामकृष्णाख्यशुद्धं सच्चित्सुखात्मकम्।
नमस्करोमि श्रुत्युक्तं तत्पदप्राप्तिवाञ्छया॥
वेदान्तग्रन्थतात्पर्यग्रहणासक्तचेतसाम्।
ब्रह्मतत्त्वं स्फुटीकर्तुं पञ्चीकरणमुच्यते॥
अनिर्देश्यमपि ब्रह्म अध्यारोपापवादतः।
निर्देश्यं श्रुत्यवष्टम्भाच्छक्यतेऽस्मात्प्रयासतः॥
अध्यारोपक्रमं वक्ष्ये मन्दबुद्ध्यनुसारतः।
केनोपायेन मन्दानां ब्रह्मारोहं भवेन्मनः॥

पञ्चविंशतिकोष्ठानि तदीशाने तु दण्डवत् ।
पञ्च कोष्ठान् लिखेत्तत्र पुच्छं प्रथममुच्यते ॥

पञ्चीकरणं नाम आत्मानात्मविवेकः कथ्यते । आत्मा स्थूलसूक्ष्मकारण-शरीरेभ्यो व्यतिरिक्तः अवस्थात्रयसाक्षी पञ्चकोशव्यतिरिक्तः ।

**End**:

वायोरंशं पृथिवीसंयोगात् धनञ्जयवायुः पृथिव्यामुपसंहरति । अग्न्यं-शमाकाशसंयोगात् सङ्गमाकाशे उपसंहरति । अग्नेरंशं वायुसंयोगादालस्यं वायावुपसंहरति । अग्निः स्वांशं निद्रा अग्नावुपसंहरति ।

---

R. No. **1392.**

Paper. $8\frac{5}{8} \times 5\frac{1}{2}$ inches. Foll. 30. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

**गीताप्रकाशिका.**

GĪTĀPRAKĀŚIKĀ.

This work gives the benefits arising from a study of the eighteen Adhyāyas of the Bhagavadgītā with illustrative stories for some of them. It forms the Adhyāyas eleven to fifteen of the Vāyurahasya and is introduced in a conversation between Vāyu and Garuḍa.

Complete.

**Beginning:**

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥

श्रीगरुडः—

मातरिश्वन् प्रवक्ष्यामि अध्यायानां पृथक् पृथक् ।
फलं तत्र शृणुष्वाद्य क्रमशस्त्वं समाहितः ॥

अन्तरिक्षात्परं नास्ति यथा नारायणात्परम् ।
परमाणोः परं नास्ति गीतार्थानां परोऽस्ति च ॥

* * * *

तस्यास्संक्षेपतो वक्ष्ये गीतायाः फलमुत्तमम् ।
यावदृष्टा मया तावत्तथापि त्वं शृणु प्रभो ॥
गीता गीतेति यो ब्रूयात्क्षुधाप्रस्खलनादिषु ।
विष्णुलोकमवाप्नोति स मुक्तो बहुपातकैः ॥
यो (यस्मिन्) विषादं करोत्यध्याः(ति स)व्यसाची रणादिषु ।
तस्याध्यायस्य पठतः शृणु त्वं पुण्यमुत्तमम् ॥
अश्वमेधशतैर्यस्तु लभते चेत्तदा क्षणैः ।
तत्फलं लभते मर्त्यः पाठकस्य दिने दिने ॥
यस्साङ्ख्ययोगमध्यायं पठते द्विजसत्तमः ।
अग्निष्टोमस्य यज्ञस्य फलं गच्छेद्दिने दिने ॥
ज्ञानयोगं पठेद्यस्तु सततं द्विजपुङ्गवः ।
उषित्वा स हरेर्लोके बहुकालमनेकशः ॥

* * * *

ज्येष्ठः प्रियव्रतः प्रोक्तः कनिष्ठोत्तानपादकः ।
वर्धमानौ कृतौ पुत्रावुभावपि परस्परौ ॥
भ्रातरौ प्रेमतो भावात् ख्यातौ लोके बभूवतुः ।
षट्सप्तवार्षिकौ तौ तु कुमारौ स्नेहसम्मतौ ॥

* * * *

**Colophon :**

इति वायुरहस्ये गरुडवायुसंवादे गीताप्रकाशिकायां सप्तमाध्यायफलनिरूपणं नाम एकादशोऽध्यायः ॥

**End :**

एतत्ते कथितं वायो पुण्यमाख्यानमुत्तमम् ।
मया समस्तपापघ्नं सर्वपुण्यप्रदं शुभम् ॥
य इदं पठते नित्यं शृणुयाद्वा समासतः ।
संसाराब्धिं समुत्तीर्य याति विष्णोः परं पदम् ॥

**Colophon :**

इति श्रीवायुरहस्ये श्रीगरुडवायुसंवादे गीताप्रकाशिकायां चरमश्लोकफलनिरूपणं नाम पञ्चदशोऽध्यायः ॥

---

R. No. **1393.**

Paper. $8\frac{3}{4} \times 5\frac{1}{2}$ inches. Foll. 38. Lines, 8 in a page. Grantha. Good.

Transcribed in 1914-15 from a palm-leaf MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

(*a*) अज्ञानस्वरूपम्.

AJÑĀNASVARŪPAM.

Foll. 1*a*—15*a*. Foll. 15*b* and 16 are left blank.

In this work the author investigates the nature of nescience or ignorance, which is the cause of all bondage in the phenomenal world, and says that it can be removed only by the realization of the Brahman.

Incomplete.

**Beginning :**

शुक्लाम्बरधरं विष्णुं ( . . . ) सर्वविघ्नोपशान्तये ॥

सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिं
विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥
जननमरणहेतुर्नाशयत्यात्मतत्त्वं
परमकरुणया मे बोधयामास सोऽयम् ।
निखिलभुवनवन्द्यं नित्यमादेहपातात्
परमसुखमिदं तत्पादपद्मं प्रपद्ये ॥
यदज्ञानप्रभावेण दृश्यते सकलं जगत् ।
आत्मा वै स्वख . . . . . . . . ॥

यज्ज्ञानालयमाप्नोति तस्मै ज्ञानात्मने नमः ।
यदज्ञानेन संसारः(रं) प्राणिनां(नो) यन्ति सारतः ॥
मुक्तिर्भवेत्तदज्ञानस्वरूपं वर्ण्यते स्फुटम् ।
चित्तस्य शुद्धये कर्म नहि वस्तूपलब्धये ॥
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः ।
कषायपत्ति(वन्ति) कर्माणि ज्ञानं तु परमा गतिः ॥
कषायं कर्मभिः पक्के ततो ज्ञानं प्रवर्तते ।
अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना ॥

**End:**

अस्थिस्थूणं स्नायुबद्धं मांसशोणितलेपितम् ।
चर्मावबद्धं दुर्गन्धं पूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतमशाश्वतम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥

---

## (b) अद्वैतबोधप्रकरणम्.

## ADVAITABŌDHAPRAKARAṆAM.

Grantha and Tamil.

Foll. 17*a*—38*a*. Fol. 38*b* is left blank.

A treatise on the Advaita school of the Vēdānta showing the unreality of this phenomenal world. It is in the form of a reply by a Guru to the questions put to him by his disciple.

Complete.

ஶிஷ்ய:—ப்ரஶ்நம்—பாரும் ஹே ஸ்வாமிந் இந்த கதை ஸூ-க்ஷாங்கம் சொன்னீர். அப்படி ஸாக்ஷ்ராஜிகத்திலே ராஜாவாவதார். யாத்ரியாவதார் - இதுவெல்லாம் கேழ்க்கவேணுமென்று இச்சிக்கிறேன். இதை தத்வமாய் சொல்லுமென்று ஶிஷ்யன் கேட்டான்.

குரு சொல்லுகிறார்—

श्रृणु पूर्वोदितो ज्ञानी बाल इत्यत्र वर्णितः ।
श्रुतिर्धात्रीति कथिता हीश्वरप्रतिपादिका ॥

राजा वन्ध्यासुतः प्रोक्तो मायाकल्पित ईश्वरः ।
विरिञ्चिविष्णुरुद्राख्यदेहास्त्रिगुणमूर्तयः ॥

ब्रह्माख्यपीतदेहस्थः सोऽसृजत्रिजगद्गुरुः ।
यत्रेमे वितता लोका लोकेशाश्च चतुर्दश ॥

वनोपवनमालाश्च यत्रोद्यानपरम्परा ।
क्रीडाशिखरिणो यत्र सह्यमन्दरमेरवः ॥

शीतोष्णदीप्तिचन्द्रार्कौ दीपौ यत्रानिलाक्षतौ ।
सूर्यांशुकवदालोकास्तरङ्गोत्तुङ्गमौक्तिकाः ॥

वहन्त्यस्सरितो यत्र समुक्तावलयश्चलाः ।
इक्षुक्षीरादिसलिला मणिरत्नबिसाङ्कुराः ॥

और्वानलाम्बुजा यत्र वाप्यस्सप्त महार्णवाः ॥

**End:**

अध्यारोपमिमं सम्यक् परामृश्राति(श्यतु) यस्सुधीः ।
उपेक्ष्य मायिकं तस्यास्सोऽपवादमपेक्षते ॥

இந்த அத்யாரோபப்ரகரணத்தை யாதாமொரு விசாரு நன்றாய் விசாரித்துப்பார்க்கிறானோ அவன் இத்தனை ஜகத்தும் ஸகலஸம்ஸாரமும் எல்லாம் மாயாமயம் மித்யை, தோணுகிறதுமாத்திரம் ஸ்வப்நம்போலே ஸாக்ஷியினாலென்று அறிந்து இத்தை வஸ்துவம்போலே ஸத்யமாய் எண்ணாமல் இது எப்படிபோமென்று அதுக்கு அபவாதத்தை இச்சிப்பன்.

**Colophon:**

इत्यध्यारोपप्रकरणं समाप्तम् ॥
अद्वैतबोधप्रकरणम् ॥

## R. No. **1394.**

Paper. $8\frac{4}{8} \times 5\frac{5}{8}$ inches. Foll. 46. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R.Ry. Śivarāma Śāstri of Trichinopoly.

(*a*) ब्रह्मसूत्रवृत्तिः.

BRAHMASŪTRAVṚTTIḤ.

Foll. 1*a*—26*a*. Fol. 26*b* is left blank.

A brief commentary on the Brahmasūtras of Vyāsa written in accordance with the Advaita school of the Vēdānta.

Begins with the Īkṣatyadhikaraṇa (I-1-5) and breaks off in the Pramitādhikarṇa (I-3-8).

**Beginning :**

ईक्षतेर्नाशब्दमित्यत्र सदेव सोम्येदमग्र आसीत् तदैक्षतेत्यादिना सच्छब्दवाच्यस्य ईक्षितृत्वश्रवणात् अशब्दं शब्देन वेदेनागम्यं प्रधानं जगत्कारणं न भवतीति ब्रह्मणो जगत्कर्तृत्वमुक्तम्। गौणश्चेन्नात्मशब्दादित्यत्र प्रधानस्येक्षितृत्वमौपचारिकमित्युक्तं चेदात्मशब्देन ।

**End :**

अपि च स्मर्यते—

यदादित्यगतं तेजः जगत् भासयतेऽखिलमिति भगवद्गीतासु ब्रह्मणः सूर्याद्यभास्यत्वं स्मर्यत इत्युक्तम्, शब्दादेव प्रामत इत्यत्र अङ्गुष्ठमात्रः पुरुषः ज्योतिरिवाधूमक इति वाक्येन हृदयेऽङ्गुष्ठमात्रत्वेन प्रमितः प्रतिपन्नः प्रत्यगभिन्नः परमात्मैव न तु जीवः कुतः शब्दादेव, ईशानो भूतभव्यस्येति सकलजगदीशितृत्वप्रतिपादकेशानशब्दादेवेत्यङ्गुष्ठमात्रजीवानुवादेन ब्रह्माभेदो बोध्यत इत्युक्तम् । हृद्यपेक्षया तु मनुष्याधिकारत्वादित्यत्र.

---

(*b*) ब्रह्मसूत्रभाष्यव्याख्या—रत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ—RATNAPRABHĀ.

Foll. 27*a*—46*b*.

Same work as that described under No. 4679 of the D.C.S. MSS.

Contains only the Ārambhaṇādhikaraṇa (II-1-6).

---

R. No. **1395.**

Paper. $9\frac{3}{4} \times 5\frac{1}{2}$ inches. Foll. 8. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1914-15 from a MS. of M.R.Ry. Sōmanātha-Śāstri of Masulipatam.

**एकवाक्यताविचारः.**

ĒKAVĀKYATĀVICĀRAḤ.

A discussion between the logician of the Nyāya philosophy and the grammarian as to whether the presence of more than one finite verb in a sentence will break the unity of judgment contained in it.

This appears to be the same work as that described under No. 1940 of Doctor Rajendra Lal Mitra's Notices of Sanskrit MSS., wherein the author is stated to be Acalōpādhyāya.

Complete.

**Beginning:**

अथ किमिदं वाक्यं नाम, एकतिङ् वाक्यमिति भाष्यात् एकतिङन्तार्थमुख्यविशेष्यकबोधजनकपदसमूहो वाक्यमिति वैयाकरणाः। तेन पचति भवतीत्यादौ पश्य मृगो धावतीत्यादौ च क्रियापदस्यानेकत्वेऽपि नैकवाक्यताया व्याघातः। नहि क्रियाविनिर्मुक्तं वाक्यमस्तीति भाष्यात् अस्तिर्भवन्तीपरः प्रथमपुरुष इति कात्यायनस्मरणाच्च, सर्वत्र समुचितक्रियापदाध्याहारः।

**End:**

सङ्ख्या कालातिरिक्ताख्यातार्थो हि भावना। भावनान्वयिनि संख्यान्वय इति नियमात्। क्वचिद्विशेष्यस्य क्वचिद्विशेषणस्य परामर्शात्, तात्पर्यविषयपरामर्शकत्वं तच्छब्दानियतम्। परं तु पदार्थतावच्छेदकरूपविशेषणस्य क्वचिदपि न परामर्शः इति सिद्धान्तनैयायिकमतम् ॥

**Colophon:**

इति एकवाक्यताविचारः संपूर्णः ॥

---

R. No. **1396.**

Paper. $9\frac{5}{8} \times 6$ inches. Foll. 18. Lines, 9 in a page. Grantha. Good.

Transcribed in 1914–15 from a palm-leaf MS. of M.R Ry. Rājagurukkaḻ of Rāmēśvaram.

लक्ष्मीनरसिंहपूजाविधिः.

LAKṢMĪNARASIṀHAPŪJĀVIDHIḤ.

Similar to the work described under No. 8690 of the D.C.S. MSS., Vol. XVI.

Contains the Aṅgapūjā, Āvaraṇapūjā and Nṛsiṁhāṣṭōttaraśatanāmāvali. Complete.

**Beginning:**

आचम्य प्राणानायम्य—

शुक्लाम्बरधरं . . . . . . सर्वविघ्नोपशान्तये ॥

ममोपात्त—प्रीत्यर्थं शुभे शोभने मुहूर्ते चतुर्दश्यां शुभतिथौ ममात्मनः आखिलपापक्षयपूर्वकशत्रुजयसुखधनावाप्तिद्वारा श्रीनरसिंहप्रीत्यर्थमाचरितस्य श्रीलक्ष्मीनरसिंहपूजां ध्यानावाहनादिषोडशोपचारपूजामद्य करिष्ये वैशाखशुक्लचतुर्दश्यां प्रदोषव्या . . . . . श्रीनरसिंहपूजां च करिष्ये.

**End:**

जीवैस्तु परिभूतस्य मोहदुःखगतस्य मे ।
करावलम्बनं देहि शेषशायिन् जगत्पते ॥
श्रीनृसिंहरमाकान्त भक्तानां भवनाशन ।
क्षीराम्बुनिधिवासिन् त्वं चक्रपाणे जनार्दन ॥
व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव ।
गतं पापं गतं दुःखं गतं दारिद्र्यनाशनम् ॥

त्वत्पादाम्भो (रुहयुगे): मम भक्तिः नित्यं प्रसीद मम जनार्दन ।
मन्त्रहीनम्.

**Colophon:**

इति लक्ष्मीनृसिंहपूजाविधिस्समाप्तः ॥

R. No. **1397.**

Paper. $9\frac{5}{8} \times 6$ inches. Foll. 42. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1914–15 from a MS. of M.R.Ry. Sōmanātha Śāstri of Challapalli.

**वाक्यदीपिका.**

VĀKYADĪPIKĀ.

A commentary on the Ēkavākyatāvicāra described under R. No. 1395 *ante*: by Hariyaśōmiśra, patronized by Udayasiṁharāya.

Complete.

**Beginning:**

सुप्तिङन्तचयो वाक्यमिति प्रमाणानुसारेण सुबन्तचयत्वे सति तिङन्तचयत्वमिति, तस्य प्रत्येकं वा सुबन्तचयत्वादेर्वा लक्षणत्वे परस्परमव्याप्तिः। पदसमूहमित्यस्य गौरश्वः पुरुषो हस्तीत्यादावतिव्याप्तिरित्याशयेन पृच्छति—अथेति। इदं लोकप्रसिद्ध वाक्यम्। वाक्यपदवाच्यं किं जिज्ञासितम्। तथाच लोके प्रसिद्धं वाक्यपदवाच्यं जिज्ञासाविषयीभूतमित्यन्वयबोधः। नामेति वाक्यालङ्कारे,। एकतिङ्वाक्यमिति भाष्यादिति। एकत्वे सति तिङ्त्वं वाक्यत्वमित्युक्ते पचतीत्यस्यापि वाक्यत्वापत्तिः। एकं तिङ् यस्मिन्निति बहुव्रीह्याश्रयणे एकतिङ्घटितपदसमुदायत्वं वाक्यत्वमिति पर्यवसन्नम्। पचति भवतीत्यादावव्याप्तमित्याशयेन तदर्थमाह एकतिङन्तेनेति।

**End:**

ननु तच्छब्दविशेषणपरामर्शेति। घटोऽयं तज्जातिरित्यादौ तच्छब्देन घटत्वपरामर्शः स्यादित्यत आह—परन्त्विति। पदार्थतावच्छेदकरूपविशेष-

णस्य पदशक्यतावच्छेदकरूपविशेषणस्य नातिव्याप्तिः पटोलपत्रमित्यादौ पटोलादिपदस्य पटोलादिसम्बन्धिनि लक्षणास्वीकारे पटोलादेः पदार्थतावच्छेदकत्वेऽपि तत्परामर्शानुपपत्तिरिति भावः ॥

**Colophon:**

एवं लक्षणतत्त्वव्यापकाकाचिद्या(?)तत्प्रयुक्तदृश्याश्रयकालपूर्वकत्वाभावकशुद्धचिज्ज्ञाननिरस्तविपरीतभावनीभूतश्रीमदुदयींसहप्रभुलब्धजीवकहरियशोमिश्रनिर्मितवाक्यदीपिका समाप्तिमगमत् ॥

वाक्यदीपिका समाप्ता ॥

---

## R. No. 1398.

Paper. $8\frac{3}{4} \times 5\frac{5}{8}$ inches. Foll. 22. Lines, 8 in a page. Grantha. Good.

Transcribed in 1914–15 from an ill-arranged palm-leaf MS. of M.R.Ry. Rājāgurukkaḷ of Rāmēśvaram.

### रामेश्वरविवाहोपाख्यानम्.

### RĀMĒŚVARAVIVĀHŌPĀKHYĀNAM.

A poem describing the marriage said to have taken place between Rāmanāthasvāmin, a form of Śiva worshipped in Rāmēśvaram, and Parvatavardhanī who was born as the daughter of the Gandamādhana mountain. Reference is made herein to King Muddurāmaliṅga of Rāmnad and to Rāmanāthayati: by Raghunāthakavi.

Contains the second Sarga and the first Adhyāya complete. The second Adhyāya is incomplete. There is apparently some confusion in the arrangement of the chapters.

**Beginning:**

अथाद्रिराजस्सह विष्णुवेधसा संभोजयामास शिवं शिवामपि ।
विचित्रनानाविध अन्नराश्यै(?)रनेकशाकैरपि भक्ष्यभोज्यैः ॥
सशर्करान्नैरपि पायसान्नैर्नानाविधैः पक्वफलादिकैश्च ।
क्षीराज्यखण्डैर्मधुनाक्तभोज्यैः पानीयशीतोदकपानकैश्च ॥

* * * *

कृत्वा तु सर्वेऽपि मुदादिदेवं निवेश्य चान्तर्गृहमादिदेवीम् ।
एवं च कृत्वा परमेश्वरस्य देव्याश्च कल्याणमहोत्सवं मुदा ॥
अथापरेद्युर्दिवसे च शुक्रे वारे बृहन्नायकधर्मकर्त्रा(र्ता) ।
देव्यालये हेमध्वजस्समीपे कृत्वासितर्द्दढशिलैस्सहसा विमानम् ॥

*　　*　　*　　*

इदं विवाहं रघुनायकस्य देव्याश्च चाख्यानमथोपशृण्वतः ।
पुत्रैश्च पौत्रैश्च कलत्रमित्रैर्विचित्रभोगैस्सकलैस्स एधते ॥

**Colophon :**

इति श्रीरघुनाथकविविरचिते रामेश्वरविवाहोपाख्याने द्वितीयस्सर्गः ॥
मन्दं चलन्नुचितभूषणभूषिताङ्गः समाययौ चात्मविवाहमण्टपम् ।
सचित्ररत्नाञ्चितसैंह आसने सहाम्बया तत्र निविष्ट आद्यः ॥

*　　*　　*　　*

स विष्णुश्रीभ्यां सहपत्निकोऽद्रिः सभृङ्गराजोदकधारपूर्वकैः ।
सङ्गृह्य पाणिं सहजाम्बिकायाः ददौ शिवस्याद्भुतहस्तयोर्मुदा ॥

*　　*　　*　　*

शिवं तया वासनमाससाद निवेद्य नीराजनधूपदीपैः ।
एवं समाराधितदेवबृन्दैः विप्रादिवर्णैरपि सेव्यमानः ॥
सहाम्बया पर्वतवर्धयिन्या धाम प्रदक्षिणवशात्प्रविवेश गेहम् ।

**Colophon :**

इति श्रीरघुनाथकविविरचिते रामेश्वरविवाहोपाख्याने प्रथमोऽध्याय-स्समाप्तः ।

सोऽयं प्रविश्य भवनं जगदीश्वरोऽथ माङ्गल्यपूर्वविहितानि चकार देवः ।
विप्रैः स्वकैर्मङ्गलवाद्यघोषैः कृत्वाङ्कुरार्पणसुरक्षणकाशियात्राम् ॥

*　　*　　*　　*

देवादिधर्मपरिपालनदीक्षितेन श्रीरामनाथयतिना बृहन्नायकेन ।
संसेवितश्च निजसेतुभुवाधिपेन श्रीमुद्दुरामलिङ्गभुविपालसुशेखरेण ॥

संसेवितश्च रघुनाथकृतोपचारैः श्रीरामनाथोऽथ प्रसन्नचित्तः ।
तं वीक्ष्य देवी निजभावपूरणं ननाम सा नान्यमना मनस्विनी ॥

**End:**

श्रीगन्धमादनगिरिस्सह बन्धुवर्गैरालोच्य सेतुपतिना सहजाविवाहम् ।
कर्तुं प्रभोस्तु रघुनायकनायकस्य श्रीरामनाथयतिना सह ब्राह्मणैश्च ॥

गत्वा तां हिमशैलराजतनयामापृच्छ्य गन्धाचलः
श्रीरामेण कृतं तटाकममलं श्रीरामतीर्थाभिधम् ।

तस्याश्चोत्तरभागदेशविमले चोद्यानवाटीवृते
तस्मिन्नाश्रममाकरोच्च सहसा दिव्यैर्लताभिर्गृहम् ॥

शृङ्गाग्रस्वर्णविलसत्करिपोतमग्र्यं ग्रामप्रदक्षिणमहोऽत्र च कारयित्वा ।
वैप्रं गृह्यविभूतिभूषितमहारुद्राक्षमालान्वितः.

---

## R. No. **1399**.

Paper. $11\frac{1}{8} \times 8\frac{5}{8}$ inches. Foll. 93. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1914–15 from the Library MS. described under R. No. 223(*a*) *ante*.

### तत्त्वचिन्तामणिदीधितिव्याख्या.
### TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

Same work as that described under R. No. 223(*a*) *ante*.
Contains the Pratyakṣa incomplete.

---

## R. No. **1400**.

Paper. $11 \times 8\frac{5}{8}$ inches. Foll. 117. Lines, 20 in a page. Telugu. Good.

Restored in 1914–15 from the Library MS. which has been already described under R. No. 412 *ante*.

लघुस्मार्तपद्धतिविवेचनिका.

LAGHUSMĀRTAPADDHATIVIVĒCANIKĀ.

Breaks off in the Arghyavismṛtinirṇaya.

---

R. No. **1401**.

Paper. 11¼ × 8⅝ inches. Foll. 266. Lines, 19 in a page. Telugu. Good.

Restored in 1914-15 from the Library MS. which has been already described under R. No. 1170 *ante.*

नामलिङ्गानुशासनव्याख्या.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ.

By Bommakanṭi Appayasūri.

Wants the first six pages.

---

R. No. **1402**.

Śrītāla. 11¾ × 2¼ inches. Foll. 265. Lines, 9 in a page. Grantha. Fair.

Purchased in 1914-15 from M.R.Ry. Jānakirāma Lāla of Triplicane.

(*a*) अनर्घराघवम्.

ANARGHARĀGHAVAM.

Foll. 1*a*—82*b*.

By Murāri. Same work as that described under R. No. 132(*b*) *ante.*

Complete.

---

(*b*) अनर्घराघवव्याख्या--विक्रमीया.

ANARGHARĀGHAVAVYĀKHYĀ : VIKRAMĪYĀ.

Foll. 83*a*—265*b*.

By Mānavikrama. Same work as that described under R. No. 132(*a*) *ante.*

Breaks off in the forty-seventh stanza of the sixth Aṅka.

## R. No. **1403.**

Palm-leaf. 17¾ × 1½ inches. Foll. 156. Lines, 8 in a page. Telugu. Injured.

Purchased in 1914–15 from M.R.Ry. S. Gōpālācāriyar of Villiyambākkam.

The first 2 leaves are broken in the beginning.

### वेदान्तसिद्धान्तसारः.

### VĒDĀNTASIDDHĀNTASĀRAḤ.

A treatise containing the leading principles of the Advaita school of the Vēdānta and apparently based upon the Bhāmatī of Vācaspatimiśra and the Tattvadīpana of Akhaṇḍānandamuni: by Umāmahēśvara of Vellāla family.

Contains the first Paricchēda entitled Jīvēśvarabhēdabhaṅga complete and breaks off in the course of the second Paricchēda.

**Beginning:**

. . . . पदाम्बुजं भज निजात्मबोधक्षर-
न्मरन्दशरजर्झरीकृतनतार्तिदावानलम् ।
. . . . . . . . . . प्रकाश्याखिला-
नाचार्यं त्रिजगद्गुरुं प्रतिमुहुर्वाचस्पतिं तं नुमः ॥

त्यक्तुं नैव सुराद्दतः प्रभवति स्वस्यापि यो जीवति ।

* * * *

. . . . . . . चन्द्रमा इव पयः पयोनिधेः ॥

पातिव्रतीवास्य शरीरधारिणी
तिम्माम्बिकाख्या सहधर्मचारिणी ।

* * * *

. . . . . . . . . . . सेन पुष्टा
हृष्टा विशिष्टा जगति प्रतिष्ठाः ।

वेदान्तचिन्तासु निरन्तरायाः
स नीलकण्ठप्रभुरेष . . . . . . . . ॥

* * * *

तस्मात् ब्रह्मैव स्वमायाविद्यया विवर्तत इतीति । अस्य तत्त्वदीपनम् । एकमेव ब्रह्म अविद्यया जगदाकारेण विवर्तते चेत् तर्हि विद्यया अविद्याया (अपि वि) वर्तितत्वात् सकलमुक्त्यापात इत्याशङ्कच मतभेदं दर्शयति । तत्रेति, वेदान्तव्याख्यातॄणां मध्य इत्यर्थः ।

* * * *

इत्थं जीवविविक्तेश्वरस्य ब्रह्मवादिसमयबहिर्भूतत्वात् तदभावे च च्छिन्नमूलद्रुमन्यायेन जगत्कर्तृत्वस्य सुतरामभावात् जगतः कारणं प्रधानापरनाम कथमज्ञानमित्येव ब्रह्मवादिभिः शरणीकरणीयम् । तथाच जगत्कारणांशे साङ्ख्यवेदान्तसिद्धान्तयोरभेद इति सिद्धम् ।

**Colophon:**

इति श्रीवेल्लालकुलसंभवेनोमामहेश्वरेण विरचिते वेदान्तसिद्धान्तसारे जीवेश्वरभेदभङ्गो नाम प्रथमः परिच्छेदः ॥

नन्वेवं कौन्तेयराधेयन्यायेन कृत्स्नस्यापि ब्रह्मणः स्वाविद्यया जीवभावः । तथाच जीवविविक्तस्सर्वज्ञः

**End:**

आत्मबोधप्रकरणेऽपि ।

एवं निरन्तरं कृत्वा ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपाद्रोगानिव रसायनम् ॥

इत्युक्तम् । भामत्यां च ब्रह्मणो नित्यापरोक्षत्वादनंशत्वाच्च प्रत्ययावृत्तिरनर्थिका यद्यपि, तथापि देहान्तारोप्यवशात् सांशमिव तदध्यासवशात्परोक्षमिव च ब्रह्म । तथाच प्रत्ययावृत्तिर्युक्तेत्युक्तम् । यस्य तु वेदान्तवाक्यजन्यावृत्तिश्चैतन्यविषया तस्य तु चैतन्यस्य नित्यापरोक्षत्वान्निरंशत्वाच्च प्रत्ययावृत्तिरनार्थिकैव ।

* * * *

उभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव स यथा सैन्धवघनो-रसबाह्यः कृत्स्नो रसः.

---

## R. No. 1404.

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 129. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. S. Gōpālācāriyar of Villiyambākkam.

### (*a*) सामान्यनिरुक्तिविवेचनी.
### SĀMĀNYANIRUKTIVIVĒCANĪ.

Foll. 1*a*—124*a*. Fol. 124*b* is left blank.

On the importance in the use of certain words and expressions in the Sāmānyanirukti, which is a portion of Gadādhara's Tattvacintāmaṇidīdhitiprakāśikā described under No. 4040 of the D.C.S. MSS., Vol. VIII. The work is also called Auttarapatra and Bengālipatra.

Complete.

**Beginning:**

अनुमितिपदस्य . . . . . सामान्यपरत्वेऽतिप्रसङ्ग . . . . . . . . . . . . . . . . . . . मात्रेणाप्यतिप्रसङ्गवारणसंभवात् । न च स्वरूपासिद्धिसङ्ग्राहकं तदिति वाच्यम् ।

* * * *

ननु परामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकघटकत्वे प्रकृतपक्ष-साध्यकानुमितित्वस्य कार्यतावच्छेदकत्वे प्रयोजनाभावेन तदवच्छिन्नकार्यता-घटितलक्ष(ण)स्यासंभवः ।

**End:**

ननु भेदप्रतियोगितावच्छेदकेषु धर्मेषु भेदत्वकल्पने लाघवमनपायमति-रिक्तभेदकल्पने तत्रानन्तपदार्थानां सम्बन्धस्य तस्य प्रतियोग्यादिषु सम्ब-

न्धस्य च कल्पनीयतया अत्र कल्पे गौरवमेवेति चेन्न । भेदप्रतियोगितावच्छेदकातिरिक्तमात्रमत्राभिप्रेतम् । न तु कुत्राप्यनन्तर्भावोऽपि तादृशभेदकूटवत्त्वप्रकारकप्रमाविशेषत्वाभावस्यैव तादृशभेदत्वं कल्पयितुमुचितमिति तादृग्ग्रन्थाशयात् भेदकूटस्य एकत्र द्वयमिति रीत्या भानाङ्गीकारेणेदंभावप्रतियोगिताकाभावस्य जगदीशोक्तरीत्याऽभावस्वरूपत्वाङ्गीकारे तु तादृशभेदकूटप्रकारकप्रमाविशेष्यत्वाभावस्यापि प्रतियोगितावच्छेदकत्वसंभवादसङ्गतिरेवेति ध्येयम् ॥

---

(*b*) बाधक्रोडपत्रम्.

BĀDHAKRŌḌAPATRAM.

Foll. 125*a*—129*b*.

Similar to the work described under No. 4273 of the D.C.S. MSS., Vol. VIII.

Incomplete.

**Beginning:**

उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्तप्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यबोधीयविषयतान्तःपातिप्रकारत्वावच्छिन्नप्रतिबध्यतानिरूपिता सती.

* * * *

स्वनिरूपितविषयताकत्वमिति समुदितार्थः । अथात्र स्वनिरूपितप्रतिबध्यतायां निवेश्यं तावतैव वह्निव्याप्याभाववह्न्यभावोभयवान् पर्वत इत्यादौ वह्निव्याप्यवत्पर्वते नाव्याप्तिः ।

**End:**

तादृशसत्प्रतिपक्षस्य च वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वं प्रतिबन्धकतायां निवेश्यते । तदेतत्कल्पद्वयमपि साधु । अनुमितिनिष्ठजन्यतापदम् अनुमितित्वावच्छिन्नजन्यताप(रम्) ।

---

R. No. **1405.**

Palm-leaf. 14¼ × 1⅝ inches. Foll. 29. Lines, 10 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. S. Gōpālacāriyar of Villiyambākkam.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4049 of the D.C.S. MSS., Vol. VIII.

Contains the Pañcalakṣaṇī only complete.

The name of the scribe and the date of transcription are given thus:

प्रजोत्पत्तौ पौषशुक्लतृतीयास्थिरवासरे ।
तातदेशिकदासेन लिखिता पञ्चलक्षणी ॥

---

## R. No. 1406.

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 14. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1914–15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

विजयविक्रमव्यायोगः.

VIJAYAVIKRAMAVYĀYŌGAḤ.

Foll. 1*a* – 14*a*. Fol. 14*b* contains a few lines of Narakāsuravijayavyāyōga.

By Āryasūryakavi of Kauṇḍinyagōtra. Same work as that described under R. No. 1367 *ante*.

The scribe of the original manuscript is said to be Lakṣmīnārāyaṇa, son of Kandarpa Sitārāma Śāstri, it having been completed on the 9th day of the dark fortnight of the Adhika Śrāvaṇa month in the year Krōdhi.

Complete.

---

## R. No. 1407.

Palm-leaf. $16 \times 1\frac{1}{2}$ inches. Foll. 37. Lines, 9 in a page. Telugu. Good.

Presented in 1914–15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

(*a*) वासवदत्ता.

VĀSAVADATTĀ.

Foll. 1*a*—21*b*.

By Subandhu. Same work as that described under R. No. 734(*a*) *ante*.

Complete.

---

(*b*) वासवदत्ताव्याख्या.

VĀSAVADATTĀVYĀKHYĀ.

Foll. 22*a*—37*a*. Fol. 37*b* is left blank

Same work as that described under R. No. 821(*b*) *ante*.

Complete.

---

R. No. **1408.**

Palm-leaf. 17⅜ × 2⅛ inches. Foll. 84. Lines, 9 in a page. Telugu. Good.

Presented in 1914-15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada

गौतमीमाहात्म्यम्.

GAUTAMĪMĀHĀTMYAM.

On the origin, sacredness and religious importance of the river Gautamī, which is presumably the same as the Gōdāvarī.

Contains Adhyāyas one to ninty-three as found in the Brahmapurāṇa and breaks off in the ninty-fourth Adhyāya thereof. The subject headings of these Adhyāyas are given below :—

१. तीर्थभेदवर्णनम्.
२. गङ्गोत्पत्तौ शम्भुविवाहसम्बन्धः
३. ब्रह्मकमण्डलुदानम्.
४. गङ्गामहेश्वरजटागमनम्.
५. विनायकगौतमव्यापारः.
६. गौतम्यवतरणम्.
७. तीर्थमाहात्म्यवर्णनम्.
८. गङ्गावतरणम्.
९. वाराहतीर्थवर्णनम्.
१०. कपोततीर्थवर्णनम्.
११. कार्त्तिकेयतीर्थवर्णनम्.
१२. कृत्तिकातीर्थवर्णनम्.
१३. दशाश्वमेधतीर्थवर्णनम्.
१४. पैशाचतीर्थवर्णनम्.

१५. क्षुधातीर्थवर्णनम्.
१६. इन्द्रतीर्थवर्णनम्.
१७. जनस्थानतीर्थवर्णनम्.
१८. भानुतीर्थवर्णनम्.
१९. गारुडतीर्थवर्णनम्.
२०. गोवर्धनतीर्थवर्णनम्.
२१. गालवतीर्थवर्णनम्.
२२ विश्वामित्रादितीर्थवर्णनम्.
२३. श्वेततीर्थवर्णनम्
२४. शुक्रसञ्जीवनतीर्थवर्णनम्.
२५. इन्द्रतीर्थादिवर्णनम्.
२६. पौलस्त्यादितीर्थवर्णनम्.
२७. अग्न्यादितीर्थवर्णनम्.
२८. ऋणविमोचनतीर्थवर्णनम्.
२९. सुपर्णसङ्गमतीर्थवर्णनम्.
३०. पौरूरवसब्रह्मतीर्थवर्णनम्.
३१. मृगव्याधब्रह्मतीर्थवर्णनम्.
३२. शम्यादिदशतीर्थवर्णनम्.
३३. हरिश्चन्द्रादितीर्थवर्णनम्.
३४. पूर्णादिनदनदीवर्णनम्.
३५. प्रवरासङ्गमतीर्थवर्णनम्.
३६. वृद्धसङ्गमतीर्थवर्णनम्.
३७. गतिसौभाग्येश्वरादितीर्थवर्णनम्.
३८. चक्रतीर्थवर्णनम्.
३९. पिप्पलादितीर्थवर्णनम्.
४०. नागतीर्थवर्णनम्.
४१. नवमातृतीर्थवर्णनम्.
४२. ब्रह्मशिरोलिङ्गशिवतीर्थवर्णनम्
४३. विष्णुतीर्थवर्णनम्.
४४. शेषतीर्थवर्णनम् Incomplete.
४५ to ५७ Wanting.
५८. रामतीर्थवर्णनम्. (Wants the beginning).
५९. पुत्रतीर्थवर्णनम्.
६०. यमाग्नितीर्थवर्णनम्.
६१. तपस्तीर्थवर्णनम्.
६२. दैवतीर्थवर्णनम्.
६३. तपोवननदीसङ्गमेश्वरदेवीतीर्थादिवर्णनम्.
६४. आपस्तम्बसोमेश्वरादितीर्थवर्णनम्.
६५. सोमेश्वरतीर्थवर्णनम्.
६६. बाणादितीर्थवर्णनम्.
६७. यक्षिणीसङ्गमदुर्गादितीर्थवर्णनम्.
६८. शुक्लतीर्थवर्णनम्.
६९. चक्रतीर्थादिवर्णनम्.
७०. वाणीसङ्गमवागीश्वरादितीर्थवर्णनम्.

७१. मौद्गल्यविष्णुतीर्थवर्णनम्.
७२. लक्ष्मीतीर्थवर्णनम्.
७३. भान्वादितीर्थवर्णनम्.
७४. खड्गतीर्थवर्णनम्.
७५. अन्विन्द्रात्रेयदैतेयादितीर्थवर्णनम्.
७६. कपिलासङ्गमतीर्थवर्णनम्.
७७. Wanting.
७८. दैत्यदेवस्थानतीर्थवर्णनम्.
७९. सिद्धतीर्थवर्णनम्.
८०. पदोष्णीसङ्गमतीर्थवर्णनम्.
८१. मार्कण्डेयतीर्थवर्णनम्.
८२. कालाञ्जनादितीर्थवर्णनम्.
८३. अप्सरोऽयनगङ्गासङ्गमतीर्थवर्णनम्.
८४. पापनाशनतीर्थवर्णनम्
८५. कोटीश्वरच्छायातीर्थवर्णनम्.
८६. कुण्डलेश्वरादितीर्थवर्णनम्.
८७. मुक्तीश्वरतीर्थवर्णनम्.
८८. व्याधतीर्थवर्णनम्.
८९. मृतसञ्जीवनचक्षुस्तीर्थवर्णनम्.
९०. उर्वशीतीर्थवर्णनम्.
९१. सप्तगोदावरीपृथग्भावसमुद्रतीर्थवर्णनम्
९२. ऋषितीर्थवर्णनम्.
९३. गङ्गासागरसङ्गमवर्णनम्.

**Beginning:**

श्रीनारदः—

तपसां यज्ञदानानां तीर्थानां पावनं शुभम् ।
इति श्रुतं मया त्वत्तः तीर्थानां चरितं पुनः ॥

* * * *

श्रोतुमिच्छामि तत्सर्वं वद सत्यं सुरेश्वर ।
सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते ॥

ब्रह्मोवाच—

चतुर्विधानि तीर्थानि स्वर्गमर्त्यरसातले ।
दवानि मुनिशार्दूल आसुराण्यार्षाणि च ॥

* * * *

यशसः फलभूत्यर्थं निर्मितानि मनीषिभिः ॥
स्वतो भूतानि दैवानि यत्र क्वापि जगत्त्रये ।
पुण्यतीर्थानि चान्यानि तीर्थभेदो मयोदितः ॥

**Colophon:**

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये तीर्थभेदवर्णनं नाम प्रथमोऽध्यायः ।

**End:**

शृण्वत्सु लोकपालेषु जगादेदं स गौतमः ।
यावत्सागरगा देवी निस्सृता ब्रह्मणो गिरेः ॥
सर्वत्र सर्वदा शर्व स्थातव्यं देव(पूजिता) ।
गुणवन्ती महाप्राज्ञा गौतमी तु सदा नृणाम् ॥
सर्वत्र सर्वदा पुण्या को न्वन्याद्गुणकीर्तनम् ।
वक्तुं शक्तस्ततस्तस्मै नम इत्येवमुच्यते ॥

**Colophon:**

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये गङ्गासागरसङ्गमवर्णनं नाम त्रिणवतितमोऽध्यायः ।

श्रीनारदः—

त्रिदेवत्यां सुरेशान गङ्गां ब्रूषे सुरेश्वर ।
ब्राह्मणानाहतां पुण्यां जगतः पावनीं शुभाम् ॥

* * * *

निश्चेष्टोऽथ निरुत्साहः पतितः शोकसागरे ।
दिनावसाने शर्वर्यामुदिते चन्द्रमण्डले ॥
एकादश्यां शुक्लपक्षे तत्र याति विभीषणः ।

स तु ।

R. No. **1409.**

Palm-leaf. 15¾ × 1½ inches. Foll. 22. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1914–15 by M.R.Ry. D. V. Prakāśa Row Garu, Municipal Commissioner of Cocanada.

रामाभ्युदयचम्पुः.

RĀMĀBHYUDAYACAMPUḤ.

A work in prose and verse based on the story of Rāma: by Rāma of Dēvulapalli family.

The portion contained in this manuscript begins with the description of Ayōdhyā and concludes with the birth of Rāma. The leaves are wrongly arranged and not numbered properly.

Incomplete.

**Beginning:**

अस्ति स्वस्तिकृतिप्रतीतहृदयैर्ध्वस्तामिषा(खिला)न्धस्तम-
स्तोमार्कान्वयवास्तवस्तुतिपरैरिन्द्रादिसर्वामरैः ।
न्यस्तस्वस्तरुशस्तनिस्तुलसुमस्तोमैस्तरां विस्तृत-
स्फारस्फूर्तिकरत्नसौधमधुरा साकेतनामा पुरी ॥

इत्थमतिवृत्ते प्रवृत्ते यतिवृत्ते दुर्वेदनिर्वेदकृतोदीर्णाविवर्णतास्वेवाधिगत-जीर्णरुरुधूसररोमसवर्णतासु, उच्चतरतरूच्चलदाकुलाकुलशकुनकुलकलकला-लापकलापमुखरितमुखास्ववस्तृतास्वाशासु विशालतामधिशायिनी(नि)रोधःकुहरे विरहविधुरकोकवधूशोकधूममण्डलितकर्मन्दिचिताज्वलनज्वालगिलनादिव-विलयमुपयतीषूडुततीषु . . . . . . . . . . .

वृतो नु गौरेष नवातपप्रभाकरम्भकौसुम्भितसत्परिच्छदैः ।
पुरं प्रवासच्छविवर्णजङ्गमागमान्तरुल्लासि मधुर्यदागमत् ॥

श्रीरामाभिधदिव्यतारकपरब्रह्माङ्घ्रिपद्मालिना
श्रीमद्देवुलपल्लिवंशमणिना रामाख्यसङ्ख्यावता ।

श्रीरामाभ्युदयाभिधे विरचिते सम्यग्बुधेष्टप्रदे
चम्पूकल्पतरौ रसोज्ज्वलतनुर्गुच्छोऽयमादिश्शुभः ॥

**End:**

सरस्वत्यर्कतनये सुमित्रां जाह्नवीमिव ।
चक्रुः पायसभागाभ्यां परभागवतीमुभे ॥

* * * *

विजयशरदि चैत्रे शुक्लपक्षे नवम्यामदितिभयुजि लग्ने कर्कटे मेषभाजि ।
सवितरि खचराणां पञ्चके चोच्चसंस्थे हरिरुदभवदुर्व्यामिन्दुयुक्ते च जीवे ॥
तनयं जनयामास तनया कोसलेशितुः ।
प्राचीवाथ—

---

R. No. **1410.**

Palm-leaf. $12\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 248. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1914–15 by M.R.Ry. G. Ārāvamuda Ayyangar Avargal of Purasavakkam.

The first 6 foll. contain a list of some of the Vratas, etc.

(*a*) घटस्फोटाविधिः.

GHAṬASPHŌṬAVIDHIḤ.

Foll. 7*a*—9*b*.

Incomplete.

Similar to the work described under No. 3057 of the D.C.S. MSS., Vol IV.

**Beginning:**

क्वचित्तु जीवगोऽप्यन्त्यकर्माशौचं कार्यम्। यथा प्रायश्चित्तानिच्छोः पतितस्य घटस्फोटे "पतितस्योदकं कार्यं सपिण्डैः बान्धवैस्सह।
निन्दितेऽहनि सायाह्ने ज्ञातृतः(त्यृत्विग्)गुरुसन्निधौ" ॥
दासीघटमपां पूर्णं पर्यस्येत् प्रेतवत्सदा ।
अहोरात्रमुपासीनः आशौचं बान्धवैस्सह ॥
इति मनूक्तेः.

**End:**

सर्वाभावे धर्मपुत्रो वा कार्यः—

अपुत्रेण सुतः कार्यः यादृक्तादृक्प्रयत्नतः ।

पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च ॥

इति व्यासवचनात्.

---

(b) निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

Foll. 10*a*—248*a*. Fol. 248*b* is left blank.

By Kamalākara Bhaṭṭa, son of Rāmakṛṣṇa Bhaṭṭa. Same work as that described under No. 3128 of the D.C.S. MSS., Vol. VI.

Contains the Paricchēdās one and two complete and the third incomplete.

---

R. No. **1411.**

Palm-leaf. 16 × 1¼ inches. Foll. 170. Lines, 6 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. G. Ārāvamuda Ayyangar Avargal of Purasavakkam.

Two foll. are left blank.

विष्णुपुराणम्—आत्मप्रकाशिकासहितम्.

VIṢṆUPURĀṆAM WITH ĀTMAPRAKĀŚIKĀ.

The commentary is also called Svaprakāśika. By Śrīdhara-svāmin. Same work as that described under No. 2286 of the D.C.S. MSS., Vol. IV, Part I.

Wants the beginning. Contains from the first Adhyāya of the third Aṁśa to the end of the fourth Aṁśa.

The manuscript is said to have been copied by Suppa Śastri of old Vellore.

## R. No. **1412.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 127. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Purasawakkam.

Two leaves are wanting in the middle.

### रामायणव्याख्या—रामायणदीपिका.

### RĀMĀYAṆAVYĀKHYĀ—RĀMĀYAṆADĪPIKĀ.

Same work as that described under R. No. 119(*a*) *ante*. By Vaidyanāthadīkṣita.

Breaks off in the forty-sixth Sarga of the Āraṇyakāṇḍa and contains the Kiṣkindhākāṇḍa complete.

The name of the scribe and the date of transcription are given thus:

विरोधिकृन्नामसंवत्सरे कृत्तिकामासि दशमीदिने सौम्यवारे श्रीमद्भू-शरण्यपुरवासिना वेङ्कटरामशास्त्रिणा किष्किन्धाकाण्डदीपिका लिखिता ॥

---

## R. No. **1413.**

Palm-leaf. $13\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 115. Lines, 9 in a page. Grantha. Much injured.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Purasawakkam.

### (*a*) वृद्धाचलमाहात्म्यम्.

### VṚDDHĀCALAMĀHĀTMYAM.

Foll. 1*a*—48*b*.

On the holiness and religious importance of the Śiva shrine at Vṛddhācala also called Ciragiri and the river Maṇimuktā flowing by its side.

Complete; as found in Adhyāyas 1—17 of the Brahmakaivartapurāṇa.

**Beginning:**

वन्दे महेश्वरं देवं विघ्नेशं षण्मुखं गुहम् ।
गणेशं नन्दिमुख्यांश्च शिवभक्तान्महामुनीन् ॥

उक्तं समस्तं भवतां महात्मनां माहात्म्यमेतद्धि कवेरजायाः ।
वृद्धाचलस्यापि मुने प्रभावं त्वं वक्तुमर्हस्यखिलं च मह्यम् ॥
. . . . रेन्द्रेण सुमन्तुरित्थं मुनिः प्रसन्नः करुणार्द्रचेताः ।
तं देववर्माणमुवाच साधु पृष्टस्त्वया धर्मकथाप्रसङ्गः ॥

* * * *

सुमन्तुः—

वृद्धाचलो नाम गिरिः प्रसिद्धः शिवप्रियस्सर्वमहीधरेभ्यः ।
अस्त्यत्र भूमौ परिशोभमानो देव . . . . . . . . ॥

* * * *

चिरगिरिरपि . . . गोपर्वतश्चापि पूज्यो
हिमगिरितनयेयं रत्नमुक्तानदीयम् ।
इति भजति हि यो . . . . . . . .
. . . . . . . . प्राप्नुयान्मोक्षलक्ष्मीम् ॥

End:

इति परमकृपाया संवृतो नाथशर्मा
चिरधरणिधरेशो नाममाहात्म्यमुक्त्वा ।
नरवर विरराममा . . . . . . . .
. . . . . . . . ति च गौर्यै प्राह देवो महेश ॥
त्वमपि च नृप गच्छेः श्रेयसे ते यदिच्छा
चिरगिरिमनवद्यां स्नाहि तावर्चयेशौ ।
प्रवितरत विविक्तं शं कृपो . . . . . .
. . . . . . मतर्क्यं यास्यसीशास्पदं तत् ॥

Colophon:

इति श्रीब्रह्मकैवर्तकाख्ये महापुराणे तीर्थप्रशंसायां पार्वतीपरमेश्वरसंवादे अनवद्यानन्द . . . . . . . . . . . . . . सिकथनं नाम सप्तदशोऽध्यायः ॥

इति वृद्धगिरिमाहात्म्यं समाप्तम् ॥

---

(b) कमलालयमाहात्म्यम्.

KAMALĀLAYAMĀHĀTMYAM.

Foll. 49a—115b.

On the sanctity of the tank Kamalālaya (literally the abode of lotuses) and the famous Śiva shrine close by in Tiruvālūr in the Tanjore district.

Breaks off in the forty-seventh Adhyāya; as found in the Skāndapurāṇa.

**Beginning:**

वागीशाद्याः . . . गजाननम् ॥

ऋषयः—

त्वत्तः श्रुतानि तीर्थानि स्थानानि विविधानि च ।
शुभानि . . . . . . . . . . . . . . . ॥
तेषा(म्पुण्य) तमे क्षेत्रे द्वे एव कथिते त्वया ।
सर्वसिद्धिकरे स्थाने काशी च कमलालयः ॥
तत्र काशी यथोत्पन्ना यथा सिद्धिं प्रयच्छति ।

* * * *

इदानीं श्रोतुमिच्छामस्त्वन्मुखात्कमलालयम् ।
कीदृशं तत्कथं वात्र सिद्धयो वसतां नृणाम् ।
के विशेषाश्च तत्रापि . . . . . . . . ॥

* * * *

इति मुनिभिरुदारैस्स्तूयमानो वचोभिः
प्रभुरवददतीव प्रीतिमान् पद्मयोनिः ।
परमिव परितोषं कस्य भूतार्थवाचः
. . . . . . . . यमाणस्य पुंसः ॥

**Colophon:**

इति श्रीमत्स्कान्दे पुराणे कमलालयमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

आगत्य मर्त्यलोकेभ्यः श्रुतं ते नियमाद्यथा ॥
एतद्यः शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
सर्वपापविनिर्मुक्तो जीवलोकमवाप्नुयात् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे तृतीयपरिच्छेदे कमलालयमाहात्म्ये पञ्चचत्वारिंशोऽध्यायः ॥

* * * *

**Colophon:**

इति श्रीस्कान्दे पुराणे तृतीयपरिच्छेदे कमलालयमाहात्म्ये षट्चत्वारिंशोऽध्यायः ॥

(तदा देवा) अयाचन्त शोषणं च पयोनिधेः ।
ततस्तानब्रवीद्देवानगत्स्यो भगवानृषिः ॥

---

R. No. **1414.**

Śrītāla. $8\frac{3}{8} \times 2\frac{1}{4}$ inches. Foll. 47. Lines, 12 in a page. Grantha. Good.

Presented in 1914–15 by M.R.Ry. Ārāvamuda Ayyangar Avargal of Puraswakkam.

(*a*) **शिवकेशादिपादान्तवर्णनम्.**

ŚIVAKĒŚĀDIPĀDĀNTAVARṆANAM.

Foll. 1*a*—7*b*.

A eulogistic description of the various parts of the body of Śiva beginning with the hair on the head and ending with the feet: by Śaṅkarācārya.

Complete.

**Beginning:**

कलयेऽपर्णया देव्या कुटुम्बिकरुणाकरम् ।
लम्बोदरसुराध्यक्षं स्कन्दपुत्रं परं महः ॥
देयासुर्मूर्ध्निराजत्सरससुरसरित्प्रान्तपर्यन्तनिर्यत्-
प्रांशुस्तम्बाः पिशङ्गास्तुलितपरिणतारक्तशालीलतापः ।

दुर्वारावर्तगर्तश्रितनिखिलजनोद्धारणे रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखाः शर्म शार्वाः कपर्दाः ॥

**End:**

दीप्यन्मूर्धेन्दुखण्डः शितशिखनखराच्छिन्नलोकेशमुण्डः
कम्राकारोरुदण्डः प्रलयहुतवहप्रस्फुरद्बाहुदण्डः ।
चण्डीष्टोद्योतशौण्डः स्वभुजनियमिताखण्डवाणीधवाण्डः
खण्डीभूतारिखण्डः कलयतु भगवान् शर्म शम्भुः प्रचण्डः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिता शिवकेशादिपादपरागपर्यन्तस्तुतिस्समाप्ता ।

श्रीमत्काञ्चीक्षेत्रान्तर्गतवेलाप्पाकाग्रहारवासिना भगवद्भक्तेन अय्याख्येन वीरराघवेण लिखितेयं शिवस्तुतिः संपूर्णा ॥

---

(*b*) अपस्माररोगहरप्रयोगः.

APASMĀRARŌGAHARAPRAYŌGAḤ.

Foll. 7*a*—10*b*. Fol. 8*b* is left blank.

On the performance of certain pacificatory ceremonies and the giving of certain gifts held to be efficacious in the curing of diseases like epilepsy, etc.

This forms the 20th Taraṅga of the Karmavipāka forming part of the Mahārṇavatantra

**Beginning:**

धूर्तोऽपस्माररोगः स्यात् स तद्दोषस्य शान्तये ।
ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम् ॥

ब्रह्मकूर्चलक्षणं कृच्छ्रप्रकरणे दर्शितम् । धेनुदानमन्त्रस्तु नवग्रहयज्ञप्रकरणे दर्शितः । अथ प्रकारान्तरेणापस्मारहरं कर्मविपाकसङ्ग्रहे—

गुरौ स्वामिनि वा यस्तु प्रतिकूलं करोति यः ।
सोऽपस्मारी भवेत्तत्र कुर्याच्चान्द्रायणं नरः ॥
सदसस्पतिमन्त्रेण चर्वाज्यं जुहुयात्ततः ।
कया न इति सूक्तं च जपेत् ब्राह्मणतर्पणम् ।
कुर्याद्धिरण्यदानं च शक्त्या रोगस्य शान्तये ॥

चान्द्रायणलक्षणं कृच्छ्रप्रकरणे द्रष्टव्यम् । चर्वाज्यमिति मिलितेनैव होमसाधनेन पृथक् पृथक् । होमसङ्ख्या च रोगानुसारेणाष्टोत्तरशताद्ययुतान्ताः कल्प्याः । एवं सूक्तजपेऽपि ।

**End:**

अथापस्माररहरमूर्तिदानम् । तल्लक्षणं च अनुक्तेषु च रोगेष्वित्यारभ्य शूलरोगप्रकरणे दर्शितमेवाभिज्ञेयम् । पूजाविधिस्तु परिभाषायां रोगप्रतिमादानविधौ अन्तको देवता तत्रेत्यादिना प्रदर्शितम् । इत्यपस्माररोगहर-मूर्तिदानम् ॥

**Colophon:**

इति विंशतिस्तरङ्गः ॥

---

(*c*) ईशावास्योपनिषत्.

ĪŚĀVĀSYŌPANIṢAD.

Foll. 11*a* and 11*b*.

Same work as that described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*d*) कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Foll. 11*b*—16*a*.

Same work as that described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(e) प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Foll. 16a—19a.

Same work as that described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(f) मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Foll. 19a—21b. Foll. 22 to 25 are left blank.

Same work as that described under No. 713 of the D.C.S. MSS., Vol. I, Part III.

Incomplete.

---

(g) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 26a—34b.

By Śaṅkarācārya. Same commentary as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्य-श्रीमच्छङ्करभगवत्पादकृतौ वाजसनेयिसंहितोपनिषद्भाष्यं समाप्तम् ॥

---

(h) ईशावास्योपनिषद्भाष्यटिप्पणम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 34b—42b.

By Śivānandayati. Same work as that described under No. 312 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(i) केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Foll. 43*a*—47*b*.

By Śaṅkarācārya. Same work as that described under No. 387 of the D.C.S. MSS., Vol. I, Part III.

Incomplete.

---

R. No. **1415.**

Palm-leaf. $11\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 151. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1914–15 by M.R.Ry. E. R. Śrīnivāsarāghavācārya, Temple Doctor, Rāmēśvaram.

(*a*) महागणपतिकवचम्.

MAHĀGAṆAPATIKAVACAM.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

This Kavacamantra is addressed to Gaṇapati or Vināyaka. It is said to have been revealed by Viṣṇu to Brahman; and its due repetition is held to be efficacious in removing obstacles of various kinds and in the accomplishment of the four principal aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

Complete; as found in the Rudrayāmala.

**Beginning :**

विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ।
उमासुतं देववरप्रसादं हरस्य पुत्रं गणबृन्दसेव्यम् ॥
सुरासुराणां परमं पवित्रं विनायकं सदा शरणमहं प्रपद्ये ।

श्रीगणाधिपतये नमः, श्रीमहागणपतये नमः—

श्रीपार्वत्युवाच—

मन्त्राथ जगतां नाथ मम प्रेरणकारण ।
गणेशस्य तु यन्मन्त्रं श्रुतं देव महेश्वर ॥
इदानीं श्रोतुमिच्छामि कवचं तस्य दुर्लभम् ।
तद्वदस्व दयासिन्धो कृपया मम शङ्कर ॥

ईश्वर उवाच—

श्रृणु देवि महाभागे गणेशकवचं परम् ।
यद्धृत्वा पठनात् सद्यो विघ्ननाशो भविष्यति ॥
विष्णुना कथितं पुण्यं कवचं ब्रह्मणे मुदा ।
पठित्वा कृतवान् सृष्टिमेकभावं पितामहः ॥

* * * *

अस्य श्रीमहागणपतिकवचस्तोत्रमहामन्त्रस्य श्रीमहेश्वर ऋषिः, विराट् छन्दः, श्रीमहागणपतिर्देवता । श्रीमहागणपतिप्रसादसिद्ध्यर्थे धर्मार्थकाममोक्ष-चतुर्विधफलपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥

ओं गं पातु मस्तकं देवो गणनाथो महाबलः ॥
एकाक्षरो महामन्त्रः सर्वदेवनमस्कृतः ।
ओं ह्रीं ह्रीं क्लीं च वलनं गौं गं गणपते हृदम् ॥

* * * *

इति ते कथितं भद्रे कवचं परमाद्भुतम् ।
पठित्वा धारयित्वा च सर्वमाशु समालभेत् ॥

**End:**

ज्ञात्वा तु कवचं यो वै जपेद्भक्तिपुरस्सरम् ॥
जपान्ते कवचं दिव्यं पठेन्नित्यमन्निय(त)न्द्रितः ।
सर्वान् कामान् समासाद्य गणेशस्य प्रियो भवेत् ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीपार्वतीपरमेश्वरसंवादे महागणपतिकवचं समाप्तम्॥ संपूर्णमस्तु ॥

---

(*b*) महागणपतिपञ्चावरणस्तोत्रम्.

MAHĀGAṆAPATIPAÑCĀVARAṆASTŌTRAM.

Foll. 5*a*—12*b*.

A eulogy on God Gaṇapati represented by a mystic diagram with five enclosures containing subsidiary deities.

Complete; as found in the Mantraprakāśikā.

**Beginning:**

सृष्टी(ष्टिस्थि)त्युपसंहारातिरोधानानुग्रहात्मकम् ।
महागणपतिं वन्दे पञ्चावरणसंयुतम् ॥
अरुणं वारणमुखं दशबाहुं त्रिलोचनम् ।
प्रियालिङ्गितसद्गात्रं महागणपतिं नुमः ॥
सर्गस्थितिलयादीनां विश्वस्यास्यैककारणम् ।
महागणपतिं ध्यायेत् पञ्चावरणसंमितम् ॥

**End:**

मध्ये तथा कुण्डवरस्य तुल्या(ल्यं) प्रागुक्तरूपं गणनाथमिष्ट्वा ।
अग्निं समाधाय पयोघृताढ्या(भ्या)मुन्मत्तपुष्पैरपि शर्कराभिः ॥
क्षौद्रेण वान्येन पृथक् क्रमेण हुत्वा(ता)नि लक्षाण्यपि कुण्डमध्यात् ।
बेतालकाम्यां गुलिकां लभेत तां धारय स्यादणिमादिसिद्धिः ॥
एवं खड्गाजनपादुकाभ्यां यद्येतदिष्टं लभते तु मन्त्री ।
किन्तेन लभ्यं भुवनत्रयेऽस्मिन् नास्त्येव तत्साधकपुङ्गवस्य ॥

**Colophon:**

इति श्रीमन्त्रप्रकाशिकायां महागणपतिपञ्चावरणस्तोत्रमन्त्रयन्त्रोद्धार-होमप्रकारस्समाप्तः ॥ सम्पूर्णः ।

There are some Stōtras and Mantras relating to Vināyaka in the 13th fol.

---

(*c*) महागणपतिस्तवः.

MAHĀGAṆAPATISTAVAḤ.

Foll. 14*a*—17*b*.

Same work as that described under No. 9402 of the D.C.S. MSS., Vol. XVIII, wherein this work has been mentioned as Gaṇapatimantrākṣarāvalistōtra in the list of other works.

Complete.

**End :**

अग्रे तु बिल्वतरुमूलरमारमेशौ तद्दक्षिणे वटजुषौ सउमावृषाङ्कौ ।
पृष्ठे तु पिप्पलजुषौ रतिपुष्पबाणौ सव्ये प्रियङ्गुसजुषौ धृतभूवराहौ ॥

**Colophon :**

इति श्रीमहागणपतिमन्त्रावलिस्तोत्रं संपूर्णम् ॥

---

(*d*) त्रिपुराप्रातर्भजनम्.

TRIPURĀPRĀTARBHAJANAM.

Foll. 17*b*—18*b*.

Five stanzas addressed in praise of Tripurā, who is a manifestation of Śakti, and intended to be repeated in the early morning.

Complete.

**Beginning :**

प्रातस्स्मरामि भजतामभयङ्करं तं
पादारविन्दमतिसुन्दरमम्बिकायाः ।
दुस्सो(स्स्व)प्नदोषहरणं करणं सुखानां
सु स्सो(स्व)प्नबोधमखिलौघनिबर्हणं च ॥

**End :**

यः श्लोकपञ्चकमिदं पठति प्रभाते
धर्मादिदं परहितं कथितं हरेण ।
यस्मिन्ददाति पदवीमणिमादिरूपां
दुर्गां तपोभिरचलां त्रिपुरा भा(भ)न(वा)नी ॥

**Colophon :**

इति श्रीत्रिपुरसुन्दरीप्रातर्भजनपञ्चकं संपूर्णम् ॥

One eulogistic stanza on the goddess Dēvī is found at the end of the colophon

---

(*e*) महात्रिपुरसुन्दरीत्रैलोक्यमोहनकवचम्.

MAHĀTRIPURASUNDARĪTRAILŌKYAMŌHANA-
KAVACAM

Foll. 19*a*—23*b*.

Similar to the work described under No. 6335 of the D.C.S. MSS., Vol. XIII.

Complete; as found in the Rudrayāmala.

**Beginning :**

देवदेव जगन्नाथ सर्वलोकैकशङ्कर ।
शिव कारुण्यजलधे जगद्रक्षणकारण ॥
श्रीमत्रिपुरसुन्दर्या या विद्या भुवि दुर्लभम् ।
कृपया कथितं सर्वं श्रुतश्चाधिगतं मया ॥
प्राणनाथाधुना ब्रूहि कवचं मन्त्रविग्रहम् ।
त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥

**End :**

इदं कवचमावृत्त्या प्रत्यहं प्रजपेन्मनुम् ।
सर्वसिद्धिमवाप्याथ शिवेन समतां व्रजेत् ॥

**Colophon :**

इति श्रीरुद्रयामले श्रीपार्वतीपरमेश्वरसंवादे श्रीत्रैलोक्यमोहनकवचं संपूर्णम् ॥

The scribe adds the following stanzas :—

श्रीरामेश्वरवासेन श्रीवामदेवगुरुसूनुना ।
नरसिंहलिखितं कवचं परम् ॥

---

## (*f*) तुरीयाषोडशीश्रीराजराजेश्वरीकवचम्.

## TURĪYĀṢŌḌAŚĪŚRĪRĀJARĀJĒŚVARĪKAVACAM.

Foll. 24*a*—29*b*.

This Kavacamantra is addressed to the goddess Rājarājēśvarī, who is a manifestation of Śakti and who is represented by a prayer-formula consisting of sixteen syllables.

Complete.

This manuscript work is said to have been copied by **Narasiṁhan**, son of Vāmadēva Gurukkaḷ.

**Beginning:**

कैलासशिखरे रम्ये देवदेवं जगद्गुरुम् ।
शङ्करं परिपप्रच्छ कुमारः शिखिवाहनः ॥

श्रीस्कन्द उवाच—

श्रीगुरो जनका मह्यं पुत्रवात्सल्यवर्धन ।
कवचं षोडशाक्षर्या वद मे परमेश्वर ॥

श्रीईश्वर उवाच—

शृणु पुत्र महाभाग कवचं मन्त्रविग्रहम् ।
गोप्यात् गोप्यतरं गोप्यं गुह्याद्गुह्यतरं महत् ॥
तव स्नेहात् प्रवक्ष्यामि नाख्यातं यस्य(कस्य)चित् ।
ब्रह्मेशविष्णुशक्रादीन् मया यत् कथितं पुरा ॥

* * * *

अस्य श्रीकवचस्यास्य ऋषिरानन्दभैरवः ।
श्रीविद्या देवता छन्दो गायत्रीनृचि वृत्तिकम् ॥
रमा बीजं परा शक्तिर्वाग्भवं कीलकं स्मृतम् ।
मम सर्वार्थसिद्ध्यर्थे जपे तु विनियोगतः ॥

**End:**

इति परमरहस्यं सर्वयन्त्रार्थसारं
लभति परमभक्त्या निश्चलं निर्मलत्वम् ।
विलसति भुवि मध्ये पुत्रपौत्राभिवृद्धिं
धनसकलसमृद्धिं भोगमोक्षप्रदं च ॥

**Colophon:**

इति श्रीमन्त्रचूडामणौ श्रीशिवस्कन्दसंवादे त्रैलोक्यविजयाभेदं नाम तुरीयाषोडशीश्रीराजराजेश्वरीमहात्रिपुरसुन्दरीकवचं संपूर्णम् ॥

---

(*g*) महात्रिपुरसुन्दरीसौभाग्यकवचम्.

MAHĀTRIPURASUNDARĪSAUBHAGYAKAVACAM.

Foll. 30*a*—36*b*.

Similar to the work described under No. 7593 of the D.C.S. MSS., Vol. XIV.

Complete; as found in the Nityāsōḍaśikārṇava forming part of the Vāmakēśvaratantra.

**Beginning:**

कैलासशिखरे रम्ये सुखासीनं सुरेश्वरम् ।
गिरिशं गिरिजा नत्वा स्तोत्रं वेदार्थगर्भितम् ॥

* * * *

श्रीईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि सुन्दरि प्राणवल्लभे ।
सौभाग्यविद्याकामेशि सौन्दरि त्रिपुरा परा ॥

* * * *

अस्य श्रीराजराजेश्वरीमहात्रिपुरसुन्दरीसौभाग्यकवचस्तोत्रमहामन्त्रस्य श्रीमहेश्वर ऋषिः, देवी गायत्री छन्दः श्रीराजराजेश्वरीमहात्रिपुरसुन्दरी-देवता ।

**End:**

आबालमहिला भूपाः किमु मायाविमोहिताः ।
सर्वकार्याणि सिध्यन्ति पूजयेत् सुन्दरी सदा ॥

साक्षात त्रिपुरसुन्दर्याः संपूजावल्लभः प्रभुः ।
स एवानन्दचिरू(द्रू)पा भैरवस्समतां व्रजेत् (?) ॥

**Colophon:**

इति श्रीवामकेश्वरतन्त्रे सर्वतन्त्रोत्तमोत्तमे नित्याषोडाशिकार्णवे इह रूपाष्टकप्रस्तारे श्रीसौभाग्यविद्येश्वरीराजराजेश्वरीमहात्रिपुरसुन्दरेश्वरीसौभाग्यकवचं संपूर्णम् ॥

On fol. 37*a* two eulogistic stanzas on Tripurasundarī are found after the colophon.

(*h*) त्रिपुरसुन्दरीमालामन्त्रः.

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Foll. 37*b*—41*a*. Fol. 41*b*. is left blank.

Same work as that described under No. 6345 of the D.C.S. MSS., Vol. XIII.

Complete; as found in the Viśvasārōddhāra.

**End:**

शुद्धा नमोन्तस्वाहान्ततर्पणान्ता जपान्तिका ।
शक्तिमाला पञ्चधा स्याच्छिवमाला च तादृशी ॥
द्वन्द्वमाला पञ्चधा स्यान्माला पञ्चदशे(शी)रिता ॥

**Colophon:**

इति श्रीविश्वसारोद्धारे सर्वतन्त्रोत्तमे मन्त्रखण्डे श्रीपार्वतीपरमेश्वरसंवादे श्रीसहस्राक्षरीराजराजेश्वरीमहात्रिपुरसुन्दरीमालामन्त्रं संपूर्णम् ॥

One eulogistic stanza on Dēvī is found after the colophon.

---

(*i*) षोडशमकरन्दस्तवराजस्तोत्रम्.

ṢŌḌAŚAMAKARANDASTAVARĀJASTŌTRAM.

Foll. 42*a*—45*b*.

Same work as that described under No. 10807 of the D.C.S. MSS., Vol. XIX, but with different end and colophon as given below. In the colophon it is stated that the author of the work is Paraśivānandanātha, whereas, according to the colophon found at the end of the work referred to under No. 10807, the authorship is attributed to Kālidāsa.

Complete in sixteen stanzas including the Phalaśruti stanza; as found in the Rudrayāmala.

**End:**

पूजयित्वा विधानेन महात्रिपुरसुन्दरीम् ।
इमं स्तवं पठित्वा तु देवसायुज्यमाप्नुयात् ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीपरशिवानन्दनाथविराचिते (तं) श्रीमहात्रिपुरसुन्दरीषोडशमकरन्दस्तवं समाप्तम् ॥

---

(*j*) कल्याणस्तवराजः.

KALYĀṆASTAVARĀJAḤ.

Foll. 46*a*—48*b*.

Same work as that described under No. 10732 of the D.C.S. MSS., Vol. XIX, but with two different stanzas in the end and with colophon as given below. Its authorship is attributed to Manmatha.

Complete.

**End:**

कुवलयदलनीलं बर्बरं स्निग्धकेशं
पृथुतरकुचभारं क्रान्तकान्तावलग्नम् ।
किमिव बहुभिरुक्तैस्त्वत्स्वरूपं परन्ता(स्तात्)
सकलभुवनमातः सन्ततं सन्निधत्ताम् ॥
माणिक्यमङ्गलितसूत्रितवालि(ल)केन
मन्दास्मितेन मदनारुणपङ्कजेन ।
कालान्तदीर्घमणिमङ्गलसूत्रकण्ठीं
मातां विशालनयनां मनसा स्मरामि ॥

**Colophon:**

इति श्रीमन्मथेन विराचितं श्रीकल्याणस्तवराजं सम्पूर्णम् ॥

---

(*k*) चिन्तामणिस्तवराजः.

CINTĀMAṆISTAVARĀJAḤ.

Foll. 48*b*—60*b*.

This Mantra is addressed to Lalitā, who is a manifestation of Śakti, and its repetition is held to enable one to accomplish one's desires.

Complete; as found in the Brahmāṇḍōttarakhaṇḍa.

**Beginning:**

कल्याणायास्तु मे कापि वासनावारणाकृतिम्(:) ।
नीपारुणानिजाङ्कस्थं कामसौभाग्यकन्दलीम्(?) ॥
तन्महः कलये शोणं तरुणेन्द्ववतंसकम् ।
पाशाङ्कुशेक्षुकोदण्डपञ्चबाणलसत्करम् ॥

**End:**

यत्र यत्र चरतो यदा दृशौ तत्र तत्र धुरि मे सदा भवेत् ।
दैवतं किमपि दैन्यमोचकं पाटलं परिचितेक्षुकार्मुकम् ॥
ललितायाः स्तवं पद्यैर्ललितैरिह निर्मितः ।
पठतामन्वहं वक्तुं फलं सैव प्रगल्भते ॥

**Colophon:**

इति श्रीब्रह्माण्डोत्तरखण्डे श्रीललितोपाख्याने स्तोत्रखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीमच्चिन्तामणिस्तवराजः समाप्तः ॥

---

(*l*) **चिन्तामणिस्तोत्रम्.**

CINTĀMAṆISTŌTRAM.

Foll. 61*a*—67*b*.

Similar to the above. Its due repetition is held to be efficacious in curing one from diseases like epilepsy.

Complete; as found in Rudrayāmala.

**Beginning:**

अनर्घ्य(र्घ)मणिभूषणोज्ज्वलमुदारमाबध्नम(पद्मम्नमु)-
न्नमज्जगदधीश्वरं धृतशरेक्षुचापं परम् ।
समस्तसुखसिद्धिदं सकललोकसञ्जीवनं
सदोदितमुपास्महे किमपि वस्तु सर्वारुणम् ॥

* * * *

द्विपञ्चसिध्यै(द्धै)रणिमाप्रधानैः रत्नासनैः रक्तदुकूलवर्णैः ।
सार्धं च चिन्तामणिना कराभ्यां वराभयाभ्यां दधतीं च मुद्राम् ॥

**End:**

चिन्तामणिस्तोत्रमिदं पठिष्यन् पापैरपस्मारकृतैश्च रोगैः ।
मुक्तिश्चतुर्वर्गफलं लभेत गुरोः कृपालाभवशान्मनुष्यः ॥

**Colophon:**

इति श्रीरुद्रयामले श्रीमच्चिन्तामणिस्तोत्रं संपूर्णम् ॥

---

(m) सौन्दर्यलहरी.

SAUNDARYALAHARĪ.

Foll. 68*a*—85*b*.

Same work as that described under No. 10850 of the D.C.S. MSS., Vol. XIX.

Complete.

---

(n) शिवभुजङ्गम्.

ŚIVABHUJAṄGAM.

Foll. 86*a*—89*b*.

Similar to the work described under R. No. 610.

This eulogy is said to have been made by Rāvaṇa to please Śiva. The allusion herein is to the Puranic story relating to one of Rāvaṇa's monstrous adventures, viz., his attempt to lift up Mount Kailāsa and the trouble caused thereby.

Complete.

**Beginning:**

जटाकटाहसंभ्रमभ्रमन्निलिम्पानिर्झरी-
विलोलवीचिवल्लरीविराजमानमूर्धनी(नि) ।
धगद्धगद्धगज्ज्वलज्ज्व(ल)लाटपट्टपावके
किशोरचन्द्रशेखरे रति(:)प्रती(ति) क्षणं मम ॥

**End:**

स्तवं महेशितुर्दशास्यसंस्तुतं शुभावहं
पठन्त्यहर्निशं मुदा नरस्तु यः शिवाग्रतः ।

ससाधुतामरेशभोगमप्यवाप्य शीघ्रतः
सुखेन शैवमालयं व्रजेत्सुरेन्द्रवन्दितः ॥

**Colophon:**

इति श्रीमदुत्तररामायणे श्रीकैलासपर्वतोद्धारे श्रीसामगानात् परं रावण-विरचितं शिवभुजङ्गं संपूर्णम् ॥

Fol. 90 contains a few eulogistic stanzas on Vighnēśvara and Tripurā.

(*o*) ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Foll. 91*a*—113*a*. Fol. 113*b* is left blank.

Same work as that described under R Nos. 610(*b*) and 9183 of the D.C.S. MSS., Vol. XVII, but with a different colophon which is given below :—

Complete; as found in the Uttarakhaṇḍa of the Brahmāṇḍa-purāṇa.

**Colophon:**

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्यसंवादे श्रीललितोपाख्याने श्रीललितासहस्रनामस्तोत्रकथनं नाम त्रिपञ्चाशोऽध्यायः ॥

आदौ पीठिकाश्लोकाः ५३. सहस्रनामश्लोकाः १८३. फलश्रुति श्लोकाः ९५. आहत्य श्लोकाः ३३१.

श्रीमच्छङ्करानन्दनाथात्मजश्रीमन्महेश्वरानन्दनाथसूनुना श्रीनीलकण्ठानन्दनाथेन स्वहस्तलिखितं श्रीललितासहस्रनामस्तोत्रं संपूर्णम् ॥

---

(*p*) ललितासहस्रनामावलिः.

LALITĀSAHASRANĀMĀVALIḤ.

Foll. 114*a*—122*b*.

Same work as that described under R. No. 185(*a*) *ante*, but without Ṛṣicchandōdēvatā, etc.

Incomplete.

(q) कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 123a—124b.

Same work as that described under No. 8909 of the D.C.S. MSS., Vol. XVII.

Wants the beginning and end.

---

(r) ललितात्रिशतीनामस्तोत्रम्.

LALITĀTRIŚATĪNĀMASTŌTRAM.

Foll. 125a—128a.

Same work as that described under No. 9114 of the D.C.S. MSS., Vol. XVII, but with a different colophon.

Wants the beginning; otherwise complete.

**Colophon:**

इति ब्रह्माण्डपुराणे उत्तरखण्डे (श्रीहयग्रीवागस्त्यसंवादे) (श्रीललितोपा)ख्याने श्रीललितात्रिशती नाम . . . चतुःपञ्चाशोऽध्यायः ॥

आदौ पीठिकाश्लोकं २८. त्रिशतीश्लोकाः ८०. फलश्रुतिश्लोकाः ६. आहत्य श्लोकाः ११४.

श्रीमच्छङ्करानन्दनाथात्मजश्रीमदवधूतमेहश्वरानन्दनाथसूनुश्रीमदवधूतनीलकण्ठानन्दनाथेन लिखितमिदं श्रीललितात्रिशतीनामस्तोत्रं संपूर्णम् ॥

---

(s) ललितात्रिशतीनामावलिः.

LALITĀTRIŚATĪNĀMĀVALIḤ.

Foll. 128b—131b.

Same work as that described under No. 9126 of the D.C.S. MSS., Vol. XVII, wherein this work has been mentioned as Dēvītriśatīnāmāvali.

Complete.

---

(t) ललिताष्टोत्तरशतनामस्तोत्रम्.

LALITĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 132a—133b.

Same work as that described under No. 9176 of the D.C.S MSS., Vol. XVII.

Incomplete.

(u) ललिताष्टोत्तरशतनामावलिः.

LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 134*a*—135*b*.

Same work as that described under No. 9179 of the D.C.S MSS., Vol. XVII, but with the addition of Ṛṣicchandōdēvatā, etc.

Complete.

(v) दक्षिणकालिकामन्त्रः.

DAKṢIṆAKĀLIKĀMANTRAḤ.

Foll. 136*a*—137*b*.

Same work as that described under No. 6365 of the D.C.S. MSS., Vol. XIII, but with slight difference in the beginning in Ṛṣi, Chandas and Dēvatā.

Complete.

(w) शिवाम्नायस्तोत्रम्.

ŚIVĀMNĀYASTŌTRAM.

Foll. 138*a*—140*b*.

Similar to the work described under No. 10707 of the D.C.S. MSS., Vol. XIX. The Mantras associated with the Āmnāya-mantras are said to have issued from the several faces of God Śiva.

Complete; wants the beginning.

**Beginning:**

प्रेरकः सूचकश्चैव वाचको दर्शकस्तथा ।
शिक्षको बोधकश्चेति षडेते गुरवस्स्मृताः ॥
शैवे गुरुत्रयं प्रोक्तं वैष्णवे गुरुपञ्चकम् ।
वेदशास्त्रेषु शतशो गुरवश्च कुलान्वये ॥

क्षं कुक्षिः पीठसंस्थं तदुपरि विलसत्सोमसूत्रं सबिन्दु
तन्मध्ये नादसंस्थं प्रणवपरिवृतं बिन्दुनादौ पुनश्च ।
इत्थं साश्चित्य योगी विविधमनुदिनं तारकं व्योमसंस्थं
सर्वाधारं महेशि(शं)सकृदपि मनसा ध्यायते यस्स मुक्तः ॥
पूर्व(र्वे) दक्षिणपश्चिमोत्तरमथोर्ध्वाख्यं तदानुत्तरं
विस्रोमुश्च(?) गुरुत्रयं त्रिचरणं वन्दे महद्वासनाम् ।
पश्चाम्बानवनाथषोडशषडाधारं च षड्दर्शनं
वाग्देव्यष्टषडङ्गपश्चकरहस्याम्नायरक्तस्तुतौ ॥

**End:**

यः पठेत् प्रातरुत्थाय भक्तियुक्तेन चेतसा ॥
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितम् ।
श्रीविद्यालोकमाप्नोति वेदवाक्यानुसारतः ॥

**Colophon:**

इति श्रीशिवाम्नायस्तोत्रं संपूर्णम् ॥

---

(*x*) श्रीनाथादिगुरुपरम्परास्तोत्रम्.

ŚRĪNĀTHĀDIGURUPARAMPARĀSTŌTRAM.

Foll. 140*b*—148*b*.

A eulogy on the Śākta teachers of religion, such as, Śrīnātha, etc. Similar to the work described under No. 10886 of the D.C.S. MSS., Vol. XIX.

Complete.

**Beginning:**

षट्(क्षं)कुक्षिः पीठसंस्थं तदुपरि विलसत्सोमसूत्रं सबिन्दु
तन्मध्ये नादसंस्थं प्रणवपरिवृतं बिन्दुनादौ पुनश्च ।
इत्थं सश्चिन्त्य योगी विविधमनुदिनं तारकं व्योमसंस्थं
सर्वाधारं महेशं सकृदपि मनसा ध्यायते यस्स मुक्तम्(ः) ॥

* * * *

सनकश्च सनन्दश्च सनातन ततः परम् ।
सनत्कुमारो रैवतको दत्तात्रेयस्ततः परम् ॥

* * * *

विश्वानन्दो महात्मा तु चिदानन्दस्ततः परम् ॥
विद्यारण्यो महाकालः कृत्तिकेशस्ततः परम् ।
निर्मलानन्दयोगीन्द्रो महेशानन्दमाश्रये ॥

इति गुरुपारम्पर्यक्रमम्(ः) ।

**End:**

वाग्भवानन्दनाथश्रीपादुकां नीलख(क)ण्ठानन्दनाथश्रीसांभ्रमानन्दनाथ-श्रीचिदाम्बानन्दनाथश्रीप्रसन्नानन्दनाथश्रीआदिनाथानन्दनाथश्रीपादुकां पूजयामि तर्पयामि नमः ।

**Colophon:**

श्रीनाथादिकृतं सम्पूर्णम् ॥

Foll. 149—150 contain a few lines from Bhagavanmantrabhāga.

---

(*y*) इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Foll. 151*a*—152*b*.

Same work as that described under No. 5998 of the D.C.S. MSS., Vol. XII.

Incomplete.

Fol. 153 contains Āñjanēyamantra. Fol. 154 contains Kṛṣṇāṣṭōttaraśatanāmastōtra (wants beginning and end) and Foll. 155*a*—161*a* contain the Viṣṇusahasranāmastōtra (wants beginning and end).

---

R. No. **1416.**

Palm-leaf. 13 × 1⅝ inches. Foll. 47. Lines, 8 in a page. Grantha and Tamil. Good.

Purchased in 1914–15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

## आयुर्दायगणितविधिः.

## ĀYURDĀYAGAṆITAVIDHIḤ.

This work lays down at first the method of finding out the correct time by certain measurements made with reference to the shadow of a person and then gives rules for determining the period of the life time of a person from his horoscope. It is based on an astrological work named Jātakapaddhati.

Complete.

**Beginning:**

जातकपद्धतिमार्गेण आयुर्दायक्रमो(म उ)च्यते—

सूर्योदयादिजन्मान्तं नाड्यादीन् सूक्ष्ममालिखेत् ।
छायां तत्कालजां न्यस्य त्यक्त्वा वान्त्यं तदूर्ध्वगम् ॥
तच्छिष्टमङ्गुलीकृत्य षष्ट्या हत्वा विभाजयेत् ।
तत्कालाङ्घ्रिप्रभापार्श्ववाक्ययुग्मान्तराङ्गुलैः ॥
लब्ध्वा विनाडिकाः शोध्याः त्यक्तवाक्यस्य नाडिषु ॥

என்றது—பகலைக்கு அடி அளந்து வச்ச அடித்தள்ளி மீதமுள்ள அடியிற் அந்த அந்த மாஸத்து வ்யாஷாம்ஶாதிமாயாவாக்யம் எந்த வாக்யம் எடுபடுதோ அந்த வாக்யத்தை வாங்கி ஶிஷ்டத்தை ஒரு அடிக்கி எட்டு ஸம்ஜ்ஞியாக இரண்டு விரக்கடை ஒரு ஸம்ஜ்ஞிவீதம் ஸம்ஜ்ஞியாக்கவும். அந்த ஸம்ஜ்ஞியை அறுபதிலே பெருக்கி வச்சுக்கொள்ளவும்.

**End:**

ஆயுர்தாயகணிதத்தை வருத்திப்பார்த்து எழுதிக்கொள்ளவும்.

ये तु स्वधर्मनिरता विजितेन्द्रियाश्च ये पथ्यभोजनजुषो द्विजदेवभक्ताः ।
ये मानवा दधति ये शुभशीललीलास्तेषामिदं कलितमायुरुदारधीभिः ॥

*   *   *   *

ஆயுர்தாயம் ஸரிப்படாதென்றும் வர்ணாஶ்ரமங்களை நிச்சயித்து ஆயுர்நிர்ணயம் பண்ணவேணுமென்றும் இந்த ஶ்லோகாபிப்ராயம். அஞ்சாமிடம் ப்ராஹ்மவர்ணாஶ்ரமமெண்டும் ஒன்பதாமிடம் வர்ணாஶ்ரமமெண்டும்.

पृथुविरचितशास्त्रात् गत्यनूकादिचिन्त्यं
गुरुरुडुपतिशुक्रावित्यादिவசனத்தில்
दिनकरशशिवीर्याधिष्ठितत्र्यंशनाथाः
प्रवरसमनिकृष्टास्तुङ्गभागादनूके ॥

என்றது இப்படி வசனம்கொண்டும் இவர் க்ரஹாதிகளினாலே ஸ்வக்ஷேத்ராதிகஸ்தாநவிசேஷித்து வந்தவனென்டறிந்து க்ரஹபாவங்களை நிரூபித்து ஆயுர்தாயம் அறிந்துகொள்ளவும்.

**Colophon:**

इति जातकपद्धतिमार्गेण आयुर्दायगणितविधिस्समाप्तः ॥

The scribe adds—

जनो धन्वीति कल्यब्दप्रभवाब्देयदक्षिणे ।
कन्यामासे कृष्णपक्षे दशम्यां स्थिरवासरे ॥
पुनर्वसुच(सु)नक्षत्रे आयुर्दायगुणक्रमम् ।
पुस्तकं लिखितं पूर्णं पुरुषोत्तमहस्तकः (तः) ॥

This manuscript is said to have been written by Vasiṣṭha, son of Nārāyaṇasōmayājin

---

## R. No. 1417.

Palm-leaf. $13\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 89. Lines, 5 in a page. Grantha. Fair.

Purchased in 1914–15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

(*a*) पञ्चाङ्गरुद्रन्यासः (लघुः).

PAÑCĀṄGARUDRANYĀSAḤ (LAGHUḤ).

Foll. 1*a*—9*a*. Fol. 9*b* is left blank.

Same work as that described under No. 6576 of the D.C.S. MSS., Vol. XIII.

Complete.

---

(*b*) पञ्चाङ्गरुद्रन्यासः (महान्यासः).

PAÑCĀṄGARUDRANYĀSAḤ (MAHĀNYĀSAḤ).

Foll. 10*a*—38*a*.

Same work as that described under No. 6578 of the D.C.S. MSS., Vol. XIII.

Complete.

Foll. 38*b*—48*b* give the verses used in the Nyāsa ceremony connected with Mahānyāsa. Fol. 49 contains some miscellaneous verses.

---

(*c*) सर्पसूक्तम्.

SARPASŪKTAM.

Foll. 50*a*—52*a*.

Consists of the following verses from the Ṛgvēda:—

I-133-5, VII-104-22, IV-3-14.

Foll. 52*b* to 56*a* contain the verse relating to Mṛttikāsnāna. Fol. 56*b* is left blank.

---

(*d*) महासौरखण्डः.

MAHĀSAURAKHAṆḌAḤ.

Foll. 57*a*—64*b*.

Same work as that described under No. 8026 of the D.C.S. MSS., Vol. XV.

Complete

**End:**

नमः शौनकाय नमः शौनकाय। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति।

* * * *

एकचक्ररथो त्त(य)स्य दिव्यः कनकभूषितः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरा(रः)
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चनारायणशङ्करात्मने ॥

**Colophon:**

इति महासौरं सम्पूर्णम् ॥

(e) बह्वृचरुद्रसूक्तम्.

BAHVṚCARUDRASŪKTAM.

Foll. 65*a*—71*a*.

This forms the 43rd Sūkta of the first Maṇḍala of the Ṛgvēda and is in praise of Śiva.

Complete.

Foll. 71*a*—74*a* contain certain verses from the Ṛgvēda, each of them ending in the word देवः.

---

(f) आयुःसूक्तम्.

ĀYUSSŪKTAM.

Foll. 74*a*—76*a*. Foll. 76*a*—78*a* contain certain Vedic verses (with commentary) used in pronouncing blessings. Fol. 78*b* is left blank.

Consists of certain Vedic verses ending in the word आयुः.

---

(g) पञ्चामृतसूक्तम्.

PAÑCĀMṚTASŪKTAM.

Foll. 79*a*—81*b*.

This consists of the following hymns taken chiefly from the Ṛgvēda and the collection is intended to be recited at the time of preparing what is known as Pañcāmṛta, a mixture of milk, curd, ghee, honey and fruit for anointing the image of God.

| Maṇḍala | .. | Sūkta | .. | Ṛk. | Aitarēya Brāhmaṇā |
|---|---|---|---|---|---|
| I | .. | 91 | .. | 16-20 | 8-27-7 and 8 |
| IV | .. | 39 | .. | 6 and 1 | Vajasanēyasaṁhitā. |
| " | .. | 40 | .. | 1 to 5 | 20—3. |
| II | .. | 3 | .. | 11 | Aitarēya Brāhmaṇa |
| I | .. | 90 | .. | 6-8 | 8-7-9. |
| IX | .. | 85 | .. | 6 | |
| X | .. | 120 | .. | 3-6 | |
| " | .. | 97 | .. | 15 | |
| IV | .. | 57 | .. | 6 | |

Complete.

**Beginning:**

आप्यायस्व समेधते विश्वतस्सोमवृष्ण्यं भवा वाजस्य सङ्गधे.

**End:**

बलाय श्रियै यशसेऽन्नाद्याय भूर्भुवस्सुवरोम्। अमृताभिषेकोऽस्तु।

Foll. 82*a*—85*b* contain the अभिश्रवणमन्त्र and foll. 86*a*—89*b* contain a portion of the Jaiminibhārata.

---

R. No. **1418.**

Palm-leaf. 16 × 1⅜ inches. Foll. 39. Lines, 7 in a page. Grantha. Injured.

Purchased in 1914–15 from M.R.Ry. Dēvanāthācāriyar of Rāmēśvaram.

**कालविधानपद्धतिः—सव्याख्या.**

KĀLAVIDHĀNAPADDHATIḤ WITH COMMENTARY.

An astrological treatise laying down the proper time for the performance of the various religious ceremonies to be performed by a Brahmin. The commentary is by Śrīdhara.

Breaks off in the ceremonies relating to the celebration of the first anniversary of a new-born child.

**Beginning:**

करोम्यहं कालविधानपद्धतेः व्याख्यां शिशूनामवबोधकारिणीम्।
वसिष्ठवाचस्पतिनारदादिभिः . . . . . शुद्धसंश्रयाम्॥
प्रथममेकेन श्लोकेन इष्टदेवतानमस्क्रिया शास्त्रप्रयोजनं चोच्यते—
प्रणम्य कालात्मकमेक(मक्षयं) . .(भवं) भवानीसखमिन्दुभूषणम्।
विदग्धमौहूर्तिककीर्तिवृद्धये करोम्यहं कालविधानपद्धतिम्॥
इति कालात्मकं . . . . कालव . . . . थोक्तम्।

* * * *

इन्दुभूषणम् इन्दुर्ज्ञानं तद्भूषणम्। तथोक्तं शिवागमे—

ज्ञानचन्द्रकलाचूडं शुद्धपद्मासनस्थितम्। इति। एवंभूतं भवं प्रणम्येत्येतेन पूर्वार्धेन प्रबन्धारम्भलक्षणनमस्क्रिया कलिता। . . . .

विशारदा विदग्धास्तेषां मौहूर्तिकानां कीर्तिवृद्धये कालविधानपद्धतिमहं करोमीति शास्त्रप्रयोजनम्। शास्त्रसंज्ञा चोत्तरार्धेनोक्ता। अथ चतुर्भिः श्लोकैः गर्भाधानविधिरुच्यते। तत्रा(दा)वेकश्लोकेन गर्भाधानस्येतिकर्तव्यता कथ्यते।

वेदागमोक्तसमये रुचिरे प्रदेशे वाजीकृतेन जितरोषभयेन पुंसाम्।
मन्त्रौषधप्रवरतीर्थजलोज्ज्वलेन कान्ताजनेष्वथ निषेकविधिर्विधेया॥

* * * *

Colophon:

एवं श्रीधराख्ये कालविधानपद्धतिव्याख्याने निषेकविधिस्समाप्तः।

End:

अलङ्कृत्य प्रदातव्यमन्नपात्रेऽथ काञ्चने।
दध्याज्यमधुनोपेतं . . . . सं शिशुर्मम॥ इति।

अन्नप्राशनविधिस्समाप्तः।

अथ श्लोकविंशतिः.

अथैकेन श्लोकेनाब्दपूर्तिमाह—

* * * *

तथोक्तं विधिरत्ने—

अब्देन सौरेण शिशो . . . . . .
. . . संस्नाप्य . . . . . . . ।
. . . . . षो वृद्धिकरं च . . . . . .
तद्धारयोच्छादि(?) सुवर्णसूत्रम्॥

नृसिंहश्चाह—

सौरेणा . . , . . जन्मर्क्षे शिशुं स्नाप्य

---

## R. No. 1419.

Palm-leaf. $10\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 181. Lines, 10 in a page. Grantha. Injured.

Purchased in 1914–15 from M.R.Ry. Dēvanāthācāriyar of Rāmēśvaram.

(*a*) भक्तिरत्नावली.

BHAKTIRATNĀVALĪ.

Foll. 1*a*—27*b*.

By Viṣṇupurī. Same work as that described under No. 5144 of the D.C.S. MSS., Vol. XI.

Contains one to thirteen Viracanas, but wants fifty-seven stanzas in the first Viracana.

**Colophon:**

इति भक्तिरत्नावली समाप्ता ॥

Fol. 28*a* contains a stanza in praise of Rāma. Fol. 28*b* is left blank.

---

(*b*) निरालम्बोपनिषत्.

NIRĀLAMBŌPANIṢAD.

Foll. 29*a*—31*a*.

Same work as that described under No. 570 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*c*) निरञ्जनाष्टकम्.

NIRAÑJANĀṢṬAKAM.

Foll. 31*b*—32*a*.

Eight stanzas expressing that the Supreme Brahman is devoid of all qualities and limitations: by Śaṅkarācārya.

Complete.

**Beginning:**

अधो न ऊर्ध्वो न शिवो न शक्तिः न पुन्न नारी न च लिङ्गमूर्तिः ।
ब्रह्मा न विष्णुर्न च देवरुद्रः तस्मै . . . . . . य ॥

**End:**

गम्भीरधीरं न निर्वाणशून्यं संसारसारं न च पापपुण्यम् ।
व्यक्तं न व्यक्तं न च भेदभिन्नं तस्मै . . . य ॥

**Colophon:**

इति श्रीशङ्कराचार्यविरचितं निरञ्जनाष्टकं संपूर्णम् ॥

(d) निर्वाणषट्कम्.

NIRVĀṆAṢAṬKAM.

Fol. 32.

On the identity of the individual self with God Śiva: by Śaṅkarācārya.

Complete in six stanzas. The portion of the leaf containing the sixth stanza is broken.

**Beginning:**

मनोबुद्ध्यहङ्कारचिन्तादिनाहं न श्रोत्रं न जिह्वा न च घ्राणनेत्रम् ।
न च व्योम भूमिर्न तेजो न वायुः चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १ ॥

**End:**

न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षः चिदानन्दरूपः शिवोऽहं शिवोऽहम् । ५॥

**Colophon:**

इति श्रीमत्परमहंसश्रीशङ्कराचार्यविरचितं निर्वाणषट्कं सम्पूर्णम् ॥

---

(e) निर्या(ण)पञ्चकम्.

NIRYĀṆAPAÑCAKAM.

Foll. 32*b*—33*a*.

Five stanzas in which the author identifies Kāśī (Benares) with the Self. By Śaṅkarācārya. This work is called Kāśīpañcaka in the Vani Vilas Press publication.

Complete.

**Beginning:**

मनोनिवृत्तिः परमोपशान्तिः सा तीर्थवर्या मणिकर्णिकेयम् ।
ज्ञानप्रवाहा विमलादिगङ्गा सा काशिकाऽहं निजबोधरूपम् ॥

**End:**

काशीक्षेत्रं शरीरं त्रिभुवनजनिता व्यापिनी ज्ञानगङ्गा
भक्तिश्रद्धागे(गये)यं निजचरणगुरुध्यानयुक्तप्रयागः ।
विश्वेशोऽयं तुरीयं सकलजनमनस्साक्षिभूतान्तरात्मा
देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत् किमस्ति ॥

**Colophon:**

श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं निर्या(ण)पञ्चकस्तोत्रं सम्पूर्णम् ।

---

(*f*) **शिवमानसपूजनम्.**

ŚIVAMĀNASAPŪJANAM.

Foll. 33*a*—35*a*.

Deals with the manner of conducting mentally the worship of God Śiva.

Complete.

**Beginning:**

ब्रह्मोवाच—

तात तात महाप्राज्ञ सर्वलोकैकरक्षक ।
सर्वान्तर्यामिने स्वामिन् सर्वाधारप्रभो हरे ॥
विश्वरूपो हरस्साक्षात् परमात्मा सदाशिवः ।
स एव सर्वजगतामधिकः परमेश्वरः ॥
तत्पूजान्न परो धर्मः सर्वेप्सितफलप्रदम् ।
सर्वपूजोत्तमं तस्य मानसश्चेति कीर्तितम् ॥
पूर्णस्यावहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥

* * * *

हृत्पद्मं मुकुलीभूतं लम्बमानमधोमुखम् ।
ओमित्यूर्ध्वमुखी कृत्वा ह्रीमित्येवं विकासयेत् ॥
तत्कर्णिकावेदिमध्ये ध्यायेत् साम्बं सदाशिवम् ।

**End:**

मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुच्चरितं यच्छ्रुतं यदुक्तं यत्कृत्यं यन्न कृत्यं तत्सर्वं श्रीसाम्बसदाशिवायेति समर्पयामि ब्रह्मार्पणमस्तु स्वाहा इति चुलकोदकप्रदानं कुर्यात् यथासुखं विहरेत् ॥

**Colophon:**

इति श्रीब्रह्मविष्णुसंवादे श्रीशिवमानसषोडशोपचारपूजनं सम्पूर्णम् ॥

अष्टाङ्गं च चतुष्पादं त्रिस्थानं पञ्चदैवतम् ।
ओङ्कारं यो विजानाति ब्राह्मणो न भवेत्तु सः ॥

अयमर्थः—पृथिव्यापस्तेजो वायुराकाशसूर्यचन्द्राग्न्यादयः अष्टाङ्गानि । चतुष्पादम्—अकारः प्रथमं पादः उकारो द्वितीयः पादः मकारः तृतीयः पादः तुर्यश्चतुर्थः पादः । भूर्भुवस्सुवस्त्रिस्थानानि । ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवेति पञ्चदैवतम् ।

---

(*g*) ज्ञानप्रबोधमञ्जरी.

JÑĀNAPRABŌDHAMAÑJARĪ.

Foll. 35*b*—42*b*.

A short exposition of the leading principles of the Advaita Vēdānta. It is given in the form of a discourse given by a preceptor to a pupil with a view to enlighten him as to the true nature of the Brahman.

Complete; wants three lines in the beginning.

**Beginning:**

शिष्य उवाच—

. . . . . . . . . . . . . . . . . . . . . त्वा यथाऽहं मुच्ये यथा निजस्वरूपं ज्ञात्वा ज्वरसुखदुःखपापपुण्यकर्मकोटिबन्धनान्मुच्येऽहम् । तापत्रयात् संसारात् श्रीरामं शरणं गच्छेऽहम् ।

श्रीगुरुरुवाच—

अयं संसारो वस्तुतो नास्ति । आरोपित एवोच्यते । यथा रज्जौ प्र(भ्र)मेण सर्पो भाति, तत्त्वतः कालत्रयेऽपि सर्पो नास्ति, सर्वथैव रज्जुः । तथाऽधिष्ठानसत्तामात्र एव संसारः । एवं ज्ञात्वा सुखीभवन् एवं कैवल्यसच्चिदानन्दपरमात्मा निर्विकल्पः निरुपाधिः उपाधिरहितोऽस्ति ।

**End:**

द्वैतमद्वैतं न पश्यति । यथा दिवसो रात्रिं न पश्यति, यथा रात्रिः सूर्यन्न पश्यति परस्परविरोधात् । सूर्यस्थानीयं सदोदितं ज्ञानं सदाप्रकाशरूपम्, मायागुणाः सदा अज्ञानान्धकारस्थानीयाः । एवं ज्ञातव्यम् ॥

**Colophon:**

इति श्रीज्ञानबोधे श्रीगुरुशिष्यसंवादे ज्ञानप्रबोधमञ्जरी संपूर्णा ॥

---

(*h*) मानसिकान्तरस्नानम्.

MĀNASIKĀNTARASNĀNAM.

Fol. 43*a*. Fol. 43*b* contains a few stanzas of Śaṅkarācāryaśiṣyadhyānaślōka.

On the manner of taking a bath mentally, which is intended to be resorted to by those who are unable to bathe in water owing to illness or for other reasons.

Complete.

**Beginning:**

आन्तरस्नानमत्यन्तरहस्यमपि पार्वति ।
सरित्रयमनुस्मृत्य चरणत्रयमध्यमः ॥
स्रवन्तरसच्चिदानन्दप्रवाहं भावगोचरम् ।
त्रिवेणीसङ्गमो यत्र तीर्थराजस्स उच्यते ॥
तत्र स्नानं प्रकुर्वीत सर्वपापैः प्रमुच्यते ।

**End:**

ब्रह्मज्ञानेन मुच्यन्ते प्रयागमरणेन वा ।
अथवा स्नानमात्रेण गोमयां(त्यां?) कृष्णसन्निधौ ॥

**Colophon:**

इति मानसिकान्तरस्नानं संपूर्णम् ॥

---

(*i*) दत्तात्रेयस्तोत्रम्.

DATTĀTRĒYASTŌTRAM.

Fol. 44.

In praise of Dattātrēya, who is considered to be an incarnation of God Viṣṇu : by Śaṅkarācārya.

Complete.

**Beginning:**

मूलाधारे वारिजपत्रं चतुरश्रं वंशंषंसं वर्णविशालं सुविशालम् ।
रक्तं वर्णं श्रीगणनाथं भगवन्तं दत्तात्रेयं श्रीपदपद्मं प्रणतोऽस्मि ॥

**End:**

हंसो गणेशो विधिरेष हंसो हंसो हारहसमयश्च शम्भुः ।
हंसो ह जीवः परमेकहंसो हंसो हरिर्हंस्मयश्च हंसः ॥

**Colophon:**

इति श्रीशङ्कराचार्यविरचितं दत्तात्रेयस्तोत्रं संपूर्णम् ॥

(*j*) मनीषापञ्चकम्.

MANĪṢĀPAÑCAKAM.

Foll. 44*b*—45*b*.

By Śaṅkarācārya. Same work as that described under No. 4705 of the D.C.S. MSS., Vol. IX.

Complete.

(*k*) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Foll. 46*a*—47*a*.

By Śaṅkarācārya. Same work as that described under R. No. 118(*b*) *ante*.

Complete.

(*l*) योगतारावली.

YŌGATĀRĀVALĪ.

Foll. 47*b*—49*a*. Fol. 49*b* is left blank.

By Gōvindabhagavatpūjyapāda. Same work as that described under No. 4356 of the D.C.S. MSS., Vol. IX.

Complete.

(*m*) दत्तात्रेयगीता.

DATTĀTRĒYAGĪTĀ.

Fol. 50.

A short treatise bearing on the Advaita-Vēdānta

Complete.

**Beginning :**

दत्तात्रेय उवाच—

चिन्मयं व्यापितं सर्वमाकाशं जगतीश्वरम् ।
निर्विकल्पं स्वयं ब्रह्म तस्याऽहं पञ्चमाश्रमम् ॥
निराकारं निराभासं निरालम्बं निरञ्जनम् ।
निःशब्दमुच्यते ब्रह्म तस्याऽहं पञ्चमाश्रमम् ॥

**End:**

. . . . ब्रह्म मनोरूपो जगदेतच्चराचरम् ।
निर्विकल्पं स्वयं ब्रह्म तस्याहं पञ्चमाश्रमम् ॥
. . . . . . . . . ब्रह्मचारी कथं भवेत् ।
गृही वा वानप्रस्थो वा यती योगं विना न हि ॥

**Colophon :**

इति दत्तात्रेयगीता समाप्ता ॥

---

(*n*) आत्मपूजा.

ĀTMAPŪJĀ.

Foll. 50*b*—51*a*.

By Śaṅkarācārya. Same work as that described under No. 8611 of the D.C.S. MSS., Vol. XVI, but with an additional stanza in the beginning and with a different end as given below.

Complete.

**Beginning :**

आनन्दे सच्चिदानन्दे निर्विकल्पैकरूपिणे ।
स्थितिद्वितीयभावे वै कथं पूजा विधीयते ॥
पूर्णस्यावाहनं ( . . ) शुद्धस्याचमनं कुतः ॥

**End:**

नमो देवादिदेवाय पराय परमात्मने ॥
किं करोमि क गच्छामि किं गृह्णामि त्यजामि किम् ।
आत्मना पूरितं सर्वं महाकल्पाम्बुना यथा ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितमात्मपूजाप्रकरणं समाप्तम् ॥

---

(o) निर्गुणाष्टकपूजा.

NIRGUṆĀṢṬAKAPŪJĀ.

Fol. 51.

By Śaṅkarācārya. Similar to the work described under No. 8611 of the D.C.S. MSS., Vol. XVI. The beginning is slightly different in this MS.

Complete.

**End:**

त्वमेवाहमहं त्वं च सच्चिन्मात्रवपुर्धरः ।
आवयोरन्तरं भ्रान्तिर्नश्य . . . . वा ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं निर्गुणाष्टकपूजा सम्पूर्णा ॥

---

(p) माधवस्तवराजः.

MĀDHAVASTAVARĀJAḤ.

Foll. 52*a*—55*b*.

Same work as that described under No. 10188 of the D.C.S. MSS., Vol. XVIII.

Complete.

---

(q) आत्ममानसपूजा.

ĀTMAMĀNASAPŪJĀ.

Foll. 55*b*—56*a*.

By Śaṅkarācārya. Same work as that described under No. 8609 of the D.C.S. MSS., Vol. XVI.

Complete.

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं(ता)मानसपूजा समाप्ता ॥

---

(*r*) परमानन्ददीपिका.

PARAMĀNANDADĪPIKĀ.

Foll. 56*b*—60*a*.

By Śaṅkarācārya. This gives a brief account from the Advaitic standpoint, of the nature of the universe and of the highest truth as also of the means leading to the realisation of the truth.

Wants two stanzas in the beginning; otherwise complete.

**Beginning:**

मातेव पुत्रमनुबोधयति श्रुतिर्हि लोकं समस्तमपि योजयितुं सुखेन ।
तस्माच्छ्रुतेरभिहितार्थमतान्द्रितेन चित्तेन साधयितुमत्र जना यतध्वम् ॥
आदाविदं सकलमेव जगत्सदासीत् कुम्भादिवत्तदनु शक्तियुता(तं)परस्तात् ।
आकाशवायुदहनाम्बुभुवो बभूवुः वातप्रसक्तसलिलादिव वीचिपूरः ॥
सूक्ष्माख्यभूतगतसत्त्वरजस्तमोभिः लिङ्गं शरीरमुदभूदत ईश्वरेच्छा ।
पञ्चीचकार वियदादिकसूक्ष्मभूता ह्यण्डं ह्यभूदत इदं त्विह जीवभोग्यम् ॥

**End:**

आम्नायमस्तकसुसंस्कृतवैभवोऽहं व्योम्नोऽपि पूर्णतरमूर्तिरहं स्थिरोऽहम् ।
सर्वालयोऽहमहमाद्यवभासकोऽहं वागाद्यगोचरसदोदितसौख्यगोऽहम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्भगवच्छङ्कराचार्यविरचिता परमानन्ददीपिका समाप्ता ॥

---

(*s*) आत्मबोधः.

ĀTMABŌDHAḤ.

Foll. 60*a*—64*a*.

By Śaṅkarācārya. Same work as that described under No. 4547 of the D.C.S. MSS., Vol. IX.

Complete.

---

(*t*) अपरोक्षानुभूतिः.

APARŌKṢĀNUBHŪTIḤ.

Foll. 64*a*—71*b*.

By Śaṅkarācārya. Same work as that described under No. 4540 of the D.C.S. MSS., Vol. IX.

Complete.

---

(*u*) अष्टावक्रगीता.

AṢṬĀVAKRAGĪTĀ.

Foll. 72*a*—88*b*

By Aṣṭāvakra. Same work as that described under No. 4545 of the D.C.S. MSS., Vol. IX. but without commentary.

Complete.

---

(*v*) आश्रमोपनिषत्.

ĀŚRAMŌPANIṢAD.

Foll. 89*a*—90*b*.

This Upaniṣad deals with the duties to be performed by a twice-born in the diff-rent stages of life.

Complete.

**Beginning:**

अथातश्चत्वार आश्रमाः षोडशभेदा भवन्ति। तत्र ब्रह्मचारि(णः) चतुर्विधा भवन्ति। गायत्रो ब्राह्मः प्राजापत्यो बृहन्निति। य उपनयनादूर्ध्वं त्रिरात्रमक्षारालवणाशी गायत्रीमन्त्रेण स गायत्रोऽष्टाचत्वारिंशद्वर्षाणि वेद ब्रह्मचर्यं चरेत्।

**End:**

शून्यागारे देवगृहवासिनो न तेषां धर्मो नाधर्मो न चानृतं सर्वसहास्सर्वसमास्समलोष्टाश्मकाञ्चनाः। यथोपपन्नं चातुर्वर्ण्यभैक्षाचर्यं चरन्त आत्मानं मोक्षयन्त आत्मानं मोक्षयन्तः॥

**Colophon :**

इति आश्रमोपनिषत् संपूर्णम्(।) ॥

---

(*w*) **शिवमानसपूजा.**

ŚIVAMĀNASAPŪJĀ.

Foll. 90*b*—91*b*.

By Śaṅkarācārya. Similar to the work described under No. 8608 of the D.C.S. MSS., Vol. XVI.

Complete.

---

(*x*) **अपराधदशकम्.**

APARĀDHADAŚAKAM.

Foll. 91*b*—93*a*.

Same work as that described under No. 10913 of the D.C.S. MSS., Vol. XIX.

Complete.

---

(*y*) **सप्तश्लोकी (भागवत).**

SAPTAŚLŌKĪ (BHĀGAVATA).

Fol. 93*a*.

Contains seven stanzas taken from the second Skandha of the Śrī-Bhāgavata which are considered to give the main teachings inculcated in the work.

Complete.

**Beginning :**

ज्ञानं परमगुणं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥
यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥

**End :**

एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पाविकल्पेषु न विमुह्यति कर्हिचित् ॥

**Colophon:**

इति श्रीमद्भागवते महापुराणे द्वितायस्कन्धे सप्तश्लोकीभागवतं संपूर्णम् ॥

---

(ẓ) सप्तश्लोकी (गीता).

SAPTAŚLŌKĪ (GĪTĀ).

Foll. 93*b*—94*a*.

These seven stanzas are taken from the Bhagavadgītā and inculcate the worship of Lord Kṛṣṇa.

Complete.

**Beginning:**

अस्य श्रीसप्तश्लोकीगीतामालामन्त्रस्य श्रीभगवान् वेदव्यास ऋषिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता । श्रीकृष्णप्रात्यर्थे जपे विनियोगः ।

अथ ध्यानम्—

वसुदेवसुतं देवं (. .) कृष्णं वन्दे जगद्गुरुम् ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।

यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥

**End:**

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।

मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणम् ॥

**Colophon:**

इति भागवते(ती)सप्तश्लोकीगीता समाप्तः(।) ॥

---

(*a*-1) सप्तश्लोकी (रामायणम्).

SAPTAŚLŌKĪ (RĀMĀYAṆAM).

Foll. 94*a*—95*a*.

These seven stanzas give briefly the story of the Rāmāyaṇa.

Complete.

**Beginning:**

वाल्मीकिस्मृतिमन्दरेण मथितं सीतारमासंभवः
सुग्रीवोऽमरभूरुहोऽङ्गदगजस्सौमित्रचन्द्रोदयः ।
वाले(तो)त्पन्नमाणिर्विभीषणसुधा पौलस्त्यहालाहलं
श्रीरामायणदुग्धसिन्धुरमलो भूया(त्) स नः श्रेयसे ॥

**End:**

श्रीरामस्य कथासुधां सुमधुरां श्लोकान्वितामुत्तमां
ये शृण्वन्ति पठन्ति च प्रतिदिनं पापौघविध्वंसिनी(म्) ।
श्रीविद्यां बहुपुत्रपौत्रसुखदं भुक्त्वा तु भोगान् चिरान्
ते(तां) यान्ति गतिं परा शु विमलां या योगिनां दुर्लभा ॥

**Colophon:**

इति श्रीवाल्मीकिविरचितं सप्तश्लोकीरामायणं समाप्तम् ॥

Fol. 95*b* is left blank.

---

(*a*-2) व्यासपुत्राष्टकम्.

VYÂSAPUTRĀṢṬAKAM.

Fol. 96.

Same work as that described under R. No 1229(*f*) *ante*.

Complete.

**Colophon:**

इति श्रीव्यासपुत्रशुकेन कृतौ शुकाष्टकं संपूर्णम् ॥

---

(*a*-3) हरिमीडेस्तोत्रम्.

HARIMĪḌĒSTŌTRAM.

Foll. 97*a*—100*b*.

By Śaṅkarācārya. Same work as that described under No. 10472 of the D.C.S. MSS., Vol. XVIII.

Complete.

(a-4) योगवासिष्ठसारविवरणम्.

YŌGAVĀSIṢṬHASĀRAVIVARAṆAM.

Foll. 101a—158b.

A commentary by Mahīdhara on the Yōgavāsiṣṭhasāra, which gives briefly the essence of what is contained in the Yōgavāsiṣṭha, also called Vāsiṣṭharāmāyaṇa which work has been described under No. 1910 of the D.C.S. MSS., Vol. IV, Part I.

See also Oxford Catalogue No. 563 on page 232(b).

Complete in ten chapters as given below :—

१. वैराग्यबोधनम्.
२. जगन्मिथ्यात्वम्.
३. जीवन्मुक्तलक्षणम्.
४. मनोलयप्रकरणम्.
५. वासनोपशमनम्.
६. आत्ममननम्.
७. मुक्तिनिरूपणम्.
८. आत्मार्चनम्.
९. आत्मनिरूपणम्.
१०. शून्याशून्यप्रकरणम्.

**Beginning:**

लक्ष्मीकान्तं नमस्कृत्य यथामति विरच्यते ।
वासिष्ठसारविवृतिः परोपकृतिकाम्यया ॥
वसिष्ठेन यतीन्द्रेण उपदिष्टं रघूत्तमे ।
सारमुद्धृतवान् कश्चित् ब्रह्मविद्यामहार्णवात् ॥

व्या – तत्रादौ योगवासिष्ठ(सा)राख्यं ग्रन्थमारभिषु(रिप्सु)स्तत्प्रतिपाद्येष्टदेवतानतिरूपं मङ्गलमाचरति—दिक्कालेति ।

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥

व्या—एवंविधाय गुणातीताय तेजसे शान्ताय ब्रह्मरूपाय नमः । तेजःशब्देनात्र ब्रह्मैव न भौतिकं तेजः तस्य वक्ष्यमाणलक्षणानुपपत्तेः । किंभूताय तेजसे दिक्कालादिभिरनवच्छिन्ना नपि नविठ्ययता (देशतः कालतः वस्तुतोऽ)परिच्छिन्ना अनन्ता अविनाशिनी चिन्मात्रा ज्ञानघना मूर्तिः स्वरूपं यस्य तस्मै

* * * *

एवमधिकारिणं निरूप्य सद्गुरुसेवादिकं ब्रह्मज्ञानसाधनं निरूपयति श्लोकत्रयेण ।

यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावन्न सद्गुरुं कश्चित् सच्छास्त्रं वापि नो लभेत् ॥
महानुभावसंसर्गात् संसारार्णवलङ्घने ।
युक्तिः संप्राप्यते राम दृढा नौरिव नाविकात् ॥
संसारदीर्घरोगस्य सुविचारमहौषधम् ।
कोऽहं कस्य च संसारो विवेकेन विलीयते ।

**End:**

यथा प्रतोलिकाशून्य इति । यथा लोके स्तम्भः सङ्कीर्णपुत्रिकःसालभञ्जिका तया असङ्कीर्णः अयुक्तः तेन कारणेन पुत्तलिकाशून्य इति शब्द्यते, स्वयं न सत्येव सा तदभावशब्दाश्रयमात्रात् स्तम्भोऽपि अभावतामापद्यते यथा, तथा ब्रह्म जगदिति कालत्रयाभावरूपं तद्वत् भान्तं प्रतीतं तेन स्वयं जगदसदपि तदभावप्रतीत्याश्रयणात् ब्रह्म शून्यपदं गतं शून्यताप्राप्तम् । वस्तुतस्तु जगान्नि(न्मि)थ्या ब्रह्म सत्यमित्यर्थः । हे सौम्य राम अम्भासि जले वीचिर्न वास्ति नच . . . . वत् प्रतीयते कदाचित्तदपि भानं नास्ति यथा तथा जगत् ब्रह्माणि . . . . . . . . शून्याशून्यपदं भावाभावरूपं गतं प्राप्तं तस्यैव भावाभाव . . . .

**Colophon:**

इति श्रीयोगवासिष्ठसारविवरणे शून्याशून्यप्रकरणं नाम दशमोऽध्यायः ॥

अश्वत्थदीक्षितन् लिखितम् ॥

---

(*a-5*) योगतत्त्वम्.
YŌGATATTVAM.

Foll. 159*a*—164*b*.

On details connected with the practice of Yōga.

These are stated to have been taught to Brahman by God Viṣṇu.

Incomplete.

**Beginning:**

योगैश्वर्यं च कैवल्यं जायते यत्प्रसादतः ।
तद्वैभवं योगतत्त्वं रामचन्द्रमहं भजे ॥
सह नाववत्विति शान्तिः ।
योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥
विष्णुर्नाम महायोगी महाभूतो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥
तमाराध्य जगन्नाथं प्रणिपत्य पितामहः ।
पप्रच्छ योगतत्त्वं मे ब्रूहि चाष्टाङ्गसंयुतम् ॥
तमुवाच हृषीकेशो वक्ष्यामि शृणु तत्त्वतः ।

* * * *

एभिर्दोषविनिर्मुक्तस्स जीवः केवलो मतः ।
तस्माद्दोषविनाशार्थमुपायं कथयामि ते ॥
योगहीनं कथं ज्ञानं मोक्षदा(दं) भवति ध्रुवम् ।
योगो विज्ञानहीनः स्यान्न क्षमो योगकर्मणि ॥
तस्मात् ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत् ।
अज्ञानादेव संसारो ज्ञानादेव विमुच्यते ॥

**End:**

मारुतं मरुतां स्थाने यकाराक्षरभासुरम् ।
धारयेत्तत्र . . . . ईश्वरं सर्वतोमुखम् ॥
धारयेत्पञ्चघटिकाद्वायुवत् व्योमगो भवेत् ।
. . . . . योऽस्ति भयं भवति योगिनः ॥
आभ्रूमध्यात्तु मूर्धान्तमाकाशस्थानमुच्यते ।

(*a*-6) तत्त्वबोधः.

TATTVABŌDHAḤ.

Foll. 165*a*—169*b*.

Same work as that described under No. 4585 of the D.C.S. MSS., Vol. IX, but slightly different in the end and colophon.

Complete.

**End:**

तथाच स्मृतिः—

तनुं त्यजति वा काश्यां श्वपचस्य गृहेऽथवा ।
ज्ञान . . . प्तिसमये विमुक्तौ विगताशयः ॥

**Colophon:**

इति तत्त्वबोधप्रकरणं समाप्तम् ॥

---

(*a*-7) ब्रह्मस्तवराजः.

BRAHMASTAVARĀJAḤ.

Foll. 170.

In praise of the Supreme Brahman. Herein Dattātrēya teaches his disciple that this world is unreal and that the Supreme Brahman alone is real, and that the individual self is identical with the Supreme Brahman.

Complete.

**Beginning:**

पुरुषः प्रकृतिर्नाहं न च दीर्घो लघू(घुः)परः ।
न मे स्थितिर्लयोप(त्प)त्तिः(त्ती) ब्रह्माहमिति केवलम् ॥
न मातापितरौ भ्राता पुत्रदारादिसम्पदः ।
नामवर्णकुलं नास्ति ब्रह्माह . . . . ॥

**End:**

दत्तेन कथितं गुह्यं शिष्याणां (भक्ति)पूर्वकम् ।
यः पठेत्सर्वदा योगी जीवन्मुक्तो भवेन्नरः ॥

**Colophon:**

इति दत्तात्रेयविरचितं ब्रह्मस्तवराजस्तोत्रं संपूर्णम् ॥

---

(*a*-8) ब्रह्मज्ञाननिर्णयः.

BRAHMAJÑĀNANIRṆAYAḤ.

Foll. 171*a*—172*a*.

On the means conducive to the attainment of the knowledge needed for the realisation of the Supreme Brahman.

Complete.

**Beginning:**

ओं सह नाववतु (शान्तिः).

अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति नाभिर्हृदयं कण्ठं मूर्धा च। तत्र चतुष्पादं ब्रह्म विभाति। जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्ते रुद्रः तुर्यमक्षरः स आदि(देवो)विष्णुश्चेश्वरश्च.

**End:**

ज्ञानशिखी ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुच्यते ॥
अग्नेरिव शिखा नान्यत् यस्य ज्ञानमयी शिखा।
स शिखीत्युच्यते विद्वान् नेतरे केशधारिणः ॥
कर्मण्यधिकृता ये तु वैदिकैर्ब्राह्मणादयः ॥

**Colophon:**

इति ब्रह्मज्ञाननिर्णयः समाप्तः ॥

---

(*a*-9) आत्मविद्याविलासः.

ĀTMAVIDYĀVILĀSAḤ.

Foll. 172*b*—173*a*.

In praise of Dakṣiṇāmūrti who is considered to be the bestower of true wisdom.

Incomplete.

**Beginning:**

ओङ्कारैकनिरूप्यं पङ्कजभवनादिभावितपदाब्जम् ।
किङ्करकैरवशशिनं (कुमारजन)कं शिवं कलये ॥
वटस्याधः कश्चित् करकलितचिन्मुद्रमचलं
निटालाक्षं सूक्ष्मं मुनि(वरगणा)सेव्यचरणम् ।
चिदानन्दाकारं मदनहरमापूर्णममरं
सदा ध्यायेदन्तः परमशिवमा(द्यं सु)पुरुषम् ॥

**End:**

दैवतानि कति सन्ति नावनौ नैव तानि मनसौम्य(सा म)तानि मे ।
दीक्षितं जडधियामनुग्रहे दक्षिणाख्यमुखमेव दैवतम् ॥

The remaining foll. are left blank.

---

R. No. **1420.**

Palm-leaf. 16⅜ × 1½ inches. Foll. 73. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1914–15 from M.R.Ry. Dēvanāthācārya of Rāmēśvaram.

(*a*) प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Foll. 1*a*—48*a*. Fol. 48*b* is left blank.

By a son of Timmayajvan of Pedamallagoṇḍa family. Similar to the work described under No. 3490 of the D.C.S. MSS., Vol. VII.

To the end of Yatipratigrahaprāyaścitta.

**Beginning:**

. . . . . . . निस्सरम(न्म)दझरीवगाहो मद-
भ्रमद्भ्रमरझङ्कृतिप्रतिनदद्दिशामण्डलः ।
फणीन्द्रकृतकुण्ड(ल)स्सविनयानताखण्डलः
करोतु कुशलं मम . . . . . . . ननः ॥

पाणिनिजैमिनिकपिलव्यासकणादाक्षचरणफणितषु ।
प्रौढस्मृतीतिहासत्रयीपुराणेषु विदिततत्त्वार्थः ॥
पेदमल्ल . . . . गोण्डकुलेशतिम्मयज्वसुतः ।
प्रायश्चित्तसुधानिधिमतनोज्जगतां हिताय निरवद्यम् ॥

अथेदानीं विवक्षितप्रायश्चित्ता . . . . द्यपापविज्ञानाय तद्विवेकः क्रियते ।

तत्र संवर्तः—

नवधा पापमादिष्टं मुनिभिः शास्त्रदर्शिभिः ।
समाहृत्य समासेन प्रायश्चित्तविवक्षया ॥

. . . . . . . प्रायश्चित्तशब्दार्थमाह ।

गौतमः—

प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम् ।
प्रायश्चित्तमिति प्रोक्तं कर्मपापापनोदकम् ॥ इति ।

**End:**

अन्नं वा शाकमात्रं वा रूपकं वस्त्रमेव वा ।
किमर्थीने द्विजो यस्तु पापे(स पापो) नरकं व्रजेत् ॥
तस्य दोषविनाशाय प्राजापत्यं च रूपके ।
ततः परं तु चान्द्रस्स्यादन्नमात्रे ह्युपोषणम् ॥
परेद्युः पञ्चगव्यं च पीत्वा शुद्धिमवाप्नुयात् ।

इति हेमाद्रौ यतिप्रतिग्रहप्रायश्चित्तम् ॥

---

(*b*) कुण्डमण्टपादिलक्षणम्.

KUṆḌAMAṆṬAPĀDILAKṢAṆAM.

Foll. 49*a*—62*a*. Fol. 62*b* is left blank.

On the distinguishing characteristics of the various kinds of sacrificial pits and altars, etc., as laid down in authoritative works.

Complete.

**Beginning:**

मनुः—

लोकसंव्यवहारार्थं खरास्संज्ञा(?) प्रथिता भुवि ।
ताम्ररूप्यसुवर्णानां तां प्रवक्ष्याम्यशेषतः ॥
जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रवेः ।
परमन्तत् प्रमाणानां त्रसरेणुः प्रवक्ष्यते ॥

* * * *

अथ मण्टपलक्षणम्—

बोधायनः—

मथनाङ्गुलिकूर्परयोर्मध्ये प्रामाणिकः करः ।

छरितो(न्दो)गपारिशिष्टे—

अङ्गुलिमानं तु यत्र यत्रोपदिश्यते । तत्र बृहत् पर्य(र्व)ग्रन्थिभिर्म(र्मि)-नुयात् ।

अथ पाश्वरात्रे—

कुर्याद्वेष्णप(द्वैष्णव)योगेषु चतुर्द्वारांश्च मण्टपान् ।
सारदारुमयान् स्तम्भान् दधौ(दा)न् कुर्यादृजून् समान् ॥

**End:**

मैत्रायणीयपारिशिष्टे—

दर्भाभावे का(को)नः प्रतिनिधिः । पलाशाश्वत्थरोहितकोदुम्बराणामलाभे तिलकनीपनिम्बराजप्लक्षशाल्मलाम्लककसि(पि)त्थरो(को)विदारविभीतकश्ले-ष्मातकसर्पकण्टकिवर्जम् । घृतमन्नार्थे प्रतिनिधि । तदभावे दधि पयो वा ॥

**Colophon:**

इति कुण्डमण्टपादिलक्षणम् ॥

---

(*c*) प्रायश्चित्तवचनानि.

PRĀYAŚCITTAVACANĀNI.

Foll. 63*a*—73*b*.

Similar to the work described under No. 3481 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning :**

मम कुमारस्य जन्मलग्नप्रभृति एतच्चौलोपनयनशुभलग्नपर्यन्तं बाल्ये वयसि वाज्ञानतः पित्राद्युपेक्षया च . . . . . . . . .

* * * *

पूर्वपूर्वसंस्कारकालातिक्रमदोषपरिहारार्थमस्य कुमारस्य चौलोपनयनयोग्यतासिद्ध्यर्थं च अस्माकमाचारु(र्य)त्वयोग्यतासिद्ध्यर्थं च गायत्रीप्रदानयोग्यतासिद्ध्यर्थं च यथाशक्ति कृच्छ्राण्याचरिष्ये ।

**End :**

एवं सर्वप्रायश्चित्तेषु हिरण्यश्राद्धं कुर्यात्, द्वादश ब्राह्मणान् केशवादिभिरभ्यर्च्य हिरण्यं दद्यात् । इदमेव नान्दीमुखम् । अतः परं पुण्याहं वाचयित्वा, दीनाननाथान्यथाशक्ति दक्षिणादिभिः सन्तोष्य प्रायश्चित्तका(रयि)तारं दक्षिणाभिस्सन्तोषयेत् । एवमनुष्ठिते शुद्धो भवति । शुद्धोऽहमिति भावयन् पापशङ्कां न स्मरेत् ।

**Colophon :**

इति सर्वप्रायश्चित्तं सिद्धम् ॥

---

R. No. **1421.**

Palm-leaf. 16 × 1½ inches. Foll. 141. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1914–15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

लीलावती—द्राविडटीकासहिता.

LĪLĀVATĪ WITH TAMIL COMMENTARY.

Same work as that described under R. No. 338 *ante*, but with a commentary in Tamil.

Breaks off in the Kuṭṭakavyavahāra.

R. No. **1422.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 64. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1914–15 from M.R.Ry. E. R. Śrīnivāsarāghavācāriyar, Temple Doctor, Rāmēśvaram.

(*a*) प्रायश्चित्तपद्धतिः.

PRĀYAŚCITTAPADDHATIḤ.

Foll. 1*a*—40*b*.

Similar to the work described under No. 3480 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning:**

शुक्लाम्बरधरं ( . . . ) विघ्नोपशान्तये ॥
वन्दे विघ्नेशवाणीशौ लक्ष्मीपतिमुमापतिम् ।
सर्वेषां पापसङ्घानां प्रायश्चित्तविधे कृते ॥
आलोच्य सर्वशास्त्राणि यथाशक्ति यथामति ।
क्रियते साधुबोधाय प्रायश्चित्तस्य पद्धतिः ॥

प्रायश्चित्तानुक्रमः—

पूर्वेद्युरुपवासः, परेद्युः प्रातः स्नानम् नित्यकर्म निवृत्य, पुण्याहकारयितृत्ववरणम्, परिषन्निर्णयः, मलापकर्षणस्नानं, महासङ्कल्पः, मृत्तिस्नानम्, . . . . भ्यर्चना, परिषत्कृत्यम्, विज्ञापनाप्रकारः ।

* * * *

कुशकुसुमाक्षतान् गृहीत्वा अस्मिन् चिकीर्षिते सर्वप्रायश्चित्तानुष्ठाने भवद्भिः पारिषदत्वेन भवितव्यमिति परिषदं वृत्वा तत्सन्निधौ प्राणानायम्य देशकालौ सङ्कीर्त्य.

**End:**

दीनान्धकृपणेभ्यो यथाशक्ति हिरण्यं दद्यात् । ब्राह्मणाशीर्वादः । तत आ . . . . . कारयितारं सम्यक् संपूज्याधिकां दक्षिणां दत्वा

वाद्यपुरस्सरं गृहं प्राविश्य ब्राह्मणभोज . . . . . . . . रणां कुर्यात्
एवं कृते समस्तकलुषेभ्यो मुक्तो भवति ॥

**Colophon:**

इति सर्वप्रायश्चित्तं संपूणम् ॥

---

(*b*) दानाविधिः.

DĀNAVIDHIḤ.

Foll. 41*a*—57*b*.

Deals with the different kinds of gifts to be made to the Brahmins and with the supposed efficacy of such gifts.

Complete.

**Beginning:**

सुमुखश्चैक . . . . . . . . . यते ॥
शुक्लाम्बर . . . . . . . . . . येत् ॥
अभीप्सिता . . . . . . . . . नमः ॥
सर्वमङ्ग . . . . . . . . . . . ते ॥

* * * *

अथाचम्य देशकालौ सङ्कीर्त्य शुभतिथौ सहकुटुम्बानां . . . र्थं चतुस्समुद्रमध्ये शैलवनोपेतपृथिवीदानसमफलावाप्त्यर्थं पित्रादीनां नरकादुत्तीर्य शाश्वत . . . र्थं

* * * *

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।
रौप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् ॥

**End:**

दशदानं ब्राह्मणेभ्यः फलदानं समाचरेत् ।
भूरिदानं यथाशक्ति ब्राह्मणान् भोजयेत्ततः ॥
एवं यो भक्तिभावेन कुर्यात्पुत्रं सुजीवितम् ।
लभते बहुसन्तानं सौभाग्यं लभते धनम् ॥

**Colophon:**

इति दानयामलोक्तमृतपुत्रहर्शिशुमारदानविधिः संपूर्णः ॥

Foll. 58—64*a* contain a few lines from various Smṛtis.

---

R. No. **1423.**

Palm-leaf. 16¼ × 1⅜ inches. Foll. 28. Lines, 6 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) **ध्यानरत्नावली.**

DHYĀNARATNĀVALĪ.

Foll. 1*a*—19*a*.

A collection of stanzas culled from the Bhāgavata describing the different ways in which God (Lord Kṛṣṇa) may be conceived for purposes of contemplation.

Complete.

**Beginning:**

श्रीकान्तो मातुलो यस्य जननी सर्वमङ्गला ।
जनकः शङ्करो देवस्तं वन्दे कुञ्जराननम् ॥

प्रथमस्कन्धे नवमे भीष्मवरदध्यानम्—

स देवदेवो भगवान् प्रतीक्षतां कलेबरं यावदिदं हि नौम्यहम् ।
प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥

तदोपसंहृत्य गिरस्सहस्रिणी विमुक्तसङ्गं मन आदिपूरुषे ।
कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थिते मीलितदृग्व्यधारयत् ॥

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥

एकादशे द्वारकापतिध्यानम् ।

**End:**

द्वादशे वृष्णिपतिध्यानम् ।

श्रीकृष्ण कृष्णसख वृष्णिवृषावनीध्रुग्राजन्यवंशदहनानपवर्गवीर्य ।
गोविन्द गोपवनिताव्रजभृत्यगीततीर्थश्रव श्रवणमङ्गल पाहि भृत्यान् ॥

ध्यानरत्नावलिः कण्ठे यैर्धृता भक्तिसत्तमैः ।
तेषां दृश्यो भवेत् कृष्णः कौस्तुभामुक्तकन्धरः ॥

Fol. 19 contains a few sentences on Ēkādaśīśrāddhaviṣaya.

---

(*b*) **भगवन्नामरत्नावली.**

BHAGAVANNĀMARATNĀVALĪ.

Foll. 20*a*—23*a*.

On the religious efficacy resulting from the repetition, contemplation or hearing of the different names of God.

Complete.

**Beginning:**

स्वनामकीर्तनादेव सुलभं व्रजवल्लभम् ।
शुकशास्त्रेश्वरं कृष्णमाश्रये जगतां पतिम् ॥

प्रथमस्कन्धे—

आपन्नस्संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततस्सद्यो विमुच्येत यद्बिभेति स्वयं भयं(वः) ॥
कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत् ।
गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ॥

**End:**

नामरत्नावलीमेतां कण्ठे धृत्वा रमापतेः ।
तद्दर्शनार्हो भवति भक्तिपूतः पुमानिह ॥

Foll. 23*b* and 24*a* contain certain Mantras addressed to Gōpālakṛṣṇa. Fol. 24*b* is left blank. Foll 25 and 26*a* contain a few stanzas from Kucēlōpākhyāna. Fol. 26*b* is left blank. Fol. 27

contains a few stanzas of Rāmatārakōpadēśa. On fol. 28 a few stanzas are given dealing with Nāḍi, Yōginī and Svargaphala.

---

R. No. **1424.**

Palm-leaf. 15 × 1½ inches. Foll. 110. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) **भगवन्नामकौमुदी.**

BHAGAVANNĀMAKAUMUDĪ.

Foll. 1*a*—51*b*.

Herein the author investigates the meaning of the various Puranic passages, which desci ibe the efficacy of repeating the names of God, and comes to the conclusion that such repetition is not only capable of removing sin but is also conducive to the accomplishment of the four Puruṣārthas, viz., Dharma, Artha, Kāma and Mōkṣa. By Lakṣmīdhara, son of Narasiṁhasūri and disciple of Anantānandaraghunāthasvāmin. He is also the author of the Amṛtataraṅgiṇī, a commentary on the Bhāgavata, and of the Advaitamakaranda.

Contains Paricchēdas one to three complete. These deal wtih the following subjects :—

१. पुराणानां विवक्षितार्थत्वप्रतिपादनम्.

२. नामकीर्तनस्य प्राधान्येन पुरुषार्थप्रतिपादनम्.

३. नामकीर्तनस्य पुरुषार्थसाधनत्वप्रातिपादनम्.

**Beginning :**

शुक्लाम्बरधरं विष्णुं (. .) विघ्नोपशान्तये ॥
अंहस्संहरदखिलं सकृदुदयादेव सकललोकस्य ।
तरणिरिव तिमिरजालं जयति जगन्मङ्गलं हरेर्नाम ॥
कारुण्यामृतनिर्झरस्सुरसरिज्जन्माकरः श्रीवधू-
लीलाब्जं व्रजकामिनीकुचतटीकस्तूरिकास्थासकः ।

उत्तंसस्सुरयोषितां मुनिमनोवश्यौषधीपल्लवो
यस्याङ्घ्रिस्सुरवल्लभस्स जयति श्रीपुण्डरीकप्रियः ॥

* * * *

यत्पादपद्मनखकान्तितरङ्गजीर्य-
ज्जम्बालजाड्गिकधियां न धियामभूमिः ।
निस्सीमसौख्यजलधिर्जयतादनन्त-
स्सोऽस्मद्गुरुर्जगदनुग्रहजागरूकः ॥

अपिच—

अधीशं निस्स्वानां शमनदतटीषु प्रवसता-
मशेषाणामाद्यं गुणगरिमनिर्मुक्तमपि यम् ।
मृषामानाद्दूरं श्रुतिरुपचरन्ती सविनयं
शनैर्यत्नादन्तर्भवति सुभगानां परिबृढम् ॥
चेतश्चकोरसन्तोषपीयूषाम्बुधिवृद्धये ।
इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥

अत्र श्रीभगवन्नाममाहात्म्यप्रतिपादकानि पुराणवचनान्युदाहृत्य विचार्यन्ते। किमेतान्यविवक्षितस्वार्थानि, उत स्वार्थपराणीति। यद्यपि स्वार्थपराणि तदापि किं साक्षात्पापक्षयहेतोः कस्यचिदङ्गभावेन भगवन्नामकीर्तनं पापक्षयहेतुः उत स्वप्राधान्येन, यदापि स्वप्राधान्येन तदापि किं श्रद्धाभक्तिज्ञानवैराग्याभ्यासदेशकालविशेषादिसापेक्षत्वेन, उत तन्नैरपेक्ष्येणेति। अस्य च विचारस्य सकलश्रुतिस्मृतीतिहासपुराणागमार्थतत्त्वसन्देहसन्दोहलतालवित्रचरणनखचन्द्रिकाञ्चलस्य श्रीमदनन्तानन्दरघुनाथस्य करुणाकादम्बिनीमुक्तयुक्तिसुधोद्धारासारैः स्मृतिपुराणवचनविरोधाभासभावितनितान्तमसृणशङ्कापङ्कप्रक्षालनेन तस्यैव रघुराजशिरोमणेः सर्वतः प्रसृमरपरमकारुण्यसुधार्णवस्य निरङ्कुशमहिमधाम्नि श्रीरामनाम्नि स्वचेतस्समाधानमेव प्रयोजनम् ।

* * * *

तस्माद्विवक्षितार्थान्येव नामकीर्तनस्य पापक्षयहेतुत्वाप्रतिपादकानि पुराणवचनानीति ।

कृष्ण कृष्ण मधुसूदन विष्णो कैटभान्तक मुकुन्द मुरारे ।
पद्मनाभ नरसिंह हरे श्रीराम राम रघुनन्दन पाहि ॥

**Colophon:**

इति श्रीमदनन्तानन्दरघुनाथपादपद्मोपजीविनो लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकौमुद्यां पुराणवचनानां विवक्षितार्थप्रतिपादनं नाम प्रथमः परिच्छेदः ॥

**End:**

झटिति जगतामंहस्तूलीन्द(न्धने द)हनो महा-
दहरकुहरध्वान्तध्वंसयन्न(प्रदानन)भोमणिः ।
किरणलहरी चान्द्री चेतश्चकोरचमत्कृतेः
भवतु भवतां नामज्योतिर्मुदे मदनद्रुहः ॥
येन भागवतव्याख्या कृतामृततरङ्गिणी ।
अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥

**Colophon:**

इति श्रीमदनन्तानन्दरघुनाथपरमहंसपरिव्राजकाचार्यपादपद्मोपजीविनः श्रीमन्नरसिंहसूनोः लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकीर्तनस्य केवलस्यैव पुरुषार्थसाधनत्वप्रतिपादनं नाम तृतीयः परिच्छेदः ॥

समाप्ता नामकौमुदी ॥

The scribe adds—

संवत्सरे शार्वरिनामके रवौ सिंहं गते सोमदिनेऽग्र्य ऋक्षे ।
गोपालनाम्ना लिखितं द्विजेन श्रीपार्वतीशाभिधकौमुदीदम् ॥

(*b*) भगवन्नामकौमुदीव्याख्या—प्रकाशः.
BHAGAVANNĀMAKAUMUDĪVYĀKHYĀ—PRAKĀŚAḤ.

Foll. *52a*—*100b*. The remaining leaves are left blank.

A commentary on the work noticed above: by Nandadēva, son of Āpadēva.

Almost complete, the commentary on the last stanza alone being wanting.

**Beginning:**

नाम्नैव नाशयति यो भवपाशबन्धं
दाम्नैव यो व्रजवधूभिरयत्नबद्धम् ।
एवं दयाजलनिधिर्निजवर्गवश्यः
सेव्यस्स मेऽस्तु सततं सुखसिन्धुरेकः ॥

नमस्कृत्य गुरून् सर्ववेदान्तार्थाविरोधतः ।
भगवन्नामकौमुद्याः प्रकाशः प्रवितन्यते ॥

* * * *

प्रेक्षावतामधिकारिणां भगवन्नाममाहात्म्यविषये निर्णयज्ञानाय चिकीर्षितग्रन्थस्याविघ्नपरिसमाप्त्यादिकामो भगवन्नाममाहात्म्यवर्णनमेव मङ्गलमाचरति—अंह इति। दुरितं दुःखं चेत्यर्थः । दुरितनिवर्तकत्वं वचनात् दुःखनिवर्तकत्वं तु श्रोतॄणां सद्योविश्रान्त्यनुभवात् संशब्देन रोगादिनिवर्तकत्वं सूच्यते, तदुक्तम्—

सर्वरोगोपशमनं सर्वोपद्रवनाशनम् ।
शान्तिदं सर्वरिष्टानां हरेर्नामानुकीर्तनम् ॥ इति ॥

* * * *

उपसंहरति तस्मादिति। प्रथमपरिच्छेदसमाप्तौ नामोच्चारणरूपमङ्गलं कुर्वन् नाममाहात्म्यप्रतिपादकस्य ग्रन्थस्य प्रचयगमनरूपं फलं प्रार्थयते। कृष्णेति ।

यन्नामकीर्तनं सद्यस्सर्वपापनिवर्तनम् ।
तं वन्दे परमानन्दसिन्धुं श्रीनन्दनन्दनम् ॥

**Colophon:**

इति श्रीमदापदेवसूनुना नन्ददेवेन कृते श्रीभगवन्नामकौमुदीप्रकाशे प्रथमः परिच्छेदः ॥

**End:**

स्वकीयकृतार्थतामभिनयति— नार्थीयेति । वस्तुतो नामधेयातिशयत्वान्निष्कलङ्कत्वाच आत्मन इयमुक्तिः । गुरुणा परमात्मना वा करुणया आत्माविष्कृतः तस्य किं करवै । अतस्तन्नामनि नम्रमभिमुखं मनः ॥

Fol. 102*a* contains a few sentences of some Marathi songs.

---

R. No. **1425.**

**Palm-leaf.** 13 × 1½ inches. Foll. 76. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) **भगवद्भक्तिमहिमा.**

BHAGAVADBHAKTIMAHIMĀ.

Foll. 1*a*—46*a*.

On the religious efficacy of true devotion to God. Herein those who are devoid of such devotion are condemned.

Complete.

The subjects dealt with in this work are given below :—

१. अभक्तनिन्दा
२. सौलभ्यम्.
३. भक्तिसाधनम्.
४. भक्तप्रशंसा.
५. नामप्रशंसा.
६. भजनविवेकः.
७. भगवत्स्तुतिः.
८. विरक्तिः.
९. दौर्लभ्यम्.

**Beginning:**

नारायणं नमस्कृत्य ( . . . ) ततो जयमुदीरयेत् ॥
आपन्नस्संसृतिं घोरां यन्नाम विवशो गृणन् ।
ततस्सद्यो विमुच्येत यद्बिभेति स्वयं भवः ॥

को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः ।
शुद्धिकामो न शृणुयात् यशः कलिमलापहम् ॥

*     *     *     *

धर्मस्स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥

श्रेयः स्तुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये ।
तेषामसुक्लेशचयोऽवशिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कृतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥

भगवद्भक्तिहीनस्य जातिः शास्त्रं जपस्तपः ।
अप्राणस्येव देहस्य मण्डन लोकरञ्जनम् ॥

**End:**

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ।
वासुदेवे भगवति यासामित्यर्पितं मनः ॥

गोप्यस्तु कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपन्ति ।
दृग्भिर्हृदीकृतमलं परिरभ्य सद्यस्तद्भावमापुरपि नित्ययुजां दुरापम् ॥
आहुश्च ते नलिननाभपदारविन्दं योगै(गी)श्वरैर्हृदि(वि)चिन्त्यमगाधबोधैः ।
संसारकूपपतितोत्तरणावलम्बं गेहं जुषामपि मनस्युदियात्सदा नः ॥

Fol. 41*b* is left blank. Fol. 46*b* contains one stanza of Bāṇaliṅga.

---

(*b*) आचारादिलक्षणशतकम्.

ĀCĀRĀDILAKṢAṆAŚATAKAM.

Foll. 47*a*—52*a*.

A centum of stanzas dealing with certain rules of conduct; the subjects treated herein are apparent from the headings of the work given below: by Nārōjipaṇḍita, son of Viśvanāthapaṇḍita and Bhavānī.

Complete in five Paddhatis as given below :—

१. वर्णाश्रमाचारपद्धतिः.
२. दैवपद्धतिः.
३. राजपद्धतिः.
४. उद्योगपद्धतिः.
५. शारीरपद्धतिः.

**Beginning:**

नत्वा गणेशं वाणीं च गुरुपादसरोरुहम् ।
लक्षणानि प्रवक्ष्यामि शास्त्रोक्तानि यथामति ॥
पूर्वैराचरितं धर्म्यं शास्त्रोक्तं लोकसम्मतम् ।
वर्णाश्रमानुसरणमेतदाचारलक्षणम् ॥
शमो दमः क्षमा शान्तिः स्वाध्यायो ब्रह्मचिन्तनम् ।
षट्कर्मकरणे श्रद्धा प्रोक्तं ब्राह्मणलक्षणम् ॥

**End:**

सन्तोषः सर्वदा सौख्यं स्थिरा श्री रोगवर्जितम् ।
धर्मे रतिः क्षमा शान्तिरेतत्सुकृतिलक्षणम् ॥
आयुरारोग्यमैश्वर्यं सन्ततिस्सत्समागमः ।
दाने यशस्यभिरुचि[चो]रेतत्पठनतो भवेत् ॥
नारोजिपण्डितेनेदं शतकं लक्षणान्वितम् ।
प्रोक्तमेतत्पठन् मर्त्यः प्राप्नुयादीप्सितं फलम् ॥

**Colophon:**

इति श्रीमद्विश्वनाथपण्डितार्यसूनुनारोजिपण्डितविरचितं लक्षणशतकं संपूर्णम् ॥

---

(*c*) पूर्वपुण्याष्टकम्.

PŪRVAPUṆYĀṢṬAKAM.

Foll. 52*b*—53*a*.

Eight stanzas by the same author as that of the previous work, declaring that long life, health, prosperity, progeny, etc., are all the outcome of the good deeds of the former birth.

Complete.

**Beginning:**

आयुरारोग्यमैश्वर्यं सन्ततिस्सत्समागमः ।
दाने यशस्यभिरुचिः पूर्वपुण्यस्य लक्षणम् ॥
विद्वान् पुत्रः प्रिया भार्या स्थिरा श्रीर्धर्मचिन्तनम् ।
समुन्नतिः शिवे भक्तिः पूर्वपुण्यस्य लक्षणम् ॥

**End:**

गुरोराराधनं सत्यं मोक्षे धीर्ब्रह्मचिन्तनम् ।
सर्वत्र परिपूर्णत्वं पूर्वपुण्यस्य लक्षणम् ॥
पूर्वपुण्याष्टकमिदं यः पठेत्सर्वदा नरः ।
तस्य पुण्यं च कीर्तिश्च यशश्चातिविवर्धते ॥

**Colophon:**

इति श्रीमद्विश्वनाथपण्डितार्यसूनुनारोजिपण्डितविरचितं पूर्वपुण्याष्टकं संपूर्णम् ॥

---

(*d*) सूक्तिमालिका.

SŪKTIMĀLIKĀ.

Foll. 53*a*—67*a*. Fol. 67*b* is left blank.

A collection of stanzas containing wise sayings on various subjects and indirectly inculcating devotion to God: by Narōji-paṇḍita, son of Viśvanātha and Bhavānī.

Incomplete. Contains the following Paddhatis:—

१. नमस्कारपद्धतिः.
२. दैवपद्धतिः.
३. नीतिपद्धतिः.
४. सज्जनपद्धतिः.
५. दुर्जनपद्धतिः.
६. सामान्यपद्धतिः.
७. अन्योक्तिपद्धतिः.
८. कथापद्धतिः.

**Beginning:**

विनायकं नमस्यामि समस्तकविनायकम् ।
दधानं मोदकं हस्ते भक्तचित्तप्रमोदकम् ॥

सदाशिवस्ते जनको माता ते सर्वमङ्गला ।
विघ्नेशस्त्वां गणपते तस्मादादौ नमाम्यहम् ॥
विश्वनाथगुरुं नत्वा भवानीं मातरं तथा ।
नारोजिपण्डितेनेयं क्रियते सूक्तिमालिका ॥

End:

अथ दशावताराः—

मत्स्यस्य—

दुष्टेन यद्धृतं वस्तु बलाद्ग्राह्यं सता ततः ।
शङ्खासुरहृता वेदा मत्स्येन पुनराहृताः ॥

* * * *

वामनस्य—

पराक्रमः स्वतस्सिद्धः वयस्तत्र न कारणम् ।
बालेन विष्णुना क्रान्ता त्रिलोकी तु त्रिभिः पदैः ॥

Foll. 68 and 69 contain stanzas taken from Dravyapūjāvidhipaṭala and Śivastutivacanas, found in the Kāmikāgama.

The remaining leaves are left blank.

---

R. No. **1426.**

Palm-leaf. 14½ × 1 inches. Foll. 51. Lines, 5 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) शाण्डिल्यसूत्रम्.

ŚĀṆḌILYASŪTRAM.

Foll. 1*a*—6*a*. Fol. 6*b* is left blank.

By Śāṇḍilya. Same text as that described under No. 5150 of the D.C.S. MSS., Vol. XI.

Complete in three Adhyāyas.

**Beginning :**

अथ भक्तिमीमांसासूत्राणि लिख्यन्ते—

अथातो भक्तिजिज्ञासा । सा परानुरक्तिरीश्वरे । तत्संस्थस्यामृतत्वोपदेशात् । ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः । तयोपक्षयाच्च । द्वेषप्रतिपक्षभावात् । रसशब्दाच्च । रागः न क्रियाकृत्यनपेक्षणात् ज्ञानवत् ॥

**End :**

त्रीण्येषां नेत्राणि शब्दलिङ्गाक्षभेदात् रुद्रवत् । अतस्तिरोभावविकाराश्च स्युः क्रियाफलसंयोगात् संयोगादिति ॥

इति तृतीयोऽध्यायः संपूर्णम्(:) ॥

**Colophon :**

शाण्डिल्यशतसूत्री भक्तिमीमांसा समाप्तेयम् ॥

---

(*b*) **शाण्डिल्यसूत्रभाष्यम्.**
ŚĀṆḌILYASŪTRABHĀṢYAM.

Foll. 7*a*—51*b*.

A commentary on the above work in accordance with the Viśiṣṭādvaita-Vēdānta: by Śrīnivāsa, who is spoken of in the colophon as Vādībhakēsarin and as being the disciple of Vēṅkaṭācārya of Gōvardhana.

Complete.

**Beginning :**

श्रीनिवासाङ्घ्रि(ख्य)दासेन नत्वाऽचार्यपरम्पराम् ।
भाष्यं शाण्डिल्यसूत्राणां क्रियते सत्प्रमाणतः ॥

व्यासबोधायनादीनां सिद्धान्तस्यानुकूलता।
तथा वेदान्तसूत्राणां ज्ञातव्यात्र मुमुक्षुभिः ॥
सूत्रार्थो वर्ण्यते यत्र वाक्यैस्सूत्रानुकारिभिः।
स्ववाक्यानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥

इति भाष्यलक्षणमुक्तन्तदत्राप्यस्त्येवेति द्रष्टव्यम्। अथातो भक्ति-जिज्ञासा—अत्राथशब्द आनन्तर्ये, अतःशब्दो हेतुभावे, तथाहि। ऐहिकामुष्मिकफलभोगविरागानन्तरं गर्भजन्ममरणरूपसंसृतिदुःखासहिष्णुत्वाद्धेतोस्तदेव दर्शयति श्रुतिः—यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते, परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं तस्मै

* * * *

अतोऽनन्तस्थिरफलरूपभगवद्भक्तिजिज्ञासा कर्तव्येत्यर्थः। ज्ञातुमिच्छा जिज्ञासा इष्यमाणमिह भक्तिज्ञानम् न देवताप्रतिपत्तिर्भक्तिरूपैवोच्यते, तद्वदिति।

इति प्रथमे अध्याये प्रथममाह्निकम्।

**End:**

ननु उपमानस्यापि प्रमाणमुक्तं कथं त्रीण्येवेति चेन्न। तस्य प्रत्यक्षादावन्तर्भावात्। तत्कथमिति चेत् शृणु—गवयमजानन्नपि यथा गौस्तथा गवय इति कुतश्चिदारण्यकाच्छ्रुत्वा वनं गतो वाक्यार्थं स्मरन् यथा गोसादृश्यविशिष्टपिण्डं पश्यति तदा तद्वाक्यार्थस्मरणसहकृतगोसादृश्यविशिष्टपिण्डज्ञानं जायते इत्युपमानशरीरम्। तस्य स्मरणरूपत्वात् प्रत्यक्षेऽन्तर्भावः। यत्र यत्र गोसादृश्यं तत्र तत्र गवयशब्दवाच्यत्वमिति व्याप्तिग्रहणापेक्षत्वादनुमानेऽन्तर्भावः, आरण्यकवाक्यजन्यत्वात् शब्देऽन्तर्भाव इति। न च गोपिण्डस्य तदेन्द्रियासन्निकर्षात् कथं प्रत्यक्षेऽन्तर्भाव इति वाच्यम्। स्मरण-

ज्ञानस्य तदानीमपि वर्तमानत्वात् तस्य प्रत्यक्षमूलत्वादित्यलमतिविस्तरेणेति ।

श्रीनिवासाङ्घ्रि(ख्य)दासेन श्रीयतीन्द्रकृपेक्षणात् ।
भाष्यं शाण्डिल्यसूत्राणां कृतं श्रुत्यादिमानतः ॥
न चात्र काचिदुत्प्रेक्षा कृता नापि कुदृष्टिवत् ।
पराशरादिसिद्धान्तानुसारेण मतं बुधैः ॥

**Colophon:**

इति श्रीगोवर्धनकृतवासानां वादिहंसनवाम्बुदानां श्रीमद्वेङ्कटाचार्याणां चरणारविन्दद्विरेफेण वादीभकेसरिणा श्रीनिवासदासेन कृतं शाण्डिल्यसूत्रभाष्यं समाप्तम् ॥

---

R. No. **1427.**

Palm-leaf. 15⅜ × 1 inches. Foll. 39. Lines, 6 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

Fol. 1*a* gives the name of the work (*a*) as Bhagavannāmasūtramāhātmyam. Fol. 1*b* is left blank.

(*a*) **शिवनामसूत्रमाहात्म्यम्.**

ŚIVANĀMASŪTRAMĀHĀTMYAM.

Foll. 2*a*—13*a*. Fol. 13*b* is left blank.

Treats of the manner and greatness of muttering the name of God Śiva.

Complete; said to occur as Adhyāyas four to eight of the Cidambarakhaṇḍa and as Adhyāyas seven and eight of the Piṣṭamṛdbhārakhaṇḍa which form part of the Maṇivākyacaritra of the Skāndōpapurāṇa.

**Beginning:**

स्कान्दोपपुराणे मणिवाक्यचरित्रे चिदम्बरखण्डे ऋषीन् प्रति अगस्त्यः—

श्रीषण्मुखः—

गुरूपदेशदीपेन तच्छुश्रूषात्मकेऽमले ।
तैलस्थितायां तद्भक्तिवर्त्यां लग्नेन तापस ॥
गुरुक्रमात्तपात्रेण मायान्धतमसोऽन्तरे ।
स्थितमक्षरयुग्माङ्गं शिवं पश्यन्ति योगिनः ॥

* * * *

तस्मात्तापस पुण्यात्मन् ससूत्रं नाम पावनम् ।
मत्तो गृहीत्वाविरतं भजस्व परमेश्वरम् ॥
सूत्रेण रहितो यो वा करोति शिवकीर्तनम् ।
तस्य तत्फलसांनिध्यं नाप्नोति सततक्रिया ॥
तस्मात् ससूत्रं गुरुणा दत्तं नामातिपावनम् ।
जप्तव्यं नान्यथा लोके शम्भोराज्ञा तथैव हि ॥

* * * *

तस्मान्मन्त्रस्य सूत्रत्वं प्रणवस्य समीरितम् ।
तदूर्ध्वस्थं ब्रह्मरूपं शिव इत्यक्षरद्वयम् ।
तस्मात्ससूत्रमित्येव प्रोक्तं तापसपुङ्गव ।

* * * *

**Colophon:**

इति स्कान्दोपपुराणे मणिवाक्यचरिते चिदम्बरखण्डे चतुर्थोऽध्यायः ॥

* * * *

इत्युक्तस्तेन तस्माद्वै गृहीत्वा नाम पावनम् ।
कीर्तयन्नित्यतुष्टः सन् विचचार शुको मुनिः ॥

**Colophon:**

इति श्रीस्कान्दोपपुराणे चिदम्बरखण्डे अष्टमोऽध्यायः ॥

मणिवाक्यचरिते पिष्टमृद्धारखण्डे सप्तमाध्याये शाण्डिल्यवन्दीसंवादे

श्रीस्कन्दः—

शाण्डिल्यं तपतां श्रेष्ठं शिवज्ञानैकसाधनम् ।
महाभक्तं महेशस्य द्वितीयमिव शंकरम् ॥
साञ्जलिः प्रार्थयामास वन्दी शम्भुपरा द्विजम् ।
यथा मया महेशानभक्तिः सा क्रियते शुभा ॥
तथा दयां कुरु मयि करुणाकर मद्गुरो ।

श्रीशाण्डिल्यः—

शिवभक्तौघसङ्गं च धारणं भस्मनः सदा ॥
रुद्राक्षाणां च देवेशनाम्नां संकीर्तनं मुदा ।
सदा तु शिवनामैतज्जप्तव्यं पुण्यकृद्वरे ॥

**End:**

शक्तिं दास्ये वरगुणे तुभ्यं निर्मलचित्तदाम् ।
तव ज्ञात्वाहमीशस्य नामचिन्तापरायणः ॥
हिमवच्छिखरे रम्ये वसामि शिवशासनात् ।
स्मरिष्यस्य(सि) यदा मां वै तदा यास्ये पुरीमिमाम् ॥

**Colophon:**

इति श्रीस्कान्दोपपुराणे मणिवाक्यचरित्रे पिष्टखण्डे अष्टमोऽध्यायः ॥

---

(*b*) गुरुपादुकाध्यानमहिमा.

GURUPĀDUKĀDHYĀNAMAHIMĀ.

Foll. 14*a*—15*b*.

On the greatness and religious efficacy of contemplating on the holy sandals of the spiritual preceptor as a means of wiping off one's sins.

Complete; said to occur in the 52nd Adhyāya of the Kālahasti-māhātmya forming part of the Śivarahasyasaṅgraha.

**Beginning:**

श्रीशिवरहस्यसंग्रहे कालहस्तिमाहात्म्ये द्विपञ्चाशदध्याये मार्कण्डेयं प्रति शिववचनम्। श्रीशिवः—

अब्रवीद्वचनं तस्य संशयोच्छित्तिकारणम्।
दुस्तराणां च सर्वेषां पापानां महतामपि॥
प्रायश्चित्तं परं विद्धि श्रीगुरोः पादुकास्मृतिम्।
यस्य श्रीपादरजसा यन्मूर्धा सहितो यदि॥
अहं ब्रह्मा च विष्णुश्च भवेम नियतं मुने।
तत्पूजकास्तस्य गुरोः पादुकास्मरणं सकृत्॥
प्रायश्चित्तं परं विद्धि पातकानां मृकण्डुज।
प्रकाशते पञ्चकृत्यं गुरौ यस्मिन्महामते॥

**End:**

इदं शास्त्रार्थसंक्षेपरहस्यं ते मृकण्डुज॥
सद्गुरोः पादुकाध्याने करोत्युत्थाय यः प्रगे।
तस्य नश्यन्ति पापानि वह्निना तूलराशिवत्॥

Fol. 16 is left blank.

---

(c) शान्त्यध्यायः.

ŚĀNTYADHYĀYAḤ.

Foll. 17*a*—29*b*.

Deals with a pacificatory course of action which is capable both of averting all kinds of evils likely to befall a person and of causing destruction, etc., to the enemy.

This is said to form the sixth Adhyāya of the Śivadharma-śāstra.

**Beginning:**

शुक्लाम्बर . . . . . शान्तये ॥

नन्दिकेश्वरः—

अतः परमिदं गुह्यं रुद्रोद्गीतं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ।
परचक्रप्रमथनं सदा विजयवर्धनम् ॥
स्तम्भनं परसैन्यस्य रिपुनाशकरं परम् ।
सर्वदेवग्रहानीकं समस्ताभीष्टदायकम् ॥
सर्वशान्त्याधिकाराख्यं धर्मं वक्ष्ये शृणुष्व तम् ।

* * * *

भावमात्रेण सन्तुष्टा उमादेवी वरप्रदा ॥
साक्षादागत्य रूपेण शान्तेनामिततेजसा ।
शान्तिं करोतु मे प्रीता भक्तानां भक्तवत्सल ॥

**End:**

दुष्टः पापसमाचारो मातृहा पितृहा तथा ॥
श्रवणादस्य भावेन मुच्यते सर्वपातकैः ।
शान्त्यध्यायमिदं पुण्यं न देयं यस्य कस्यचित् ॥
शिवभक्ते सदा देयं शिवेन कथितं पुरा ।
नित्यमूर्जितभक्तिश्च शक्तिव्याघातवर्जितः ॥
सर्वकामसमृद्धः स्याद्देयं देयं दिने दिने ।
भक्ते पुण्यमिदं देयं माहात्म्यं शिवमिच्छता ॥

**Colophon:**

इति श्रीशिवधर्मशास्त्रे नन्दिकेश्वरप्रोक्ते शान्त्यध्यायो नाम षष्ठः ॥

Foll. 29(*b*) and 30 contain some Marathi songs. The remaining leaves are left blank.

R. No. **1428.**

Paper. $13\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 39. Lines, 8 in a page. **Grantha.** Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) कलिविडम्बनम्.

KALIVIḌAMBANAM.

Foll. 1*a*—7*a*.

The author Nīlakaṇṭhadīkṣita herein brings out the influence of Kali on people in the present Yuga.

Complete.

**Beginning:**

न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥
असंभ्रमो विलज्जत्वमवज्ञा प्रतिवादिनि ।
हासो राज्ञः स्तवश्चेति पञ्चैते जयहेतवः ॥

**End:**

विषेण पुच्छलग्नेन वृश्चिकः प्राणिनामिव ।
कलिना दशमांशेन कालः सर्वोऽपि दारुणः ॥
यत्र भार्यागिरो वेदा यत्र धर्मोऽर्थसाधनः ।
यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नमः ॥
काममस्तु जगत्सर्वं कालस्यास्य वशंवदम् ।
कालकालं प्रपन्नानां कालः किं नः करिष्यति ॥
कविना नीलकण्ठेन कलेरेतद्विडम्बनम् ।
चरितं विदुषां प्रीत्यै राजास्थानानुमोदनम् ॥

**Colophon:**

इति श्रीनिलकण्ठदीक्षितकृतौ कलिविडम्बनम् ॥

(*b*) सभारञ्जनम्.

SABHĀRAÑJANAM.

Foll. 7*b*—13*b*.

One hundred and four witty stanzas intended to please an assemblage and dealing with various subjects: by Nīlakaṇṭha-dīkṣita.

Complete.

**Beginning:**

षड्दर्शनीपरिज्ञानमण्डितैरिव पण्डितैः ।
स्तम्भैश्चित्रैर्वितानैश्च सभा किमवभासते ॥
सन्तु सर्वविधा मर्त्या न सन्त्वेके विपश्चितः ।
असूर्येणेव लोकेन किन्तेन विषयेण नः ॥

**End:**

पत्न्या माङ्गल्ययोगेन पत्युरायुः प्रवर्धते ।
प्रकृतीनां तु भाग्येन पार्थिवस्सुखमेधते ॥
चलन्ति सर्वमर्यादाश्चलिते सति पार्थिवे ।
पर्वता अपि कम्पन्ते प्रसक्ते कम्पने भुवः ॥
निर्मितं शतकं साग्रं नीलकण्ठेन यज्वना ।
सभारञ्जनमेतेन साधयन्तु मनीषिणः ॥

**Colophon:**

इति सभारञ्जनं समाप्तम् ॥

---

(*c*) अन्यापदेशः.

ANYĀPADĒŚAḤ.

Foll. 14*a*—26*b*.

By Nīlakaṇṭhadīkṣita. Same work as that described under R. No. 609(*b*) *ante*, wherein see for the beginning.

Complete in one hundred and one stanzas.

**End:**

भूतानां प्रभवस्थितिप्रविलयास्त्वय्येव विश्वम्भरे
त्वद्गर्भे ननु ते रसातलजुषो दैत्याः फणीन्द्राश्च ये ।

त्वं सर्वैरुपजीव्यसे दिविचरैस्त्वत्तोऽपि किञ्चित्परं
न स्यात् स्यादपि वा निरस्तविशयं ब्रह्म त्वमेवासि नः ॥

**Colophon:**

इति नीलकण्ठदीक्षितविरचितोऽन्यापदेशः समाप्तः ॥

---

(*d*) शान्तिविलासः.

ŚĀNTIVILĀSAḤ.

Foll. 27*a*—31*a*. Fol. 31*b* is left blank.

Stanzas inculcating contentment and freedom from worldly attachment: by Nīlakaṇṭhadīksita.

Complete.

**Beginning:**

वंशे कस्मिन्नजनिषि कयोः पुत्रतामग्रहीषं
कत्यश्रौषं तदपि कथितास्तत्च सख्यः कतिभ्यः ।
किं नाद्राक्षं व्यसनमथवा किं सुखं नान्वभूवं
नोपारंसीस्त(त्त)दपि हृदयं कीदृशो मे विपाकः ॥
पादौ मे स्तः परमचतुरौ कीकटानेव गन्तुं
वागप्यास्ते निभृतमनृतान्येव वक्तुं वचांसि ।
मीमांसन्ते मम च मतयो दोषदृष्टौ परेषां
पङ्गुर्मूकः पशुरपि भवाम्यात्मनीने तु कृत्ये ॥

**End:**

आगर्भादाकुलपरिबृढादाचतुर्वक्त्रतोऽपि
त्वत्पादाब्जप्रपदनपरान् वेत्सि नश्चन्द्रमौले ।
मायायाश्च प्रपदनपरेष्वप्रवृत्तिं त्वमात्थ
स्वामिन्नेवं सति यदुचितं त(त्र त)त्र प्रमाणम् ॥
दण्डं धत्ते सकलजगतां दक्षिणे यः कृतान्तो
नामाप्यस्य प्रतिभयतनोर्नापगृह्णीमहीति ।

प्राक्षास्मस्तन्निगमवचसामुत्तरो यः कृतान्तो
यद्वा तद्वा भवतु न वयं तस्य पश्येम वक्त्रम् ॥

**Colophon :**

इति श्रीशान्तिविलासस्सम्पूर्णः ॥

---

(*e*) वैराग्यशतकम्.

VAIRĀGYAŚATAKAM.

Foll. 32*a*—38*b*.

By Nīlakaṇṭhadīkṣita. A centum of stanzas inculcating renunciation.

Complete.

**Beginning :**

आस्ते[स्त] कश्चन भिक्षुः सङ्गृह्णन्नव्ययानि दश ।
न ममेत्यव्ययुगलं याचामस्तं किमस्त्यन्यत् ॥
धीसाचिवः स्थैर्यबलं सङ्कल्पविरोधिशान्तिधनम् ।
विश्वत्रयाविषयमिदं वैराग्यं नाम साम्राज्यम् ॥

**End :**

न गृहीतं श्रुतिहृदयं न च निगृहीतं परिप्लवं हृदयम् ।
इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरम् ॥
माद्ध्वं कीकटदेशे कपि(वि)षु न रामानुजायध्वम् ।
आश्रयत राजधानीं काशीमाशीविषाङ्कस्य ॥

**Colophon :**

इति श्रीनीलकण्ठदीक्षितेन विराचितं वैराग्यशतकं संपूर्णम् ॥

Fol. 39 contains a few lines from Brahmayajña and Dēvarṣitarpaṇa.

R. No. **1429.**

Śrītāla. 11 × 1¾ inches. Foll. 193. Lines, 12 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Fol. 1.

Same work as that described under R. No. 118(*b*) *ante*.

Complete.

---

(*b*) नामद्वादशपञ्जरम्.

NĀMADVĀDAŚAPAÑJARAM.

Fol. 2*a*.

Same work as that described under No. 6473 of the D.C.S. MSS., Vol. XIII.

Complete.

---

(*c*) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 2*a*—9*b*.

Same work as that described under No. 4649 of the D.C.S MSS., Vol. IX.

Complete.

---

(*d*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 10*a*—35*b*.

Same work as that described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

(e) भागवतमाहात्म्यम् (स्कान्द).
BHĀGAVATAMĀHĀTMYAM (SKĀNDA).

Foll. 36a—124b.

Same work as that described under No. 2490 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

---

(f) हरिभक्तिसुधोदयम्.
HARIBHAKTISUDHŌDAYAM.

Foll. 125a—177b.

Nārada is herein stated to have related to the sages of Naimiśāraṇya what he learnt from Kapila and what he inculcated in a previous composition of his own about devotion to God Viṣṇu. The greatness of Viṣṇu and of unswerving devotion to Him as also the results of such devotion and the manner of making contemplation in its various stages of Śravaṇa, Manana and Nididhyāsana, are explained and illustrated by narrating the stories of Dhruva and Prahlāda.

Complete in twenty Adhyāyas.

**Beginning:**

एकं यज्जनयत्यनेकंतनुभृत्सस्यान्यजस्रं मिथो
भिन्नाकारगुणानि कैश्चिदपि वा नोप्तं न सिक्तं जलैः ।
कालेनापि न जीर्यते हुतभुजा नो दह्यते क्लिद्यते
नाद्भिस्तत्सकलस्य बीजमनिशं ब्रह्माभिधं धीमहि ॥
यत्पादाब्जयुगं सुगन्धि तुलसीलोभाद्भजन्तोऽप्यहो
योगिप्रार्थ्यगतिं प्रयान्ति मधुपा यद्भक्तिहीनास्त्वधः ।
अब्भक्षाः पवनाशिनोऽपि मुनयस्संसारचक्रे भृशं
भ्राम्यन्त्येव गतागतैरिह मुहुस्तस्मै नमो विष्णवे ॥

* * * *

अस्ति त्रैलोक्यविख्यातं वनं नैमिशसंज्ञितम् ।
पवित्रं गोमतीतीरे नित्यपुष्पफलर्द्धिमत् ॥

स्वलङ्कृता महात्मानः श्रीभागवतलक्षणैः ।
ऋषयो यत्र सत्रेण चिरं हरिमपूजयन् ॥

* * * *

इत्थं संप्रार्थितः सौम्यैः द्विजैरञ्जलिकङ्कणैः ।
ओमित्युवाच हृष्टात्मा स वैष्णवजनप्रियः ॥

**End:**

स इत्थं विष्णुगाथाभिर्नन्दयित्वा द्विजोत्तमान् ।
शौनकादीन् नैमिशीयान् ब्रह्मसूनुस्तिरोदधे ॥
य इमं शृणुयाद्भक्त्या हरिभक्तिसुधोदयम् ।
कथयेद्वा स पापौघान्मुक्तो मोक्षं च गच्छति ॥

**Colophon:**

इति श्रीहरिभक्तिसुधोदये विंशोऽध्यायः ॥

---

(*g*) पाण्डुरङ्गमाहात्म्यम्.
PĀṆḌURAṄGAMĀHĀTMYAM.

Foll. 178*a*—193*b*.

On the holiness and religious importance of the sacred shrine at Pandrapur, wherein God Viṣṇu is worshipped under the name, Viṭṭhala. It is said to have been narrated by Mārkaṇḍēya to King Ambarīṣa

Complete; said to form the seventh Adhyāya of the Brahmāṇḍapurāṇa.

**Beginning:**

समचरणसरोजं सान्द्रनीलाम्बुदाभं
जघननिहितपाणिं मण्डनं मण्डनानाम् ।
तरुणतुलसिमालाकन्धरं कञ्जनेत्रं
सदयधवलहासं विट्ठलं चिन्तयामि ॥

अम्बरीष उवाच—

कथितानि त्वया ब्रह्मन् क्षेत्राणि सुमहान्त्यपि ।
धरण्यां मुनिशार्दूल भुक्तिमुक्तिप्रदान्युत ॥

विष्णुभक्तिकराण्येव क्षेत्राण्यत्यद्भुतानि च ।
सालग्रामं गयाक्षेत्रं नैमिशं पुण्यवर्धनम् ॥

* * * *

माहात्म्यं पाण्डुरङ्गाख्यक्षेत्रस्य सुमहत्तरम् ।
तस्मिन् देवो जगन्नाथः शङ्खचक्रगदाधरः ॥
भक्ताय विप्रपुत्राय प्रादाद्वरमनुत्तमम् ।
देवर्षिपितृगन्धर्वगरुडोरगसेवितः ॥
कटिन्यस्तकरः श्रीशः शङ्खपाणिर्जनार्दनः ।
भक्तानुकम्पी भगवानास्ते तत्रातिसुन्दरः ॥

* * * *

वक्तुमर्हस्यशेषेण तस्य क्षेत्रस्य वैभवम् ।
यथा स भगवान् देवः प्रवसन्निष्टकोपरि ॥
ननर्त देवगन्धर्वैः स्तूयमानस्सतां गतिः ।
इष्टकायां नटन्यस्माद्विट्ठलः कथ्यते भुवि ॥

मार्कण्डेयः—

साधु साधु महाप्राज्ञ राजपुत्र महायशाः ।
धन्योऽसि त्वं महाभाग यद्गोविन्दकथारुचिः ॥
तत्तेऽहं संप्रवक्ष्यामि तस्य क्षेत्रस्य वैभवम् ।
पाण्डुरङ्गमिति ख्यातं पुण्यं त्रैलोक्यविश्रुतम् ॥

* * * *

निजभक्तकरक्षिप्तामिष्टकां स्वयमीक्ष्य तु ।
पद्मामासनमाक्रम्य ननर्ताद्भुतदर्शनः ॥
यदिष्टकां समारुह्य कटिन्यस्तकरद्वयः ।
ननर्त तस्माद्राजेन्द्र नाम्ना तं विट्ठलं विदुः ॥
तदा देवर्षिगन्धर्वाः किन्नराश्चाप्सरोगणैः ।
तुष्टुवुर्हृष्टरोमाणस्तत्राभूत् रङ्ग अद्भुतः ॥

वेणुनादं भगवतस्सर्वलोकैकमोहनम् ।
श्रुत्वा दूरगता गावो धावमानास्तमन्वयुः ॥
विक्षिपन्त्यस्स्वपुच्छानि प्रेम्णा राजीवलोचने ।
गोखुरैरर्द्यमानायां भूम्यां रेणुरभून्नृप ॥
तेन पाण्डुरभूद्रङ्गस्तत्र देवगणैर्युतः ।
पाण्डुरङ्ग इति ख्यातं क्षेत्रं पापप्रणाशनम् ॥

**End:**

इति ते सर्वमाख्यातं पाण्डुरङ्गस्य वैभवम् ।
विट्ठलस्य च राजेन्द्र भीमरथ्यास्तथैव च ॥

सूतः—

इत्यम्बरीषाय मुनिर्महात्मा मृकण्डुसूनुः परमार्थमुक्त्वा ।
संपूजितस्तेन महात्मना पुनर्जगाम विप्रस्तपसे यथागतम् ॥
य इदमनुशृणोति श्रावयेद्वा मुरारेः
चरितममलकीर्तेः पाण्डुरङ्गेश्वरस्य ।
अनुदिनमखिलार्थान् प्राप्य निर्मुक्तबन्धः
स भवति हि मुरारेः प्रीतिपीयूषपात्रम् ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे श्रीमत्पाण्डुरङ्गमाहात्म्ये सप्तमोऽध्यायः ॥

---

R. No. **1430.**

Palm-leaf. 15 × 1¼ inches. Foll. 40. Lines, 8 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

**भगवन्नाममहिमा.**

BHAGAVANNĀMAMAHIMĀ.

Similar to the work described under R. No. 25 *ante.* Taken from various Purāṇas and Tantras.

Complete.

**Beginning:**

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ इति ।

* * * *

भगवान्—

सत्यं ब्रवीमि मनुजाः स्वयमूर्ध्वबाहुः
यो मां मुकुन्द नरसिंह जनार्दनेति ।
जीवन् जपत्यनुदिनं मरणे ऋणीव
पाषाणकाष्ठसदृशाय ददाम्यभीष्टम् ॥
ऋणमेतत् प्रवृद्धं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णं मां दूरवासिनम् ॥

* * * *

ब्रह्मसंहितायां बोधायनं प्रति कृष्णः—

मन्नामकीर्तनफलं विविधं निशम्य
न श्रद्दधाति मनुजो यदुतार्थवादम् ।
यो मानुषस्तमिह दुःखचये क्षिपामि
संसारघोरविविधार्तिनिपीडिताङ्गम् ॥

* * * *

यस्याङ्गे जलदद्युतिः कटितटे सौवर्णवर्णा पटी
नेत्रे फुल्लसरोरुहप्रतिमता वक्त्रे शशाङ्काकृतिः ।
कण्ठे कौस्तुभकान्तिरुज्ज्वलतमा वक्षःस्थले चोत्तमा
काप्यम्भोजमुखी पदे सुरसरित्कस्मैचिदस्मै नमः ॥

**End:**

यस्यायुतायुतांशेन विश्वभक्तिरियं स्थिता ।
अविच्छिन्नस्वरूपं तं प्रणमामि सदाऽमलम् ॥

इति विष्णुपुराणवचनेन चायमर्थो दर्शितः । निर्विशेषं परं ब्रह्म अयुतांशं कृत्वा तत्रैकांशमादाय पुनश्चायुतताकरणे दशकोट्यंशा भवन्ति। परब्रह्मणो दशकोट्यंशानां मध्यगतैकस्मिन्नंशे मायाशक्तिः कृत्स्नापि तिष्ठति । तन्मायाविशिष्टपरब्रह्मैवेश्वरस्ततस्तदीश्वरोपेक्षा परब्रह्मोपेक्षैवेति- सिद्धम् ॥

Fol. 37*b* is left blank. Foll. 38—40*a* contain some witty stanzas. Fol. 40*b* is left blank.

---

R. No. **1431.**

Palm-leaf. 17 × 1¼ inches. Foll. 58. Lines, 4 in a page. Nandināgarī. Fair.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnṛsiṁhācārya of Rāmēśvaram.

(*a*) प्रातस्स्मरणीयस्तोत्रम्.

PRĀTASSMARAṆĪYASTOTRAM.

Foll. 1*a*—2*a*.

Same work as that described under No. 10162 of the D.C.S. MSS., Vol. XVIII, but with slight difference in the beginning and end and with the addition of the stanzas given below. In the last stanza the authorship of the work is attributed to Vādirāja.

Complete; in three stanzas.

**Beginning:**

कराग्रे वसते लक्ष्मीः करमूले सरस्वती ।
करमध्ये तु गोविन्दः प्रभाते करदर्शनम् ॥
माता च कमला देवी पिता देवो जनार्दनः ।
बान्धवा विष्णुभक्ताश्च स्वदेशं भुवनत्रयम् ॥
सुदिनं सुप्रभातम् ।

उत्तिष्ठोत्तिष्ठ गोविन्द ( . . . ) त्रैलोक्यं मङ्गलं कुरु ॥

* * * *

प्रातस्स्मरामि वरकुण्डलशोभिगण्ड . . . रमेशम् ॥

**End:**

वादिराजयतिप्रोक्तं श्लोकत्रयमिदं शुभम् ।
प्रातःकाले पठेन्नित्यं पापेभ्यः प्रतिमुच्यते ॥

---

(*b*) सुप्रभातपञ्चकम्.

SUPRABHĀTAPAÑCAKAM.

Fol. 2.

Five stanzas addressed to the different incarnations of God Viṣṇu and intended to be repeated in the early morning, such repetition being believed to enable one to secure welfare and prosperity : by Lakṣmīvallabhabhikṣu, a disciple of Vādirājārya.

Complete.

**Beginning:**

श्रीमत्स्यकूर्मास्य(रूय)वराहदेवनृकेसरी(रिन्) वामन जामदग्न्य ।
श्रीरामकृष्णावथ बुद्धकल्की कुर्वन्तु सर्वे मम सुप्रभातम् ॥
श्रीकृष्ण नारायण वासुदेव मुकुन्द कृष्णाच्युत माधवेति ।
सङ्कीर्तनाद्भुतकृतप्रसङ्गाः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

**End:**

इति प्रभातपञ्चकं प्रतिप्रभातमादरात्
स्तुतिं पठन्ति ये नरा गतिं व्रजन्ति ते शुभाम् ॥
वादिराजार्यशिष्येण लक्ष्मीवल्लभभिक्षुणा ।
प्रभातपञ्चकं स्तोत्रं कृतं कृष्णस्य तुष्टये ॥

Foll. 3*a* and 4*a* contain a few stanzas from Tulasīstōtra.

---

(*c*) दधिवामनस्तोत्रम्.

DADHIVĀMANASTŌTRAM.

Foll. 4*a*—6*a*.

Same work as that described under No. 9996 of the D.C.S. MSS., Vol. XVIII. Said to be taken from the Vāmanapurāṇa.

Complete

---

(*d*) नारायणनामाष्टकम्.

NĀRĀYAṆANĀMĀṢṬAKAM.

Fol. 6*a*.

Gives eight names of God Viṣṇu, *i.e.*, Nārāyaṇa, and explains the advantages of their repetition daily.

Complete.

**Beginning:**

अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम् ।
हंसं नारायणं चैव एतन्नामाष्टकं शुभम् ॥

**End:**

गङ्गायां मरणं चैव दृढा(भ)क्तिस्तु केशवे ।
ब्रह्मविद्याप्रबोधस्स्यात्तस्मान्नित्यं पठेन्नरः ॥

---

(*e*) नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 6*b*—9*a*. Fol. 9*b* is left blank.

Same work as that described under No. 8935 of the D.C.S. MSS., Vol. XVII, but with a few additional stanzas in the beginning and end and with a slightly different colophon.

Complete.

---

(*f*) शिवस्तुतिः.

ŚIVASTUTIḤ.

Foll. 10*a*—13*b*.

A devotional eulogy on God Śiva.

Complete.

**Beginning:**

स्फुरत्स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥
त्रिलोचन विलोचने लसदि(ति)ते ललामाय(यि)ते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तलतया वशीकृतवती सतीयं सती
स्वभक्तवशगो भवानपि वशी प्रसीद प्रभो ॥

**End:**

अकृशं कुचयोः कृशं वलग्ने
विपुलं चक्षुषि आय(विस्तृ)तं नितम्बे ।
अरुणाधरमाविरस्तु चित्ते
करुणाशालिकपालिभागधेयम् ॥

**Colophon:**

शिवस्तुतिस्समाप्ता ॥

---

(*g*) इन्द्राक्षीस्तोत्रम्.

INDRĀKṢĪSTŌTRAM.

Foll. 14*a*—15*a*. Fol. 15*b* is left blank.

Same work as that described under No. 10713 of the D.C.S. MSS., Vol. XIX, but with a different end as given below.

Complete.

**End:**

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्त(य)न् सहस्रं तु लभते वाञ्छितं फलम् ॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये ऽयम्बके गौरि नारायणि नमोऽस्तु ते ॥

**Colophon:**

इन्द्राक्षीस्तोत्रं सम्पूर्णम् ॥

(*h*) नवग्रहस्तोत्रम्.

NAVAGRAHASTŌTRAM.

Foll. 16*a*—17*a*.

Same work as that described under No. 9535 of the D.C.S. MSS., Vol. XVIII, but the stanzas found herein are in a different order.

Complete.

Fol. 17*b* contains a few stanzas on the holiness of Sētu.

---

(*i*) नृसिंहगुर्वष्टकम्.

NṚSIṀHAGURVAṢṬAKAM.

Fol. 8.

Eight stanzas in praise of one Nṛsiṁhaguru, a follower of Dvaita-Vēdānta: by Ananta, son of Nṛsiṁhācārya.

Complete.

**Beginning:**

सत्सुधादि सकलं सुजनेभ्यो वर्णयन्तमिह विंशतिवारम् ।
श्रीनृसिंहगुरुराजमहं तं मध्वदासमखिलानतमीडे ॥

**End:**

वासुदेवकरुणाधिकपात्रं नन्दिताखिलजनैर्भजनीयम् ।
श्री(नृसिंह . . . मध्वदासमखिलानतमीडे) ॥
नृसिंहाचार्यवर्याणामनन्ताख्येन सूनुना ।
कृतं गुर्वष्टकं भक्त्या पठतः प्रीयते हरिः ॥

Foll. 19*a*—24*b* contain a few Smṛtivacanas on Snānāṅgatarpaṇa, Puṇḍra, Bhagavannirmālya, etc., and also Puṇyapuruṣaviṣayastōtras.

---

(*j*) मङ्गलाष्टकम्.

MAṄGALĀṢṬAKAM.

Foll. 25*a*—27*a*.

By Vādirāja. Similar to the work described under No. 11331 of the D.C.S. MSS., Vol. XIX.

Complete.

**Beginning:**

शिवतनयवरिष्ठं सर्वकल्याणमूर्तिं
परशुकमलहस्तं शोभितं मोदकेन ।
अरुणकुसुममालाव्याललम्बोदरं तं
मम हृदि(दय)निवासं श्रीगणेशं नमामि ॥
लक्ष्मीर्यस्य परिग्रहः कमलभूस्सूनुर्गरुत्मान्रथः
पौत्रश्चन्द्रविभूषणस्सुरगुरुश्शेषश्च शय्या पुनः ।
ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोस्सेवकाः
स त्रैलोक्यकुटुम्बपालनपरः कुर्वन्तु(र्यात्तु) मे मङ्गलम् ॥

**End:**

इत्येतद्वरमङ्गलाष्टकमिदं श्रीवादिराजेश्वरै-
ङ्व्या(रा)ख्यातं जगतामभीष्टफलदं सर्वाशुभध्वंसनम् ।
माङ्गल्यादिशुभक्रियासु सततं सन्ध्यास्सदा(सु वा) यः पठे-
द्धर्मार्थादिसमस्तवाञ्छितफलं प्राप्नोत्यसौ मानवः ॥

**Colophon:**

इति श्रीवादिराजकृतमङ्गलाष्टकस्तोत्रं सम्पूर्णम् ॥

Fol. 27 contains a few stanzas of Rāmāyaṇasāra, Bhāratasāra and Bhāgavatasāra.

---

(*k*) सदाचारस्मृतिः.

SADĀCĀRASMṚTIḤ.

Foll. 28*a*—31*b*.

By Ānandatīrtha. Same work as that described under No. 2770 of the D.C.S. MSS., Vol. V.

Complete.

---

(*l*) वायुस्तुतिः.

VĀYUSTUTIḤ.

Foll. 32*a*—44*a*. Fol. 44*b* is left blank.

By Trivikramapaṇḍita, son of Subrahmaṇyasūri and disciple of Keśavānandatīrtha. Same work as that described under No. 9810 of the D.C.S. MSS., Vol. XVIII, but with a slight difference in the end and with additional stanzas and colophon as given below.

Complete.

**End:**

सुब्रह्मण्याख्यसूरेस्सुत इति सुभृशं केशवानन्दतीर्थ-
श्रीमत्पादाब्जभक्तः श्रु(स्तु)तिमकृत हरेर्वायुदेवस्य चास्य ।
तत्पादार्चादरेण ग्रथितपदलसन्मालया त्वेतया ये
संराध्यामू नमन्ति प्रति(ति)तमतिगुणा मुक्तिमेते व्रजन्ति ॥
वायुर्भीमो भीमनाशे महौजास्सर्वेषां च प्राणिनां प्राणभूतः ।
अनावृत्तिर्देहिनां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः ॥

* * * *

यस्सर्वगुणसम्पूर्णस्सर्वदोषविवर्जितः ।
प्रीयतां प्रीतये चालं विष्णुर्मे परमः सुहृत् ॥
पान्त्वस्मान् (. .) इति ब्रह्मेशसाक्षात्कराः ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमपण्डिताचार्यविरचिता हरिवायुस्तुतिः समाप्ता ॥

---

(*m*) देवतार्चनविधिः.

DĒVATĀRCANAVIDHIḤ.

Foll. 45*a*—53*b*.

Same work as that described under No. 8635 of the D.C.S. MSS., Vol. XVI.

Complete.

---

(*n*) तृचकल्पः.

TṚCAKALPAḤ.

Foll. 54*a*—58*b*. Fol 56*b* is left blank.

Similar to the work described under No. 7850 of the D.C.S. MSS., Vol. XV.

Wants beginning and almost complete in the end.

**Beginning:**

उदु त्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः, सूर्यो देवता, नवाख्या गायत्री ।

*   *   *   *

सूर्यो देवींमुषसं रोचमानामर्योमयो यामध्येति पश्चात् ॥

**End:**

चित्रं देवानामुदगादनीकमिति षडर्चस्य सूक्तस्य आङ्गिरसपुत्रः कुत्स ऋषिः सूर्यो देवता, सूर्योपस्थाने विनियोगः ॥

---

R. No. **1432.**

Palm-leaf. 15¼ × 1½ inches. Foll 51. Lines, 6 in a page. Nandināgarī. Fair.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

(*a*) तर्कसङ्ग्रहदीपिका.

TARKASAṄGRAHADĪPIKĀ.

Foll. 1*a*—24*b*.

By Annambhaṭṭa. Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Complete.

Fol. 25*a* contains a few lines of Śrāddhīyavacana, etc. Fol. 25*b* is left blank. Fol. 26*a* contains the entry: ओङ्कारवादार्थप्रकारः श्रीविजयीन्द्रस्वामिभिः रचितः श्री. Fol. 26*b* is left blank.

---

(*b*) तत्त्वप्रकाशिकाव्याख्या.

TATTVAPRAKĀŚIKĀVYĀKHYĀ.

Foll. 27*a*—47*a*. Fol. 47*b* is left blank.

A commentary on Jayatīrtha's Tattvaprakāśikā, which work has been described under No. 4813 of the D.C.S. MSS., Vol. X.

The name of the author is not known, but he speaks of the existence of other commentaries on the work.

Incomplete.

**Beginning:**

रामं सर्वगुणैः पूर्णं निर्दोषं साधुसेवितम् ।
मुक्तिदं जानकीकान्तं प्रणमामि निरन्तरम् ॥
ज्ञानभा हृत्तमोहर्ता श्रुतिपङ्कजमोदकः ।
व्यासांशुमान् दर्शयतु सन्मार्गं गुरुमण्डलः ॥
वादज्योत्स्ना [ध्व]स्तहृद्ध्वान्तविबुधाभ्यर्थिसाधकम् ।
शुद्धावबोधकं सेवे नित्यं मध्वाविधुं विदे ॥
मध्वसिद्धान्तमामथ्य शुद्धधीमन्दराद्रिणा ।
लब्धा न्यायसुधा येन तं जयेन्द्रमहं भजे ॥
दुर्वादिगजसिंहांस्तान्सर्वशास्त्रार्थकोविदान् ।
व्यासराट्प्रमुखान् पूर्वटीकाकर्तॄन् नमाम्यहम् ॥
दुर्मार्गादुद्धृतो यैश्च सन्मार्गे संप्रवेशितः ।
तान् गुरून् सततं सेवे सर्वशास्त्रविशारदान् ॥
अथैतत्कृपया ब्रह्मसूत्रभाष्यप्रकाशिकाम् ।
व्याकरिष्ये यथाबोधं वाक्छुद्ध्यै नातिमानतः ॥
पूर्वाचार्यकृतास्सन्ति व्याख्या विद्वन्मनोहराः ।
मन्दबोधाय तत्रोक्तसंग्रहायाप्ययं मम ॥

इह खलु तापत्रयपरिशुष्यत्सत्कुमुदमोदकरीं मध्वदुग्धाब्धिसम्भूतभाष्येन्दूदतकामुदी परतत्त्वप्रकाशिकां कर्तुकामो जयतीर्थमुनिः प्रारिप्सिताविघ्नपरिसमाप्त्यादिप्रयोजनकशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकेष्टदेवतास्तुतिरूपमङ्गलं कृत्वा शिष्यशिक्षायै ग्रन्थादावुपनिबध्नाति—शुद्धेति ।

अस्मद्युत्तम इति सूत्रेण अस्मच्छब्द एव उपपदत्वेन श्रूयमाणो न श्रूयमाणो वा तदर्थविवक्षायामुत्तमपुरुषो भवतीत्युक्त्या उत्तमपुरुषस्या-

स्मच्छब्दाविनाभूतत्वात् अहमिति कर्ता लभ्यते। तथा चाहं ब्रह्म अलं वन्दे इत्यन्वयः। इदं पद्यं भाष्याद्यपद्यव्याख्यानरूपम्। तथाहि—

अस्याध्यायार्थतयोक्ते गुणैस्सर्वैरुदीर्णमित्यत्र गुणपदं किं तार्किकरीत्या दुःखादिपरं वेदान्तरीत्या सत्त्वादिपरं वा? नाद्यः।

**End:**

यथोक्तं सुधायां सङ्गतिर्द्विविधा—

अन्तर्भावलक्षणा, आनन्तर्यलक्षणा च। आद्यापि शास्त्राध्यायपादान्तर्भावभेदेन त्रिविधा। द्वितीयाप्याक्षेपिकी, आतिदेशिकी, औपोद्घातिकी आपवादकीत्याद्यनेकविधा इति.

---

(c) प्रणवदर्पणखण्डनम्.

PRAṆAVADARPAṆAKHAṆḌANAM.

Foll. 48*a*—54*a*. Fol. 54*b* is left blank.

In the colophon given below the author is apparently stated to be Vidyādhīśa though it is generally attributed to Vijayīndratīrtha. Same work as that described under No. 4798 of the D.C.S. MSS., Vol. X.

This is also called Oṅkāravicāra.

Complete.

**Colophon:**

इति श्रीविद्याधीश[श्री]श्रीपादचूडामणिकृतोङ्कारविचारस्सम्पूर्णः॥

---

R. No. **1433.**

Palm-leaf. $18\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 146. Lines, 8 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

## भारततात्पर्यनिर्णयटीका—प्रमेयमणिमाला.

## BHĀRATATĀTPARYANIRṆAYAṬĪKĀ : PRAMĒYAMAṆIMĀLĀ.

A commentary on Ānandatīrtha's Mahābhāratatātparyanirṇaya : by Śrīnivāsa, disciple of Mahīdhrācārya, who was the son of Viṭṭhalācārya. This Viṭṭhalācārya is stated (in the penultimate stanza in the extract) to have been a disciple of Nṛsimhārya's disciple Nārāyaṇārya.

Breaks off in the 22nd Adhyāya.

**Beginning :**

श्रीमदानन्दतीर्थार्यहृदयाम्बुजवासिनम् ।
रमाबाहुलताश्लिष्टं नारायणमहं भजे ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
उद्दधार सुधां वन्दे तमहं जययोगिनम् ॥
श्रीमदानन्दतीर्थार्यकृतशास्त्रपयोनिधिम् ।
यो विमथ्य ददौ ज्ञानसुधां तं गुरुमाश्रये ॥
श्रीविठ्ठलार्यतनुज(श्रीमहीध्रार्यसन्मणेः) ।
स्मृत्वा पदाब्जे व्याकुर्वे महाभारतनिर्णयम् ॥

परमानन्दाख्यात्मकस्य परमात्मनः प्रतिबिम्बतया स्वतश्चिदानन्दाख्यात्मकस्य जीवस्याविद्याकामकर्मनिमित्तबन्धध्वंसाय निखिलजडाजडात्मकात् प्रपञ्चा . . . . . . खिलगुणगणात्मकतया निरस्तसमस्तदोषतया च परमपुरुषमेव गमयितुं सकलसदागमानां वृत्तिः ।

* * * *

भगवानानन्दतीर्थमुनिः सज्जनानुकम्पया सकलसदागमानां निर्णयं भारतस्य सर्वोत्तमत्वेन विशिष्य तदनुसारेण करिष्यन् विलीनप्रकृतितया अन्तरायविधुरोऽपि शिष्यान् शिक्षयन् स्तुतिरूपमङ्गलमाचरति—नारायणेति । नारायणाय ते नम इति सम्बन्धः ।

* * * *

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां विठ्ठलाचार्यतनुजश्रीमद्दीक्षाचार्यचरणसेविना श्रीनिवासेन विरचितायां प्रमेयमणिमालायां प्रथमोऽध्यायः ॥

**End :**

अरक्ताः भगवत्समर्पणेन सात्विकाः ।

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमन्महाभारततात्पर्यनिर्णयस्य टीकायां प्रमेयमणिमालायामेकविंशोऽध्यायः ॥

ततः कुरुक्षेत्रमिति । धृतराष्ट्रादिमरणानन्तरमित्यर्थः ।

स्वकुलं सञ्जिहीर्षुस्सन् विप्रशापमजीजनदिति ।

* * * *

श्रीमध्वदासमखिलानतपादपद्मं
व्याख्याप्रभाप्रकटितामलतत्त्वसङ्घम् ।
श्रीमन्नृसिंहवरनामिनमाश्रयेऽहं
सन्मानसाम्बुजदिवाकरमग्र्यकान्तिम् ॥
श्रीमन्नृसिंहार्यमुखेन्दुबिम्बात्स्रवत्सुतत्त्वामृतपानतृप्तात् ।
नारायणार्याद्यदवाप विद्यास्तं विठ्ठलार्यं च भजे परं गुरुम् ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
सत्तत्त्वर . . . . . . ॥

---

R. No. **1434.**

Palm-leaf. 17 × 1⅜ inches. Foll. 159. Lines, 5 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

(*a*) वायुस्तुतिव्याख्यानम्--कविकर्णामृतम्.

VĀYUSTUTIVYĀKHYĀNAM: KAVIKARṆĀMṚTAM.

Foll. 1*a*--41*a*. Fol. 41*b* contains some stanzas of Madhvācāryastuti.

A commentary on the Vāyustuti of Trivikramapaṇḍitācārya, which work has been described under No. 9810 of the D.C.S. MSS., Vol. XVIII: by Kavidarpaṇa Vēdāṅgamuni. This is also called Kavikarṇāmṛta.

Complete.

**Beginning:**

श्रीमदानन्दतीर्थभगवत्पादाचार्यः वायुस्तुतौ प्रवृत्तानां सज्जनानां मोक्षाद्यखिलपुरुषार्थप्रदानाय स्वाभीष्टदेवताभूतश्रीनृसिंहनखरान् प्रार्थयते--पान्त्विति । पुरुहूतः देवेन्द्रः पुरुहूतः पुरन्दर इत्यमरः । तस्य वैरिणो हिरण्यकशिपुप्रभृतयो दैत्याः त एव बलवन्मातङ्गमाः ।

* * * *

अस्मान् पान्त्विति योजना । श्रीमदानन्दतीर्थभगवच्चरणानां शिष्येण त्रिविक्रमपण्डिताचार्येण विराचिते(त)स्तुत्या प्रसन्नो भगवानानन्दतीर्थमुनिः वायुस्तुतेर्मन्त्रसिद्ध्यर्थं सम्पुटाकारतयादावन्ते च पठनार्थं नरसिंहनखरान् स्तौति--पान्त्विति । श्रीमांश्चासौ कण्ठीरवास्यश्च सिंहमुखः नरसिंह इति पदात्(यावत्) । तस्य प्रतताः प्रसिद्धा इति वा ।

**End:**

सम्प्रति भगवान् स्तोत्रकर्ता त्रिविक्रमाचार्यः स्तोत्रमुपसंहरन् स्वाभिजात्यप्रख्यापनायात्मीयप्रसिद्धकुलदेवताचार्यजनकानां नामाभिधानपूर्वकमेतत्स्तोत्रपाठकानां फलमभिदत्ते --सुब्रह्मण्येति । सुब्रह्मण्याख्यसूरेः सुब्रह्मण्यविपश्चितः ।

* * * *

अमू केशवानन्दतीर्थौ संराध्य सम्पूज्य नमन्ति नमस्कारं कुर्वन्ति । एते जनाः प्रततमतिगुणाः अतिविततापरोक्षज्ञानगुणास्सन्तः मुक्तिं मोक्षं व्रजन्ति प्राप्नुवन्ति ॥

**Colophon:**

कविकर्णामृतं नाम्ना वेदाङ्गमुनिना कृतम् ।
व्याख्यानं वर्ततामेतदासुधांशुदिवाकरम् ॥

---

(*b*) वायुस्तुतिः—सव्याख्या.

VĀYUSTUTIḤ WITH COMMENTARY.

Foll. 42*a*—46*b*.

Same work as that described under No. 9813 of the D.C.S. MSS., Vol. XVIII.

Incomplete.

Foll. 47 and 48*a* contain a few lines of Garuḍapurāṇōktānusandhāna. Fol. 48*b* is left blank. Fol. 49 contains some lines from the स्मृतिसङ्ग्रह of ताम्रपर्णिश्रीनिवासाचार्य. Fol. 50 contains a few sentences dealing with एकादशीनैवेद्यसमर्पण.

---

(*c*) स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

Foll. 51*a*—130*b*.

By Tāmraparṇi Śrīnivāsācārya. Similar to the work described under No. 2808 of the D.C.S. MSS., Vol. V.

Incomplete.

**Beginning:**

श्रीताम्रपर्णीश्रीनिवासाचार्यकृतस्मृतिसङ्ग्रहः ॥

व्यासं विश्वपतिं नत्वा पूर्णबोधादिकान् गुरून् ।
नत्वा मन्वादिकांश्चैव क्रियते स्मृतिसङ्ग्रहः ॥

जा(त)कर्म । दर्पणे—

नारी यदा पुंसवनं विहाय सूयेत सीमन्तमृतेऽपि पुत्रम् ।
गृहीतपुत्रा विधिवत्तु(त्पु)नश्च सीमन्तमर्हत्यथ तस्य माता ॥
जाते कुमारे जनकस्सचेलं स्नात्वाथ विप्रैरथ जातकर्म ।
कुर्वन् शिशोर्नाभिविवश्छनात्प्राक्पुण्याहनान्दीमुखमत्र शास्त्रम् ॥

End:

ततः पितुः प्रेतकार्याणि कृत्वा तत्तत्काले षोडश श्राद्धानि कृत्वा संवत्सरे पूर्णे सपिण्डीकरणं कार्यम्; अन्यथा संवत्सरात्पूर्वं न कार्यम् । यत्तु द्वादशाहादौ सपिण्डीकरणविधानमस्ति तद्वृद्धिनिमित्तविषयम् । पुनस्सपिण्डीकरणे ।

---

(*d*) गरुडपुराणम्

GARUḌAPURĀṆAM.

Foll. 131*a*—153*a*.

Contains Adhyāyas six to nine of the Brahmakāṇḍa forming part of the Garuḍapurāṇa, which are the same as those found in the printed edition of the Garuḍapurāṇa (Śrī Vēṅkaṭēśvara press). These four Adhyāyas contain the eulogies on Viṣṇu made by the deities, subordinate to Him, and by the sages and saints of olden times.

**Beginning:**

श्रीकृष्णः—

तत्र स्थितानि तत्त्वानि तथा तत्त्वाभिमानिनः ।
स्वे स्वे ह्यायतनाभावात्तदर्थं च खगेश्वर ॥
हरिं नारायणं सम्यक् स्तोतुं समुपचक्रमुः ।
तारतम्यानुसारेण प्रत्येकं हीडिरे हरिम् ॥
तत्राप्यादौ हरिं लक्ष्मीः स्तोतुं समुपचक्रमे ।
चिन्त्याचिन्त्यगुणा विष्णोर्विरुद्धास्सन्ति सद्गुणाः ॥

* * * *

**Colophon :**

इति श्रीगरुडपुराणे ब्रह्मकाण्डे श्रीकृष्णगरुडसंवादे षष्ठोऽध्यायः ॥

**End :**

न स्मरन्तो(न्तु)त्तमं विष्णुं तारतम्यानुसारतः ।
पावनं विष्णुनैवेद्यं न भुञ्जानो द्विजाधमः ॥
रमाब्रह्मादीनां तु अदत्वा भुञ्जन्ति मानवाः ।
तैर्भुक्ता सततं विष्ठा सदा क्रिमिशतैर्युता ॥

**Colophon :**

इति श्रीगरुडपुराणे ब्रह्मकाण्डे श्रीकृष्णगरुडसंवादे नवमोऽध्यायः ॥

The scribe adds the following stanzas :—

काल्पी(य)वंशसम्भूतमाधवाचार्यवंशजः ।
रामचन्द्रार्यतनयानन्दतीर्थार्यनामहि(कः) ॥
तेनायं कृष्णगरुडसंवादं लोकतारकम् ।
पठतां श्रृण्वतां नित्यं विष्णुप्रीतिकरं शुभम् ॥
प्रजोत्पत्तिनामके चाब्दे श्रावणे चाद्यपक्षके ।
पौर्णम्यां(मास्यां) भानुवारे लिखितं प्रीत्यै माधवमध्वयोः ॥

---

(*e*) गोविन्दस्तवराजः.

GŌVINDASTAVARĀJAḤ.

Foll. 153*b*—159*b*.

This is a hymn in praise of Gōvinda or Viṣṇu and is taken from the thirteenth Adhyāya of the Kārtikamāhātmya of the Skāndapurāṇa.

Complete.

**Beginning :**

श्रीशौनक उवाच—

अम्बरीष शुभं वाक्यं मयोक्तं श्रृणु भक्तितः ।
धर्मार्थकाममोक्षार्थं कुरु गोविन्दकीर्तनम् ॥

* * * *

यावन्न पठते जन्तुः गोविन्दस्य महास्तवम् ।
दुर्निमित्तानि भूपाल राजिकं दैविकं भयम् ॥

**End:**

वेदान्तपाठनिरतां(सक्तानां)सत्संसेवा विधीयते ।
आसनाद्युपचारैश्च पूजा कार्या हि सज्जन ॥

**Colophon:**

इति श्रीस्कान्दपुराणे शौनकाम्बरीषसंवादे कार्त्तिकमाहात्म्ये त्रयोदशोऽध्यायः ॥

The scribe adds--

प्रजोत्पत्तिनामके चाब्दे श्रावणे चाद्यपक्षके ।
पौर्णम्यां(मास्यां)भानुवारे[तु]गोविन्दस्तवमुत्तमम् ॥
माधवाचार्यपौत्रेण रामचन्द्रार्यसूनुना ।
आनन्दतीर्थेन लिखितं प्रीत्यै माधवमध्वयोः ॥

---

R. No. **1435.**

Palm-leaf. 14½ × 1⅛ inches. (Foll. 130—139 are 7⅛ × 1⅛ inches in size.) Foll. 142. Lines, 6 in a page. Nandināgarī. Fair.

Purchased in 1914-15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

(*a*) विष्णुपञ्चकव्रतम्.
VIṢṆUPAÑCAKAVRATAM.

Foll. 1*a*—5*a*.

Same work as that described under No. 8524 of the D.C.S. MSS., Vol. XVI, but with four additional stanzas in the beginning.

Complete.

Fol. 5*b* contains a few lines of Svāhāntanāmāvali of Viṣṇu, etc.

(*b*) लक्षप्रदक्षिणव्रतकल्पः.

LAKṢAPRADAKṢIṆAVRATAKALPAḤ.

Fol. 6.

Same work as that described under No. 8449 of the D.C.S. MSS., Vol. XVI, but with slight difference at the end which is given below.

Complete.

**End :**

आसन्नप्रसवा नारी नीरपूर्णघटं यथा ।

* * * *

प्रदक्षिणा तु सा ज्ञेया नमस्कारसमा तु सा ॥

**Colophon :**

इति लक्षप्रदक्षिणविधिः ॥

---

(*c*) लक्षनमस्कारव्रतकल्पः.

LAKṢANAMASKĀRAVRATAKALPAḤ.

Foll. 6*b*—8*b*.

Same work as that described under No. 8445 of the D.C.S. MSS., Vol. XVI, but with the addition of four stanzas describing Namaskāralakṣaṇa.

Complete.

उरसा शिरसा दृशा मनसा वचसा तथा ।

पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥

* * * *

मम ध्यानेन संयुक्तो नमस्कार इतीरितः ॥

**Colophon :**

इति लक्षनमस्कारविधिः ॥

---

(*d*) लक्षवर्तिव्रतकल्पः.

LAKṢAVARTIVRATAKALPAḤ.

Foll. 8*b*—9*b*.

Similar to the work described under No. 8454 of the D.C.S. MSS., Vol. XVI. This is said to have been related by God Viṣṇu to Nārada, and the observance of the vow is said to remove all sins. This Vrata is to commence on the 11th day of the dark fortnight of the Āṣāḍha month and to come to an end on the full moon day of the bright fortnight of the Kārtika month.

Complete.

**Beginning:**

नारदः—

ये चान्ये पापिनो लोके दानधर्मविवर्जिताः ।
कर्महीना व्रतभ्रष्टाः डम्भांचारसमन्विताः ॥

*　　*　　*　　*

तथापि वक्ष्ये विप्रेन्द्र यदुक्तं हरिणा पुरा ।
अनायासेन मर्त्यानां नारीणां च विशेषतः ॥
व्रतस्याचरणात् पापगन्धलेशो न विद्यते ।
चातुर्मास्ये तु संप्राप्ते माधवे शयनं गते ॥
नीराजनानि कार्याणि वर्तिलक्षेण नारद ।
आषाढस्यासिते पक्षे एकादश्यां समारभेत् ॥
कार्तिकस्य सिते पक्षे पौर्णमास्यां समापयेत् ।

**End:**

अग्ने नयेति मन्त्रेण जुहुयात् सघृतं चरुम् ॥
सहस्रं तु क्रमाद्धुत्वा होमशेषं समापयेत् ।
पात्रं च गुरवे दत्वा ब्राह्मणान् भोजयेत्ततः ॥
एवं कृते महाभाग मुच्यते सर्वकिल्बिषैः ।
गां च दद्यात् प्रयत्नेन स्वर्णशृङ्गां सवत्सकाम् ॥
वस्त्रादिभिः स्वर्चितां च श्रोत्रियाय कुटुम्बिने ।
एवं कृते महाभाग पूर्णं फलमवाप्स्यसि ॥

**Colophon:**

इति लक्षवर्तिकल्पः संपूर्णः ॥

(*e*) लक्षपुष्पसमर्पणाविधिः.

LAKṢAPUṢPASAMARPAṆAVIDHIḤ.

Foll. 9*b*—11*b*.

Similar to the work described under No. 8447 of the D.C.S. MSS., Vol. XVI. This Vrata is to commence either in the month of Māgha or in Vaiśākha. It is stated to have been related by Nārāyaṇa to Brahman and the observance of the Vrata is said to have the power to confer longevity, health and merit and to ward off calamities.

Complete; said to form part of the Lakṣmīsaṁhitā.

**Beginning:**

श्रीब्रह्मा—

छिन्धि सर्वज्ञ देवेश सर्वसज्जनरक्षक ।
व्रतं ब्रूहि सुरश्रेष्ठ लक्षपुष्पस्य सर्वदा ॥

श्रीनारायणः—

शृणु ब्रह्मन् प्रवक्ष्यामि लक्षपुष्पव्रतं शुभम् ।
मूल्यादानीय पुष्पाणि विष्णवे च समर्पयेत् ॥
कालसङ्ख्यां प्रवक्ष्यामि माघे वैशाख एव च ।
पुष्पाणि पुरतो विष्णोः न्यस्य पुण्याहवाचनम् ॥
रात्रौ जागरणं कुर्यात् ब्राह्मणेभ्यः प्रदक्षिणम् ।
दापयेत्तु स्वशक्त्या वा वित्तशाठ्यं न कारयेत् ॥

**End:**

आयुरारोग्यदं पुण्यमपमृत्युहरं तथा ।
तस्मात् त्वमपि हे ब्रह्मन् ज्ञानं मोक्षं च विन्दसि ॥

**Colophon:**

इति लक्ष्मीसंहितायां हंसब्रह्मवादे लक्षपुष्पसमर्पणविधिः ॥

---

(*f*) लक्षतुलसीव्रतकल्पः.

LAKṢATULASĪVRATAKALPAḤ.

Foll. 11*b*—12*b*.

Same work as that described under No. 8440 of the D.C.S. MSS., Vol. XVI, but without the first stanza in the beginning and with a different colophon which is given below.

Complete.

**Colophon:**

इति श्रीधर्मोत्तमे लक्षतुलसी उद्यापनं संपूर्णम् ॥

---

(*g*) लक्षदीपव्रतकल्पः.

LAKṢADĪPAVRATAKALPAḤ.

Foll. 12*b*—13*b*.

Similar to the work described under No. 8442 of the D.C.S. MSS., Vol. XVI.

Complete; as found in the Brahmāṇḍapurāṇa.

For the beginning see under No. 8442 referred to above.

**End:**

दीपप्रज्वलनोपेतं पञ्चवर्तिसमन्वितम् ।
दास्यामि लोकनाथेश सूर्यकोटिसमप्रभ ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे लक्षदीपव्रतकल्पः ॥

---

(*h*) लक्षपद्मव्रतकल्पः.

LAKṢAPADMAVRATAKALPAḤ.

Foll. 13*b*—14*a*.

Similar to the work described under No 8446 of the D.C.S. MSS., Vol. XVI.

Complete; stated to form part of the Vāmanapurāṇa.

**Beginning:**

ब्रह्मोवाच—

देवदेवारविन्दाक्ष मायातीत महामते ।
इदानीं श्रोतुमिच्छामि लक्षपद्मव्रतं शुभम् ॥

श्रीभगवान्—

लक्षपद्मस्य माहात्म्यं शृणुष्व कमलोद्भव ।
एतद्व्रतेन चीर्णेन सर्वपापक्षयो भवेत् ॥

सर्वेषामाश्रमाणां च स्त्रीणां चैव विशेषतः ।
चातुर्मास्यं समारभ्य यावदुद्बोधनं हरेः ॥
देवस्य सन्निधौ नारी पद्मान्येतानि कारयेत् ।
गोष्ठे बृन्दावने चैव नदीतीरे विशेषतः ।
पूर्वाह्णकाले कुर्वीत व्रतस्य फलभाग्भवेत् ॥

**End:**

बन्धुभिस्सह भुञ्जीत विष्णुभक्तिपरायणः ।
एवंकृते महाभाग विष्णुभक्तिं च विन्दति ॥
तस्मात्सर्वप्रयत्नेन कर्तव्यं व्रतमुत्तमम् ।
सुपुत्रकामिनी नारी सुपुत्रं चैव विन्दति ॥

**Colophon:**

इति श्रीवामनपुराणे लक्षपद्मव्रतकल्पः ॥

---

(९) लक्षस्वस्तिकव्रतकल्पः.

LAKṢASVASTIKAVRATAKALPAḤ.

Foll. 14*b*–15*b*.

Similar to the work described under No. 8166 of the D.C.S. MSS., Vol. XVI. This Vrata is to commence on the 10th day of the Āṣāḍha month, and by its observance King Kalmāṣa also called Saudāsa, who was cursed to become a devil is said to have been restored to his original state.

Complete.

**Beginning:**

युधिष्ठिरः—

कृष्ण कृष्ण महाबाहो सर्वाघौघविनाशन ।
येन चीर्णेन पुण्येन सर्वपापक्षयो भवेत् ॥
सर्वेषामाश्रमाणां च स्त्रीणां चैव विशेषतः ।
स्त्रीणां तु दुर्लभं येन स्वल्पायासेन सिध्यति ॥
तद्व्रतं ब्रूहि विश्वात्मन् विष्णुप्रीतिकरं शुभम् ।

श्रीकृष्णः—

श्रृणु कौन्तेय वक्ष्यामि व्रतं पापप्रणाशनम् ॥
सर्वेषामेव सुलभं गुरुहत्त्यापवादनम् ।
पुरा कल्माषनृपतिः गुरुद्रोहसमुद्भवात् ॥
किल्बिषात् क्रूरकर्मा च पिशाचत्वमवाप्तवान् ।
बोधितो ब्रह्मऋषिणा चकार व्रतमुत्तमम् ॥
लक्षस्वस्तिकसंज्ञं च व्रतस्यास्य प्रभावतः ।
पिशाचजन्मतो मुक्तः पश्चाद्राज्यमवाप्तवान् ॥

* * * *

चातुर्मास्ये तु संप्राप्ते दशम्यामारभेद्व्रतम् ।
पुण्याहं वाचयित्वा तु प्राशयेत्पञ्चगव्यकम् ॥
सङ्कल्पं च ततः कुर्याद्यावत्कार्त्तिकपौर्णमी(पूर्णिमा) ।

**End :**

एवं कृत्वा व्रतं सम्यक् पवित्रं पापनाशनम् ॥
पूर्वजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
सर्ववर्णैस्सदा कार्यं स्त्रीभिश्चैव विशेषतः ॥

**Colophon :**

इति लक्षस्वस्तिककल्पं संपूर्णम् ॥

---

(*j*) **धारणपारणव्रतकल्पः.**

DHĀRAṆAPĀRAṆAVRATAKALPAḤ.

Foll. 16*a*—17*b*.

Same work as that described under **No.** 8352 of the D.C.S. MSS., Vol. XVI, but with some difference in the end.

Complete.

**End :**

इति तं प्रतिभाष्याथ कृष्णस्तु स्वपुरीं ययौ ।
पू(ज्य)मानः पौरजनैः समस्तैर्यादवैर्विभुः ॥

युधिष्ठिरोऽपि राजर्षिश्चकारेदं महाव्रतम् ।
विमुक्तस्सर्वपापेभ्यस्सर्वत्र सुखमाप्तवान् ॥

**Colophon:**

इति धारणपारणविधिस्संपूर्णः ॥

---

(*k*) चान्द्रायणव्रतकल्पः.

CĀNDRĀYAṆAVRATAKALPAḤ.

Foll. 17*b*—19*a*.

Deals with the manner of performing the religious expiatory penance Cāndrāyaṇa, according to which the daily quantity of food taken by a person which consists of fifteen mouthfuls at the full moon is diminished by one mouthful everyday during the dark fortnight and is increased in like manner during the bright fortnight. This Vrata may commence on any one of the four months, Aṣāḍha to Kārtika, and is to last for a month, and it is said to have been explained by Kṛṣṇa to Yudhiṣṭhira when the latter requested the former to suggest some means for wiping off the sin caused by the slaughter of his kinsmen in the battle field.

Complete; stated to form part of the Bhaviṣyōttarapurāṇa.

**Beginning:**

युधिष्ठिरः—

कृष्ण कृष्ण महाबाहो वासुदेव जनार्दन ।
नमस्ते पुण्डरीकाक्ष प्रसीद पुरुषोत्तम ॥
भीष्मादिबन्धुवधजन्यमहाघसङ्घं
हर्तुं वदस्व मम कारणमञ्जसा विभो ।
तथेन्द्रियाणां च ममापि निग्रह-
स्तेषां नियम्याय च मे व्रतं प्रभो ॥

श्रीभगवान्—

शृणु कौन्तेय वक्ष्यामि व्रतं चान्द्रायणं परम् ।
बन्ध्वादिवधदोषघ्नं सर्वेन्द्रियनियामकम् ॥

चातुर्मास्ये व्रते चापि मासि कौन्तेय सुव्रत ।
पुण्याहं कारयेत्पूर्वं पौर्णम्यांच(मास्यां) शुभे दिने ॥
पश्चात् सङ्कल्प्य राजेन्द्र तदारभ्य व्रतं चरेत् ।
चन्द्रवृद्ध्या समश्नीयात् कुकुटाण्डप्रमाणतः ॥
दिने दिने हविर्ग्रासान् हानौ हानिं प्रकल्पयेत् ।
एवं मासेन पूर्णं स्यादेकं चान्द्रायणं व्रतम् ॥

**End:**

इदं व्रतं महापुण्यं सर्वपापप्रणाशनम् ।
सर्वयज्ञफलं पुण्यं व्रतानामुत्तमोत्तमम् ॥
ये च श्रृण्वन्ति सततं ये पठन्ति च मानवाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे चान्द्रायणव्रतकल्पस्संपूर्णः ॥

---

(*l*) अखण्डैकादशीव्रतकल्पः.

AKHANDAIKĀDAŚĪVRATAKALPAḤ.

Foll. 19*b*—22*b*.

This Vrata consists in taking one meal on the tenth day, in total abstinence on the eleventh day, and again taking one meal only on the twelfth day during the dark and bright fortnights for a period of one year beginning with the Mārgaśira month. It is said to have been taught by Nārada to King Ambarīṣa and it is said to please God Viṣṇu.

Complete; stated to be the twelfth Adhyāya of the Mārgaśīrṣa-māhātmya forming part of the Skāndapurāṇa.

**Beginning:**

अम्बरीषः—

अखण्डैकादशी ब्रह्मन् विधिं सम्यक् समादिश ।
विष्णोस्संप्रीणनार्थाय प्रसादं कर्तुमर्हसि ॥

नारदः—

श्रृणुष्व नृपशार्दूल एकादश्यां व्रतं शुभम् ।
मार्गशीर्षादिमासेषु द्वादशीषु द्विजोत्तम ॥
शुभव्रतमिदं ग्राह्यमखण्डैकादशीव्रतम् ।
दशम्यां वैकभुक्तं तु एकादश्यामुपोषणम् ॥
द्वादश्यामेकभुक्तं वै अखण्ड इति कथ्यते ।

**End:**

एतत्ते सर्वमाख्यातमखण्डैकादशीव्रतम् ।
अम्बरीष महाभाग त्वं कुरु द्विजसन्निधौ ॥

नारदः—

एवमुक्त्वा द्विजश्रेष्ठः अनुज्ञां प्रतिगृह्य च ।
पूजितस्तेन देवर्षिर्ययौ बदरिकाश्रमम् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे मार्गशीर्षमाहात्म्ये अखण्डैकादशीकथनं नाम द्वादशोऽध्यायः ॥

---

(*m*) अखण्डैकादशीव्रतकल्पः.

AKHAṆḌAIKĀDAŚĪVRATAKALPAḤ.

Foll. 22*b*—27*a*. Fol. 27*b* is left blank.

Similar to the above.

Complete; said to form the thirty-fifth Adhyāya of the Pādmapurāṇa.

**Beginning:**

पाद्मे पञ्चत्रिंशाध्याये—

श्रीसूतः—

इदमन्यच्च वक्ष्यामि व्रतं त्रैलोक्यविश्रुतम् ।
सर्वपापप्रशमनं सर्वकामफलप्रदम् ॥
ब्रह्मक्षत्रियवैश्यानां शूद्राणां चैव योषिताम् ।
मोक्षदं कुर्वतां भक्त्या तद्विष्णोः परमं द्विजाः ॥

एकादशीव्रतं नाम सर्वकामफलप्रदम् ।
कर्तव्यं सर्वदा विप्रैस्स(स्तद्)विष्णुप्रीतिकारणात् ॥
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
यदि भुङ्क्ते स पापीयान् परत्र नरकं व्रजेत् ॥

**End:**

वाराहरूपहैमं च लक्ष्मीनारायणात्मकम् ।
संपूज्य बिम्बदानेन मोक्षलक्ष्मीप्रदो भव ॥
इमं मन्त्रं समुच्चार्य आचार्याय प्रदापयेत् ।
गोभूदानादि कर्तव्यं विशेषफलसिद्धये ॥

इति च पाद्मे अखण्डः ॥

---

(*n*) **गरुडपञ्चमीव्रतकल्पः.**

GARUḌAPAÑCAMĪVRATAKALPAḤ.

**Foll.** 28*a*—32*a*. Fol. 32*b* is left blank.

This vow is intended to be observed on the fifth day of the bright fortnight of the Śrāvaṇa month by a woman wishing to secure prosperity. It is said to have been inaugurated in honour of Garuḍa by the Goddess Pārvatī for the former having permitted the latter to perform the Ṛṣipañcamīvrata without causing molestation.

Complete; said to form part of the Skandapurāṇa.

**Beginning:**

ओं सङ्कल्प्य, शेषान्तर्यामिसङ्कर्षणप्रेरणया प्रीत्यर्थं षोडशोपचार-पूजां करिष्ये—

दधानो हलं सौनन्दं श्वेतवर्णः कृताञ्जलिः ।
सहस्रमूर्धा द्वितीया कर्णभूषः प्रियासुतः ॥
वनमाली पीतवासाः ध्येयो विष्णोस्तु पृष्ठतः । ध्यानम् बिले ।
अनन्तस्सर्वनागानां दातारमवनीधरम् ।
फणासहस्ररुचिरं देवमावाहयाम्यहम् ॥ शेषमावाहयामि ।

हलं सौनन्दमाविभ्रदनन्त हरिवल्लभ ।
गृहाणार्घ्यं मया दत्तं नीलांकु(शुक)शशिप्रभ ॥

* * * *

साधु साधु महाप्राज्ञे यत् पृष्टोऽहं त्वयानघे ।
तत्तेऽहं संप्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥
श्रावणे मासि देवेशि सितपक्षस्य पञ्चमी ।
तत्र कार्यं व्रतमिदं सुवासिन्या महेश्वरि ॥
दन्तधावनपूर्वं तु मङ्गलं स्नानमाचरेत् ।

* * * *

रिपूणां वैभवं दृष्ट्वा मा भूदिति खगेश्वरः ।
इत्युक्तः पन्नगादस्तु गच्छन्तीं मेनकात्मजाम् ॥
सापि दृष्ट्वागतं तार्क्ष्यमुवाचेत्थं तु पार्वती ।
खगेश्वर मा विरोधं कुरुष्वाद्य व्रतेऽत्र वै ॥
यदिष्टं वद मे तार्क्ष्य करिष्यामि तव प्रियम् ।
एवमुक्तस्तु पार्वत्या गरुडः प्राह तां प्रति ॥

गरुडः—

मेन[क]ात्मजे महाभागे वदिष्यामि ममेप्सितम् ।
तां पञ्चमीं तु मन्नाम्ना प्रसिद्धां कुरु पार्वति ॥
इत्युक्ता गरुडेनाथ ददौ तस्मै वरं च सा ।
खगेश्वर महाभाग त्वन्नाम्ना सागता तिथिः ॥
श्रावणी पञ्चमी भूयादिति सापि तथाकरोत् ।

**End :**

ये च शृण्वन्ति सततं द्विजाः स्वच्छस्वभावतः ।
यथाकामं च सौभाग्यं प्राप्नयुर्नात्र संशयः ॥

**Colophon :**

इति श्रीस्कान्दपुराणे रुद्रपार्वतीसंवादे गरुडपञ्चमीव्रतकल्पः सम्पूर्णः ॥

(*o*) श्रवणोपवासव्रतकल्पः.

ŚRAVAṆŌPAVĀSAVRATAKALPAḤ.

Foll. 33*a*—35*b*.

This vow is intended to please God Viṣṇu. It should be commenced on the 12th day of the bright fortnight of the Bhādrapada month, when the moon is in the constellation Śravaṇa, by observing it as a fasting day and taking meals only on the next day, and thus it should be observed for one year thenceforward.

Complete; said to be found in the Bhaviṣyōttarapurāṇa.

**Beginning :**

युधिष्ठिर उवाच—

देवदेवारविन्दाक्ष पुराणपुरुषोत्तम ।
व्रतमेकं समाचक्ष्व त्वत्प्रीतिजनकं शुभम् ॥

सर्वसिद्धिप्रदं नृणां महापातकनाशनम् ।
सर्वसम्पत्करं चैव मोक्षदं च विशेषतः ॥

* * * *

पुरैवं विधिना पृष्टो मामुवाच जगत्पतिः ।
हयास्यो ब्रह्मणे तुभ्यं व्रतराजं वदाम्यहम् ॥

प्रोष्ठपद्यां सिते पक्षे द्वादश्यां श्रवणं यदि ।
तदारभ्य व्रतं कार्यं मानवैर्विष्णुतत्परैः ॥

संवत्सरव्रतमिदं विष्णुप्रीतिकरं नरः ।
कृत्वा चोद्यापनं कुर्याद्यथाविध्यनुसारतः ॥

**End :**

सदा कृत्वा व्रतं सम्यक् सर्वाभीष्टमवाप्य च ।
अन्ते जगाम च स्वर्गं देवदेवैश्च पूजितः ॥

**Colophon :**

इति श्रीभविष्योत्तरपुराणे श्रावण्युपवासोद्यापनकथा समाप्तः(प्ता) ॥

(*p*) यमुनापूजा.
YAMUNĀPŪJĀ.

Foll. 36*a*—39*b*.

Same work as that described under No. 8419 of the D.C.S. MSS., Vol. XVI, but without the Saṅkalpa and with a different reading in the end as given below.

Complete.

नमस्कारप्रदक्षिणम्—

अनन्तस्सर्वनागानामधिपस्सर्वकामदः ।
व्रतेनानेन सुप्रीतः परत्र च परां गतिम् ॥

इत्युद्यापनम् । अथ वायनदानम्—यस्य स्मृत्या चेति समर्पणम् ॥

---

(*q*) अनन्तव्रतकथा.
ANANTAVRATAKATHĀ.

Foll. 40*a*—47*a*. Fol. 47*b* is left blank. Fol. 48 contains a few sentences of Dōranāśaprāyaścitta.

Same work as that described under No. 8167 of the D.C.S. MSS., Vol. XVI.

Complete.

---

(*r*) अनन्तव्रतोद्यापनम्.
ANANTAVRATŌDYĀPANAM.

Foll. 49*a*—52*b*.

Same work as that described under No. 8193 of the D.C.S. MSS., Vol. XVI, but with difference in the beginning and the end which are given below.

Complete.

**Beginning :**

युधिष्ठिरः—

देवदेव नमस्तेऽस्तु व्रतस्य परमाद्भुतम् ।
उद्यापनविधिं (ब्रूहि) अनन्तस्य च केशव ॥

कृष्णः—

विना ह्युद्यापनविधिं न व्रतस्य फलं भवेत् ।
तस्माद्यथातथा कुर्यात् वित्तशाठ्यं न कारयेत् ॥

मासि भाद्रपदे प्राप्ते परिपूर्तौ व्रतस्थितः ।

**End:**

चतुर्दश्यामुपोष्यैवं (पौ)र्णमास्यां समापयेत् ।
आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं बुधः ॥

---

(s) विनायकपूजा.
VINĀYAKAPŪJĀ.

Foll. 53*a*—55*b*.

Same work as that described under No. 8691 of the D.C.S. MSS., Vol. XVI, but without the colophon.

Complete.

---

(*t*) नलोपाख्यानम्.
NALŌPĀKHYĀNAM.

Foll. 56*a*—61*a*.

Herein Lord Kṛṣṇa teaches to Yudhiṣṭhira who questions Him as to the best means of securing victory in the war against the Kauravas, the importance of duly conducting the worship of God Vināyaka on the 4th day of the bright fortnight of the lunar month Bhādrapada by narrating how King Nala got himself freed of all the evils that befell him by resorting to this kind of worship.

Incomplete.

**Beginning:**

निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज ।
अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसम्पदः ॥
पतिपत्न्योश्च कलहे बन्धुभेदे तथा नृणाम् ।
उदासीनेषु लोकेषु कथं सुमुखता भवेत् ॥
का(कां)देवतां नमस्कृत्य इष्टसिद्धिमवाप्नुयात् ।

सूतः—

सन्नद्धयोः पुरा विप्राः कुरुपाण्डवसेनयोः ॥
पृष्टवान् देवकीपुत्रः कुन्तीपुत्रं युधिष्ठिरम् ।
निर्विघ्नेन जयो मह्यं वद देवकिनन्दन ॥
कां देवतां नमस्कृत्य पूर्णराज्यं लभामहे ।

श्रीकृष्णः—

पूजयस्व गणाध्यक्षं गौरीजलसमुद्ध(ठरसम्भ)वम् ।
तस्मिन् संपूजिते वीर ध्रुवं राज्यमवाप्स्यसि ॥

युधिष्ठिरः—

विघ्नेशस्य व्रतस्यास्य किं दानं कस्य पूजनम् ।
कस्मिन् वै मासि कार्यं स्यात् तन्मे विस्तरतो वद ॥

श्रीकृष्णः—

मासि भाद्रपदे शुक्ले चतुर्थ्यां पूजितो नृप ।
प्रातश्शुक्लति(द्धज)ले स्नात्वा मध्याह्ने देवमर्चयेत् ॥
स्वशक्त्या गणनाथस्य सुवर्णरजताकृतिम् ।
अथ वा मृन्मयं कुर्याद्वित्तशाठ्यं न कारयेत् ॥
पाशाङ्कुशधरं देवं सर्वकामार्थसिद्धये ।
विंशत्येकं मोदकानां विघ्नेशाय निवेदयेत् ॥

**End:**

. . . . स्मिन्विघ्नेशस्य जपं नरः ।
. . . लोकेऽस्मिन्भवत्येव न संशयः ॥
. . . . . . . परिपूजय ।
नलोऽपि सत्वरं कृत्वा विघ्नेशस्य प्रपूजनम् ॥
सर्वानरी . . . . . . . ।

---

(*u*) स्यमन्तकोपाख्यानम्.

SYAMANTAKŌPĀKHYĀNAM.

Foll. 61*a*—63*a*. Foll. 63*b* is left blank.

The story of how Satrājit came to get back the precious gem Syamantaka, which conferred prosperity on the wearer, by the worship of Vināyaka duly conducted as stated above, is related herein.

Wants beginning.

**Beginning:**

अस्ति कश्चिन्मणिवरः . . . . ॥
तं कदाचित्तदा कृष्णः सत्राजितमयाचत ।
न दत्तवानसौ तस्मै सत्राजिद्राजसत्तमः ॥

* * * *

तत्र जाम्बवतः कुञ्जमासाद्य यदुनन्दनः ।
तत्र कुञ्जे ददर्शासौ ज्वलन्तं तेजसा मणिम् ॥
स ययौ मणिमादातुं जाम्बवानप्यवारयत् ।

**End:**

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
विघ्नेशस्य प्रसादेन तौ पुण्यफलभागिनौ ॥
यः पठेच्छृणुयाद्वापि नित्यमेतत्समाहितः ।
सर्वान् कामानवाप्नोति पुत्रपौत्रप्रवर्धनः ॥

* * * *

सिध्यन्ति सर्वकार्याणि विद्यावान्धनवान् भवेत् ।
स्यमन्ताख्यं महापुण्यं सर्वपापप्रणाशनम् ॥

**Colophon:**

इति स्यमन्तकोपाख्यानं सम्पूर्णम् ॥

---

(*v*) कृष्णाष्टमीव्रतकल्पः.

KṚṢṆĀṢṬAMĪVRATAKALPAḤ.

Foll. 64*a*—69*a*.

Similar to the work described under No. 8266 of the D.C.S. MSS., Vol. XVI.

Complete; said to be found in the Harivaṁśa.

**Beginning:**

युधिष्ठिरः—

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
कृष्णाष्टम्या व्रतं ब्रूहि देवव्रत नमोऽस्तु ते ॥

भीष्मः—

वक्ष्ये तदद्भुतं दिव्यं सावधानमनाः शृणु ।
अद्य स्थित्वा निराहारः श्वो भुङ्क्ते परमेश्वरः ॥
भोक्ष्यामि पुण्डरीकाक्षः स्वस्मिन् जन्माष्टमीव्रते ।

**End:**

न कुर्वन्ति जयन्त्यां हि कृष्णजन्माष्टमीव्रतम् ।
श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ॥

* * * *

तन्नास्ति पातकं लोके यश्च साधयते द्विजम् ।
जयन्ती हरिते पक्षे श्रावणे रोहिणीयुते ॥

मुनिवर यत्र विष्णुभक्तो नियतमनास्तु कथामनन्यभक्तः ।
मतिमपि च यत्र विधाय मूर्ध्ना नमति ग्रहो प्रयाति विष्णुधाम ॥ १

**Colophon:**

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे कृष्णाष्टमीव्रतकल्पः सम्पूर्णः ॥

---

(*w*) अगस्त्योपाख्यानम्.

AGASTYŌPĀKHYĀNAM.

Foll. 69*b*—74*a*.

Herein are found given the stories connected with the origin of the worship of Vināyaka on the 4th day of the bright fortnight of the Bhādrapada month. It is entitled Agastyōpākhyāna because the incidents that took place between Agastya and Vināyaka are related here.

Complete.

**Beginning:**

श्रीकृष्णः—

शृणु राजन् यथावृत्तं विघ्नेशस्य प्रभावजम् ।
अगस्त्यस्य च माहात्म्यं महर्षेर्भावितात्मनः ॥

पुरा कृतयुगस्यान्ते सोमकाख्यो महासुरः ।
वेदान् सर्वान् समाहृत्य समुद्रं प्रविवेश ह ॥
लोकास्सर्वे ऋषिगणा देवास्सेन्द्रपुरोगमाः ।
हाहाकृतो(कारो)महानासीत् सर्वकर्मबहिष्कृताः ॥
सर्वयज्ञविहीनाश्च अन्धकारो महानभूत् ॥

* * * *

एवमुक्त्वा तु सा देवी लोकानुग्रहकाम्यया ।
जगौ वेदान्त्समस्तांश्च विघ्नेशोपि(ऽप्य)लिखस्त(त्त)दा ॥
लिखितं च स्वदंष्ट्रेण वेदान् सर्वान् समापयत् ।
संप्रहृष्टमनास्सर्वे विघ्नेशं सर्वदेवताः ॥
पूजयन्तस्तथा तस्मै विघ्नेशाय वरं ददुः ।
मासि भाद्रपदे शुक्ले चतुर्थ्यां पूजितो भव ॥
ये तदास्मिन् दिनेऽर्चन्ति विघ्नेश त्वां समाहिताः ।
तेषामारोग्यसौभाग्यं पुत्रलाभादिसम्पदः ॥

* * * *

द्विविधं तं घटं दृष्ट्वा शप्तवान् रुद्रनन्दनम् ।
शृणु मे दुर्मते वाक्यं यथा कुम्भस्तु भञ्जितः ॥
तवोदरं तथैव स्यात् दुर्मतोऽसि यतस्स्वयम् ।

* * * *

इति शप्त्वा ययौ दुःखात् गङ्गास्नानं गतं मम ।
इति सञ्चिन्त्य मनसा सागरं दक्षिणं नृप ॥
शापमादाय विघ्नेशो मनसा शङ्कितोऽभवत् ।
मूषिकं क्षतमारुह्य शङ्कमानो दिवं ययौ ॥
स्खलिते मूषिके तत्र पपात धरणीतले ॥

तस्योदरं बभञ्जाथ पात्यमानस्य घाततः ।
हास्यं चकार तं दृष्ट्वा गणेशं रोहिणीपतिः ॥

**End:**

न पश्येत्तु विधुं कश्चित् सर्वदापि कथञ्चन ।
यदि पश्येत् कथामेतां शृणुयात् स्वस्थमानसः ॥

**Colophon:**

इति भविष्योत्तरपुराणे अगस्त्योपाख्यानं नाम विनायककथा संपूर्णा ॥

---

(*x*) हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Foll. 74*a*—76*b*.

On the birth and other leading incidents of Vināyaka, such as, how he got the elephant face and the big belly, etc.

Incomplete.

**Beginning:**

ऋषयः—

सूतं सर्वपुराणज्ञं नमस्कृत्य मुनीश्वराः ।
इत्यूचुरृषयस्सर्वे विघ्नेशस्य कथार्थिनः ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।
विनायकस्य चोत्पत्तिः कथं वै गजवक्रता ।
उदरस्फोटनं तस्य महोदर(ः) कथं भवेत् ।
एतेषां कारणं ब्रह्मन् वद विस्तरतो ह नः ॥

श्रीसूतः—

चन्द्रज्योतिपुरे राजा सर्वधर्मपरायणः ।
धर्मकान्त इति ख्यातः सर्वभूपनमस्कृतः ॥
आस्थानीं प्राप्य कान्ताद्यैः बुभुजे सर्वसेवकैः ।
रराज सिंहवत् पीठे द्वितीय इव देवपः ॥
तस्य भार्या स्वर्णकान्ता सर्वलक्षणसंयुता ।

* * * *

दिगन्तरे भ्राम्यमाणो गजराजस्स मूढधीः ।
उत्तरे तु शिरः कृत्वा शायिनं कृन्तवानभूत् ॥
तस्यैव शिर उत्कृत्य मत्पतेस्सुकरे ददुः ।
तच्छिरो गणनाथस्य कबन्धोपरि स व्यधात् ॥
प्रादाद्वरं तु तस्यैव सर्वत्र च सुपूजिता ।

**End:**

भवेयुस्सर्वदा तत्र तेषां ये वंशजास्सुताः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥
भार्यार्थी लभते भार्यां सुखार्थी च लभेत्सुखम् ।
इति दत्वा वरं तस्यै सान्त्वयेमां पुनः पुनः ॥

---

(*y*) **ऋषिपूजा.**

ṚṢIPŪJĀ.

Foll. 77*a*—80*a*.

On the conduct of worship of the seven sages, namely, **Atri**, Kaśyapa, **Bharadvāja**, Viśvāmitra, Gautama, Jamadagni, **Vasiṣṭha** as laid down in the Brahmāṇḍapurāṇa.

Complete.

**Beginning:**

ओं पूर्वोक्तऋष्यन्तर्गतवेदव्यासप्रीत्यर्थं

* * * *

ब्रह्माण्डपुराणोक्तविधिना ऋषिपूजां करिष्ये.

कश्यपस्सर्वलोकाढ्यस्सर्वभूतेषु संस्थितः ।
नराणां पापनाशाय ऋषिरूपेण तिष्ठति ॥

**End:**

कश्यपः प्रतिगृह्णातु कश्यपो वै ददाति च ।
कश्यपस्तारको भा(द्वा)भ्यां कश्यपाय नमो नमः ॥

यस्य स्मृत्या च—
ऋष्यन्तर्गतवेदव्यासः प्रियताम् ॥

(z) वरलक्ष्मीव्रतकल्पः.

VARALAKṢMĪVRATAKALPAḤ.

Foll. 80*a*—84*b*.

Similar to the work described under No. 8470 of the D.C.S. MSS., Vol. XVI.

Complete; said to form part of the Bhaviṣyōttarapurāṇa.

**Beginning:**

पद्मासने . . . भव सर्वदा ॥
दिव्याश्रमसुसंपन्ने नानारत्नोपशोभिते ।
विष्णुवक्षस्स्थले देवि पङ्कजाक्षि नमोऽस्तु ते ॥

**End:**

इदं सत्यमिदं सत्यं नरो भद्राणि पश्यति ।
नार्यः(री) चारुमती साध्वी संतुष्टा पतिना सह ॥
वरलक्ष्मीव्रतं पुण्यं तदादि भुवि विश्रुतम् ।
इदं व्रतं महापुण्यं कृत्वा सर्वक्रतो भवेत् ॥
सर्वतीर्(षु)यः स्नातः सर्वलोकैकपूजितः ।
इह लोके सुखप्राप्तिमन्ते विष्णुपदं भवे(व्रजे)त् ॥
सर्वदानेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ।
सिध्यन्ति सर्वकार्याणि वरलक्ष्मीप्रसादतः ॥

**Colophon:**

इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे वरलक्ष्मीव्रतकल्पं संपूर्णम् ॥

---

(*a*-1) ऋषिपञ्चमीव्रतम्.

ṚṢIPAÑCAMĪVRATAM.

Foll. 85*a*—93*b*. Fol. 85*b* is left blank.

Similar to the work described under No. 8230 of the D.C.S. MSS., Vol. XVI.

Complete; stated to occur in the Saṁhitā portion of the Yajurvēda.

**Beginning:**

ऋषयः—

सूत सूत महाप्राज्ञ ज्ञानभक्तिविवर्धन ।
नृणां कल्मषचित्तानां कलौ ज्ञानं कथं भवेत् ॥
एतन्मे ब्रूहि विस्तार्य स्त्रीणां चैव विशेषतः ।

सूतः—

शृणुध्वमृषयस्सर्वे सर्वेषां ज्ञानसम्पदाम् ।
ऋषिपञ्चमीति विख्यातं व्रतं पापप्रणाशनम् ॥
तस्यानुष्ठानमात्रेण ज्ञानं मोक्षमवाप्नुयात् ।

शौनकः—

विधिना केन कर्तव्यं किं द्रव्यं कस्य पूजनम् ।
कस्यां तिथौ महाप्राज्ञ केन लोके प्रकाशितम् ॥

सूतः—

मासि भाद्रपदे चैत्र(व)पञ्चम्यां शुक्लपक्षके ।
प्रातरुत्थाय विधिवद्धस्तादिषु मृदा क्रमात् ॥

**End:**

इत्युक्तास्ते द्विजास्सर्वे प्रणिपत्य यथाक्रमम् ।
सूतं संपूजयामासुः साधु साध्विति(त्य)वादिषुः ॥

**Colophon:**

इति श्रीयजुवे(र्वे)दसंहितायामृषिपञ्चमीमाहात्म्यं संपूर्णम् ॥

---

(*a*-2) ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Foll. 93*b*—98*b*.

Similar to the work described under No. 8241 of the D.C.S. MSS., Vol. XVI.

Complete; said to form part of the Bhaviṣyōttarapurāṇa.

**Beginning :**

युधिष्ठिरः —

श्रुतानि तानि देवेश व्रतानि सुबहूनि च ।
सांप्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥

श्रीकृष्णः—

अथातस्संप्रवक्ष्यामि पञ्चमीमृषिसंज्ञिकाम् ।
सम्यक् कृत्वा तु या नारी सर्वपापैः प्रमुच्यते ॥

* * *

उदङ्कः—

ऋषिपञ्चमीति विख्यातं महापातकनाशनम् ।
तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥
कल्याणानि विवर्धन्ते संपदश्च निरापदः ।
नभोमासे शुक्लपक्षे पञ्चमी ऋषिसंज्ञिका ॥
तस्यां व्रतमिदं कुर्युः ब्रह्मविट्छूद्रजातयः ।

**End :**

किं पुनस्तत्र तेनैव जन्मान्तरसहस्रके ।
महापापञ्चोपपापं भस्मसाद्भवति ध्रुवम् ॥

**Colophon :**

इति भविष्योत्तरपुराणे ऋषिकल्पं(ल्पः) संपूर्णः ॥

---

(*a*-3) अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Foll. 99*a*—107*b*.

Similar to the work described under No. 8195 of the D.C.S. MSS., Vol. XVI.

Complete.

**Beginning :**

सङ्कल्प्य ।

आग्नेयाभिमुखं देवं मुखतः कामरूपिणम् ।
इष्टकाम्यार्थसिद्ध्यर्थं पुत्रपौत्रप्रवर्धनम् ॥

* * * *

अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते । आवाहनम् ।
आगच्छ जगदाधार सर्वदेवसुपूजित ॥
इमां मया कृतां पूजां गृहाण पुरुषोत्तम ॥ आसनम् ॥

* * * *

द्वादशापूपदानेन यथोक्तफलदो भव ।
यस्य स्मृत्या चेति समर्पणम् । अनन्तरमष्टोत्तरशतप्रदक्षिणं कार्यम् ॥

See under No. 8195 of the D.C.S. MSS., Vol. XVI, for the remaining portion.

---

(*a*-4) तुलसीपूजा.
TULASĪPŪJĀ.

Foll. 108*a*—110*b*.

Slightly different from the work described under No. 8315 of the D.C.S. MSS., Vol. XVI.

Incomplete.

**Beginning :**

ध्यायेत्तु तुलसीं देवीं श्यामां कमललोचनाम् ।
प्रसन्नां पद्मकल्हारवराभयचतुर्भुजाम् ॥
किरीटहारकेयूरकुण्डलादिविभूषिताम् ।
धवलाङ्कुशसंयुक्तां पद्मासननिषेदुषीम् ॥ ध्यानम् ॥
देवि त्रैलोक्यजननि सर्वलोकैकपावनि ।
आगच्छ भगवत्यर्थे प्रसीद तुलसीप्रिये ॥ आवाहनम् ॥

**End :**

तुलसी श्रीसखी देवी देवपाला दिवस्सखी।
धारिणी धरणी धात्री सावित्री सत्यसङ्गरा ॥
कल्हारिणी च गौर्यङ्गा देवगीता यवीयसी।
पद्मिनी सस्मिता सीता रुक्मिणी रुक्मभूषणा ॥

---

(*a*-5) दशाफलव्रतोद्यापनम्.
DAŚĀPHALAVRATŌDYĀPANAM.

Fol. 111*b*. Fol. 111*a* is left blank.

Similar to the work described under No. 8317 of the D.C.S. MSS., Vol. XVI.

Complete ; said to form part of the Bhaviṣyōttarapurāṇa.

**Beginning :**

आदौ मध्ये तथा चान्ते कुर्यादुद्यापनं बुधः ।
दशमे दिवसे प्राप्ते सौवर्णैर्दशकैर्दलैः ॥
पूजनं देवदेवस्य पुरतश्चक्रपाणिनः ।
दिनान्ते चैव कर्तव्यं व्रतस्यास्यं समापनम् ॥
सौवर्णं रजतं वापि कृत्वा चान्दोलिकां शुभाम् ।
निष्कमात्रप्रमाणेन तधर्धार्धेन वा पुनः ॥

**End :**

दश दानानि कुर्वीत ब्राह्मणान् भोजयेत्ततः ।
एवं यः कुरुते पूजां सर्वसिद्धिमवाप्नुयात् ॥

**Colophon :**

इति भविष्योत्तरे दशाफलोद्यापनविधिः ॥

Fol. 112 is left blank

---

(*a*-6) स्वर्णगौरीव्रतम्.
SVARṆAGAURĪVRATAM.

Foll. 113*a*--117*a*.

Similar to the work described under No. 8598 of the D.C.S. MSS., Vol. XVI.

Complete; said to form part of the Bhaviṣyōttarapurāṇa.

**Beginning:**

ध्यायामि स्वर्णगौरीं तां हरस्यार्धाङ्गशोभिताम् ।
दिव्यसिंहासनासीनां नानारत्नैरलङ्कृताम् ॥ ध्यानम् ।
आवाहयामि गिरिजां सर्वैश्वर्यप्रदायिनीम् ।
पूर्णेन्दुवदनां नित्यमप्सरोगणसेविताम् ॥ आवाहनम् ॥

**End:**

इदं प्रियकरं नित्यं नार्यः श्रुत्वा व्रतं शुभम् ।
प्राप्य श्रियश्चेह भुक्त्वा अन्ते स्वर्गमवाप्नुयात्(युः) ॥

**Colophon:**

इति भविष्योत्तरपुराणे स्वर्णगौरीकथा संपूर्णा ॥

Fol. 117*b* contains a few stanzas of Uparāgaviṣaya.

---

(*a*-7) हरितालिगौरीव्रतम्.

HARITĀLIGAURĪVRATAM.

Foll. 118*a*—120*b*.

Similar to the work described under No. 8606 of the D.C.S. MSS., Vol. XVI.

Complete; said to form part of the Skāndapurāṇa.

**Beginning:**

यामामनन्ति मुनयः प्रकृतिं पुराणां
विद्यावतीं श्रुतिरहस्यविदो गृणन्ति ।
तामम्बिकां विनतभोगसमर्थजुष्टां
देवीमनन्यशरणां शरणं प्रपद्ये ॥ ध्यानम् ॥
अत्रागच्छ महादेवी(वि) देवेशी लोकवन्दिते ।
आवाहयामि त्वां भक्त्या सर्वेश्वरि नमोऽस्तु ते ॥ आवाहनम् ॥

**End:**

अन्नं भुक्त्वा तृतीयान्तु(न्ते) विधानच(नेन) सुवासिनी ।
त्रैलोक्यां संभवं पापं मो(मो)क्ता चैव न संशयः ॥
तस्माद्व्रतं प्रकुर्वीत व्रतानामुत्तमं व्रतम् ।
पुत्रपौत्रप्रवृद्धिं च धनधान्यमवाप्नुयात् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे उमामहेश्वरसंवादे हरितालगौरीव्रतं संपूर्णम् ॥

---

(*a*-8) कृष्णजयन्तीनिर्णयः (कथासहितः).

KṚṢṆAJAYANTĪNIRṆAYAḤ WITH KATHĀ.

Foll. 121*a*—123*b*.

Similar to the work described under No. 8265 of the D.C.S. MSS., Vol. XVI.

Incomplete.

**Beginning:**

रोहिण्यामर्धरात्रे तु यदा कालाष्टमी भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥
अस्यां जातो हरिस्साक्षान्निशीथे भगवानजः ।
तस्मात्तद्दिनमत्यन्तं पुण्यं पापहरं परम् ॥

इति जयन्तीनिर्णयः ।

स्कन्दः—

जयन्तीव्रतमाहात्म्यं कथयस्व पितामह ।
तत्कृत्वाहं गमिष्यामि तद्विष्णोः परमं पदम् ॥

**End:**

कृष्णजन्माष्टमीमन्त्रैः नीयते देवतागणैः ।
वेदैरपि पुराणैश्च मया दृष्टं महामुने ॥
यत्समानो(मं ना)धिकं वापि पुण्यं कृष्णाष्टमीव्रतम् (तात्) ।

(Incomplete)

**Colophon:**

इति स्कान्दे.

(*a*-9) होलिकापूजाविधानम्.

HŌLIKĀPŪJĀVIDHĀNAM.

Foll. 124*a*—126*b*.

Gives an account of the demoness named Hōlikā and deals with the conduct of worship to be performed to her from the fifth day of the bright fortnight to the full moon day in the Phālguna month with a view to avert the evils done by her to young children.

Complete.

**Beginning :**

किमर्थं फाल्गुनस्यान्ते पौर्णमास्यां जनार्दन ।
उत्सवो जायते लोके ग्रामे ग्रामे पुरे पुरे ॥

होलिका दीप्यते कस्मात् फाल्गुन्यां तु किमुत्सवम् ।
का देवी पूज्यते कृष्ण एतद्विस्तरतो वद ॥

श्रीकृष्णः—

आसीत् कृतयुगे पार्थ रघुनामा नराधिपः ।
शूरस्सर्वगुणोपेतः प्रियवादी बहुश्रुतः ॥

* * * *

एवं लक्ष्म्या वरं सा तु राक्षसी कामरूपिणी ।
नित्य पीडयते बालान् संस्मृत्य हरभाषितम् ॥
एतत्ते सर्वमाख्यातं होलायाश्चरितं मया ।
साम्प्रतं कथयिष्यामि येनोपायेन हन्यते ॥
अद्य पञ्चदशी शुद्धा पाल्गुनस्य नराधिप ।
शीतकालो विनिष्क्रान्तः प्रातर्ग्रीष्मो भविष्यति ॥
अभयन्त्वथ लोकानां दीयतां पु(रु)षर्षभ ।
तस्या विधानमत्युग्रं कार्यमुल्बणनाशनम् ॥
फाल्गुने मासि संप्राप्ते शुक्लपक्षे सुखास्पदे ।
पञ्चमीप्रमुखास्तत्र तिथयोऽनन्तपुण्यदाः ॥

**End:**

एवं कृते विधानेन होलायास्तु प्रयत्नतः ॥
प्रसन्ना जायते सा तु त्रैलोक्यसुखदा भवेत् ।
तुष्टिदाः पुष्टिदा लोकाः विधाने विहिते सति ॥

**Colophon:**

इति श्रीभविष्योत्तरपुराणे होलिकाविधानं संपूर्णम् ॥

Fol. 127 contains a few verses describing the merits and efficacy of Dīpadāna.

---

(*a*-10) **गोपद्मव्रतकल्पः.**

GŌPADMAVRATAKALPAḤ.

Foll. 128*a*—129*b*.

Same work as that described under Nos. 8291 and 8293 for the beginning and end respectively, but with a different colophon as given below.

Complete.

**Colophon:**

इति भविष्योत्तरपुराणे गोपद्मव्रतकल्पं संपूर्णम् ॥

Foll. 130 and 131 contain a few lines of Rājasūyayāgaghaṭṭa.

---

(*a*-11) **दशाफलव्रतम्.**

DAŚĀPHALAVRATAM.

Foll. 132*a*—137*a*.

Same work as that described under No. 8321 of the D.C.S. MSS., Vol. XVI, but with a different end which is given below.

Complete; said to form part of the Bhaviṣyōttarapurāṇa.

**End:**

वदतां शृण्वतां चैव विष्णुलोको भवेद्ध्रुवम् ॥
कुरुते यस्त्विदं पुण्यं संसारार्णवतारकम् ।
पुत्रपौत्रादिकं प्राप्य संसारान्मुच्यते हि सः ॥

नमः कृष्णाय देवाय देवकीनन्दनाय च ।
गृहाणार्घ्यं मया दत्तं बालकृष्ण नमोऽस्तु ते ॥ इदमर्घ्यम् ॥

**Colophon:**

इति भविष्योत्तरपुराणे दशाफलव्रतकल्पं संपूर्णम् ॥

---

(*a*-12) विष्णुपूजाविधिः.

VIṢṆUPŪJĀVIDHIḤ.

Foll. 137*b*—139*b*.

Similar to the work described under No. 8694 of the D.C.S. MSS., Vol. XVI.

Complete.

**Beginning:**

चक्रपाणिं शिवं विष्णुं नारायणमजं हरिम् ।
श्रीधरं बलभद्रं च कृष्णं दामोदरं न्यसेत् ॥ ध्यानम् ॥
श्रीविष्णुं वल्लभं लक्ष्म्या अभेद्यं दुष्टहारिणम् ।
उग्रतेजसमं व्यग्रं सर्वशत्रुनिवारणम् ॥ आवाहनम् ॥

**End:**

दाता च विष्णुर्भगवान् ग्रहीता च हरिस्स्वयम् ।
उभयोत्तारणार्थाय नारायण नमोऽस्तु ते ॥
उपायनं प्रदास्यामि प्रीयतां मे जनार्दन ।
श्रीकृष्णः प्रतिगृह्णातु परिवायनमुत्तमम् ॥
यस्य स्मृत्या च (. .) चक्रपाणिः प्रीयताम् ।

---

(*a*-13) श्रवणमासोपवासविधिः.

ŚRAVAṆAMĀSŌPAVĀSAVIDHIḤ.

Foll. 140*a*—142*b*.

Same work as that described under R. No. 1435(*o*) *ante*.

Complete.

## R. No. 1436.

Palm-leaf. 14¼ × 1 inches. Foll. 70. Lines, 6 in a page. Grantha. Good.

Purchased in 1914-15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

### कनकदासकीर्तनानि.
### KANAKADĀSAKĪRTANĀNI.

Foll. 1*a*—4*a* contain an index to the work. Fol 4*b* is left blank.

Devotional songs in Kanarese in praise of God Viṣṇu: by Kanakadāsa.

Incomplete. Contains 175 stanzas.

**Beginning:**

ಪಂತುವರಾಳಿ.

ಎಂದಿಗೆ ಧನ್ಯನು ನಾನು ಎಂದಿಗೆ ಪುಣ್ಯಜೀವಿ ಎಂದಿಗೆ ನಿಮ್ಮ ಚಿತ್ತಕ್ಕೆ ಬಾಗು ತಚ್ಬುತನೆ ॥ ಎ ॥

ಕಲವೂರಗಿಡಬಲಿಕೂಲದೆಲ್ಲಿಪ್ಪತ್ತುಲಕ್ಷ ಜಲದೊಳಗೊಂಬತ್ತು ಲಕ್ಷ ಜೀವಿಸಿ ಸುಲಿವೇಗೆ ಏಕಾದಶ ಲಕ್ಷ ಕ್ರಿಮಿಗಾಗಿ ತೊಳಕಿದೆ ಅಂಡಜ ದಶ ಲಕ್ಷೆಉ ॥

**End:**

ಅಕಲಂಕಶ್ರೀಹರಿಯ ಭಕ್ತಿಗೆ ಮನದೊಳಗು ರುಕ್ಮಿಣೀ ಕರಸಾನನವು ಜಿಹ್ವೆಗೂಜಿಗೀತೊ ॥

ಇಂದೆಂದು ಯಾಬಗೆ ಸಕಲ ಸಂಪತ್ತಾಯಿತು । ಮುಂದೆನ್ನ ಜನ್ಮ ಸಾಫಲವಾಯಿತು ॥

ತಂದೇ ಶ್ರೀಕಾಗಿನೆಲೆ ಆದಿಕೇಶವರಾಯ ॥

ಬಂದೆನ್ನ ಹೃದಯದಲ್ಲಿ ನೀಲೆಯಾಗಿನಂತೆಂದೆ ॥

---

## R. No. 1437.

Śrītāla. 7⅝ × 1⅜ inches. Foll. 59. Lines, 8 in a page. Grantha. Good.

Purchased in 1914-15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) कीर्तनानि.

KĪRTANĀNI.

Foll. 1*a*—21*b*.

Songs in priase of Rāma, Kṛṣṇa, etc., said to have been composed by one Śēṣayyaṅgār. The names of Rāgas and Tālas pertaining to each song are also added.

**Beginning :**

मोहनम्—चापु—ध्रुवतालम्.

आञ्जनेय परिपालय मां अगचरवरिधुरीण
संजनितासुरभयतोषितसन्मुनिजनगीर्वाण ॥ आ ॥
चामीकरधरणीधरभासमानशुभकरगात्र
तामरसहिताधीतकलास्तोम समीरणपुत्र ॥ आ ॥

**End :**

अनुपमानित्यसत्यभाषण परिपालितविनुतविभीषण
घनवननिधिमदशोषण मोहनरङ्ग
निजभजनपोषण हरे
इनकुलोद्भव विनुतवैभव जनितकोसलविनुतशरबल ॥ राम ॥

Foll. 22*a*—28*b* are blank.

---

(*b*) भजनकीर्तनानि.

BHAJANAKĪRTANĀNI.

Foll. 29*a*—36*b*.

By Nāmadēva. Similar to the above ; this work is in Marathi language.

**Beginning :**

सद्गुरुचे पाये जन्मुनिरजोडावसे मण्डितोडाव कामक्रोध
डोलायाचे डोलउघडिलेजण आगन्दचेलेनलेववित
जन्ममरणास्चापडील स्चांकडकैवल्य ची पुडदारवविल
नामाह्मणे अत्ताखेस्चरमावुलि प्राणाचि सावुलीकेलीमस्ज ॥

कृष्ण राम हरी मुकुन्द मुकुन्द मुरारी अच्युतनरहरी नारायण ॥

**End :**

जयदेव जयदेव जयसद्गुराय आरति ओ वालु तुमचि अपाया ।
कल्पनाचि वाधा नवकोटिशालि हे सन्तमण्डली सुनको विसहुं खिअसो ।

Foll. 37-38 are left blank. Foll. 39—41 contain some songs taken from Rāmadāsakīrtanas. Foll. 42—59 are left blank.

---

## R. No. 1438.

Palm-leaf. 13¾ × 1 inches. Foll. 89. Lines, 6 in a page. Grantha and Tamil. Good.

Purchased in 1914-15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) दत्तात्रेयस्तोत्रम्.

DATTĀTRĒYASTŌTRAM.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

A eulogy in Marathi language on Dattātrēya who is considered to be an incarnation of Viṣṇu.

Complete.

**Beginning :**

श्रीमद्दत्ता सद्गुरुरास्जराया वन्दूभावें हा भवाध्धीतराया ।
श्रोता वक्ता चिद्घनाद्वैतझाला साङ्कैसा जन्मजाला अजाला ॥
भारफारधरणि उतराया सिद्धपन्धि जडजीवितराया ।
अत्रिगोत्रपरिशुद्ध अजाती दत्तदेव स्मरणे श्रमस्जाती ॥

**End :**

श्रीमद्दत्तदिगम्बरा सुरुचिरा सर्वेश्वरा सुन्दरा
भक्ताभीष्टकरा वरा भयहरा ब्रह्माण्डभाण्डोदरा ।

सारासारविचारणातितपरा देवादये चातुरा
शोभे उद्धवपादपद्मतुलसीनिर्माल्यते चातुरा ॥

---

(b) सुधा(दा)मचरित्रम्.
SUDĀMACARITRAM.

Foll. 5a—8a.

Apparently gives the story of Sudāman or Kucēla in the Marathi language who, according to the Bhāgavata, was a poor Brahmin friend of Kṛṣṇa and presented him with a handful of parched rice. By the grace of Kṛṣṇa, Sudāman rose to fame and fortune immediately. By Tukārāmasvāmi.

Complete.

**Beginning :**

ओवि ।

आइकाहो तुम्ही मावीक हेजन भक्तनारायण सांभालितो ।
सुधा(दा)मा ब्राह्मणसंसारीं कष्टला स्मरुतो लागला कृष्णजीसी ॥
तयेवेलीकान्तापुसेसुधाम्यासि स्मरता केण्हासि वेलो वेला ॥

**End :**

अपार आनन्ताकि तीवानुतूरुज वाटतसेलारुज दिनालागी ।
तुकामणे कृष्णकृपेस्चासागरा रघुमादेवी वरापाण्डुरङ्गा ॥

**Colophon :**

सुधा(दा)मचरित्रं संपूर्णम् ॥

---

(c) प्रह्लादचरित्रम्.
PRAHLĀDACARITRAM.

Foll. 8a—11b.

This is in Marathi language and relates the Puranic story of Prahlāda who is said to have been subjected to severe persecution by his father Hiraṇyakaśipu on account of his strong devotion to

Viṣṇu who in the end took the man-lion incarnation and tore to pieces his father for his misdeeds. By Tukārāmasvāmi.

Complete.

**Beginning :**

ओवी ।

वोलावुनीपुसे पिता प्रह्लादासी कायाशिकलासी कसाङ्गबापा ।
घेरुह्मणे हरिनाम वसेचित्ती बहुताचि प्रीतिजीःकि असे ॥
मरोझडोपडो तुटोहेशरीरवाचे निरन्तर
हेचिघो कि राग आला दुष्टा आज्ञा केले दूता
धरा वाण्डाला तामारायासी ॥

**End :**

सर्वहे शरीरवेचीन कीर्तिनि गाधीन निशिदिनि नामतुझे ।
तुकाह्मणे दूरीनकरी कल्लान्ती सर्वदा विश्रान्ती सन्तापासी ॥

There are three Telugu Padyas after the above stanza.

---

(*d*) சமயோசிதசெய்யுட்கள்.
SAMAYŌCITAŚEYYUṬKAḶ.

Foll. 12*a*—20*a*. Fol. 20*b* is left blank.

See the Tamil part of the Triennial Catalogue.

Foll. 21*a* to 22*a* containing five stanzas taken from the Rāmatārakaśatakas are in Telugu language. Foll. 22*b* is left blank. Fol. 23—24 contain a few verses in Kanarese. Foll. 25—26 contain a few stanzas relating to Dhanurmāsapūjā. Fol. 26*b* is left blank.

---

(*e*) बृहस्पतिनाडी.
BṚHASPATINĀḌĪ.

Foll. 27*a*—37*a*. Fol. 37*b* is left blank.

A treatise in astrology giving the characteristics, fortunes, etc., of persons born in the various Lagnas and their sub-divisions

Contains two Aṁśas (Dhruva and Kinnara) in the Vṛścikalagna.

**Beginning :**

ध्रुवांशसंभवे गौरस्समगात्रश्च बुद्धिमान् ।
विप्रकाले निशानाथे ब्रह्मवंशसमुद्भवः ॥
शिवभक्तकुलीनोऽपि हरिशङ्करभक्तिमान् ।
सोदरभ्रातृसंयुक्तः नदीतीरे जनिर्भवेत् ॥

**End :**

बुधदाये स्वीयभुक्तौ शुक्रभुक्तौ तु वा यदि ॥
मेषान्त्ये गोचरे मन्दे आपत्सन्न्यासको मृतिः ।
देहान्ते सद्गतिश्चेति पश्चादुत्तमजन्मवान् ॥
अंशनाडीषु विस्तारं दशामार्गेण योजयेत् ।
किन्नरांशफलं सत्यं प्रत्यक्षं वाक्पतेर्मतम् ॥

---

(*f*) हरिनामकीर्तन.

HARINĀMAKĪRTANA.

Foll. 38*a*—48*a*. Fol. 48*b* is left blank.

A eulogy in Marathi language on God Viṣṇu and his various incarnations : by Tukārām.

Complete.

**Beginning :**

जय नारायण ब्रह्मपरायण श्रीपतिकमलाकान्तम् ।
नाम अनन्तकहालकबरणो शेषनपावे अन्तम् ॥
नारदसारदशिवसनकादिकब्रह्माध्यानधरन्तम् ॥ जय ॥
मच्छकच्छपसूकरनरहरिभजनीवामनरूपधरन्तम् ।
परशुरामस्वयिरामचन्द्रभैये लीलाकोटिकरन्तम् ॥ जय ॥

**End :**

लागतसवायायेतो लोटांगाणिमाततरिकोणिसांगत्याचि ।
सर्वस्वहाजीवठे विलाचरणि पाण्डुरङ्गा कोणिदावा मझा ॥
तुकाह्मणे गायिवाचे ताडातोडि तैशि एकधडिजातिमाय ॥

(g) நடராஜர்துதி.

NAṬARĀJARTUDI.

Foll. 49*a*—59*a*. Fol. 59*b* is left blank.

See the Tamil part of the Triennial Catalogue.

---

(h) பராபரக்கண்ணி.

PARĀPARAKKAṆṆI.

Foll. 60*a*—62*a* Fol. 62*b* is left blank.

See the Tamil part of the Triennial Catalogue.

---

(i) எந்நாட்கண்ணிமுதலியன.

ENNĀṬKAṆṆIMUDALIYANA.

Foll. 63*a*—71*b*. Fol. 64*b* is left blank.

See the Tamil part of the Triennial Catalogue.

Foll. 74*a*—89*a* contain some devotional songs in Marathi language. Fol. 89*b* is left blank.

---

## R. No. **1439.**

Palm-leaf. 14⅜ × 1 inches. Foll. 54. Lines, 7 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

The first two foll. contain a few Kīrtanas of Purandaraviṭṭala. Fol. 3*a* contains a Gurustōtra. Fol. 3*b* is left blank.

(a) पुरन्दरदासकीर्तनम्.

PURANDARADĀSAKĪRTANAM.

Foll. 4*a*—19*a*. Fol. 19*b* is left blank.

Devotional songs composed in Kanarese by Purandaradās on God Viṣṇu

Incomplete.

**Beginning:**

ವರಗುರು ವುಪದೇಶ ನಿರವಾಯೆನವುನಸೋ ವೃನ್ನೆನಿನ್ನೇನು ಯಾಗ
ಹರಿಧಾಸರ ಸಂಗ ನಮಗೆ ದೊರಗಿತು ನಿನ್ನೇನು ||

ಮಾಯದ ಸಂಸಾರಮಮಕರ ಹೀಗಿತ್ತು ನಿನ್ನಿನ್ನೇನು ಇಗತೋ ಯಾ ದಕ್ಷಿಣ ನಾಮಜಿಹ್ವೇಲಿ ದೊರಗಿತು ನಿನ್ನೇ ನಿನ್ನೇನು ॥ ಮರಗುರು ॥

**End:**

ಕಾಮಿದ ಫಲಯಿವನಾ ಭಕ್ತರ ಪ್ರೇಮದ ಸಲಹುವನಾ ॥

ರಾಮನಾಮಸ್ಮರಣಾನನಾ ರತಿಪತಿಕಾಮನ ಸಂಹರಣಾ ॥ ಕಂಡೆ ॥

ದ್ವಾರಕಾ ದಕ್ಷಿಣ ಕಾಶೀಯೆಂದೆನು ಕೃಪ ಸಂಪಾತೀರವಾಸಿ । ತಾರಕ ಉಪದೇಶಿ । ತಾರಕ ಉಪದೇಶಿ ॥

ಪುರಂದರವಿಠಲನ ಭಕ್ತರು ಪೋಷಿ ॥ ತಂಡಿ ತರುಣ ನಿಧಿಯು ॥

---

(*b*) **रामपूजा.**

RĀMAPŪJĀ.

Foll. 20*a*—21*b*.

On details connected with the ceremonial worship of Rāma.

Complete.

**Beginning:**

परमेश्वरप्रीत्यर्थं रामचन्द्रपूजां करिष्ये । कलशं गन्धपुष्पाक्षतैरभ्यर्च्य.

कलशस्य मुखे विष्णुः कण्ठे रुद्रस्समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणास्स्मृताः ॥
कुक्षौ तु सागरास्सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदाऽथ यजुर्वेदस्सामवेदोऽप्यथर्वणः ॥

**End:**

नीराजनम्—

सोमो वा एतस्य राज्यमादत्ते यो राजा संराज्यो वा सोमेन यजते देवसुवामेतानि हवींषि भवन्ति । एतावन्तो वै देवानां सुवः स एनं पुनस्सुवन्ते राज्याय देवसो राजा भवति । साम्राज्यं पूज्यं स्वाराज्यं वैराज्यं परमेष्ठिराज्यं महाराज्यमाधिपत्यम्.

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मां मत्वा क्षमस्व करुणाकर ॥

(c) कनकदासकीर्तनानि.

KANAKADĀSAKĪRTANĀNI.

Foll. 22*a*—27*b*.

Devotional songs in Kanarese on God Viṣṇu : by Kanakadāsa. Incomplete.

**Beginning :**

ನಾನು ನೀನುಯೆನ್ನಾದೇರೆ ಹೀನವಮಾನವೇ ||
ನಿನ್ನಧ್ಯಾನಧ್ಯಾನದಲ್ಲಿ ನೀನು ತಿಳಿದುನೊಡೆಲೊ ||
ಹಳೆಉ ಜನ್ಮಉ ಬಿಟ್ಟ ಸಂದವನು ನೀನಲೋ ಮಲಮೂತ್ರ ಗರ್ಭದಲ್ಲಿ
ನಿಂತವನು ನೀನಲೊ - - - - -
ಜಲದ ದಾರಿಯಲ್ಲಿ ಬಂದವನು ನೀನಲೊ ||
ನಿನಗೆ ಕುಲಗೊತ್ರಂಗಳುಂಟವನು ನೀನಲೊ || ನಾನು ||

**End :**

ಇಂದೆನ್ನ ಜನ್ಮ ಸಕಲಸಂಪದವಾಯಿತು | ಮುಂದೆನ್ನ ಜನ್ಮ ಸಾಫಲ್ಯವಾಯಿತು || ತಂದೇ ಶ್ರಿಕಾಗಿಮ್ಲೇಲೆ | ಆದಿ ಕೇಶವರಾಯ | ಬಂದೆನ್ನ ಹೃದಯದಲ್ಲಿ ನಿಲಯಾಗಿನಿಂಡ || ಬದಿದೇನು ||

Fol. 28*a* contains one Sīsapadya, Telugu, in praise of Narasiṁha. Fol. 28*b* is left blank.

---

(d) वादिराजकीर्तनम्.

VĀDIRĀJAKĪRTANAM.

Foll. 29*a*—31*a*. Fol. 31*b* is left blank.

Devotional songs in Kanarese in praise of Viṣṇu worshipped as Hayavadana also called by the well-known name Hayagrīva : by Vādirāja.

Incomplete.

**Beginning :**

ಧಾವ ರೀತಿಯಲ್ಲಿಯನ್ನ ನೀ ಪಾಲಿಶೋ | ಶ್ರೀ ವಿಭೊ ಹಯವದನಾ ||
ಧೀ ವಿವಿಧಃಭವ ಯಿಷ್ಟು ಭಾವಿನೇ ನೊಂದೆ ತಾಮರದಳನಯನಾ ||
ಧಾವ ರೀತಿ ||

ಅಂಗನೇದಲ್ಲಿ ಅಧಿಕಮೋಹದಿಂದ ಶೃಂಗಾರಗಳನೇ ಮಾ. । ಮಂಗಳಾಂಗ ನಿನ್ನ ಮಹಿಮೆಯು ಬೊಗಳದೆ । ಯಮಭಂಗಕುಳಗೊದನೊ ॥ ಹಯವದನ ॥ ಧಾವ ರೀತಿ ॥

**End:**

ಕುಂತಿಯ ಗರ್ಭದಲಿ ಉದ್ಭವಸಿದೋ ನೀನು । ಸಂತವನಾಡಿ । ಯಾದ ವರಗಳಿದು । ತಾರಲಿ ಮುನಿವೇಷದಲಿ ನೀನು ಅದ್ವೈತೆಂಬೊ ಆರಣ್ಯವನಗಳಿದು । ಮಧ್ವಮತಗಳರೆಲ್ಲ ಉದ್ಧಾರಮಾಡಿದೋ । ಮುದ್ದು ಹಯವದನ ನಿನ್ನ ದಾಸನೆಹದು ॥ ಹದು ಹನುಮಂತ ॥

---

(*e*) रामदासकीर्तनानि.

RĀMADĀSAKĪRTANĀNI.

Foll. 32*a*—44*b*.

See the Telugu part of the Triennial Catalogue.

Fol. 45 contains some witty stanzas, fol. 46 a few Marathi stanzas and fol. 46*b* is left blank.

---

(*f*) सन्तनामावलिः.

SANTANĀMĀVALIḤ.

Foll. 47*a*—49*a*. Fol. 49*b* is left blank.

An enumeration of the pious devotees of God Viṣṇu: by the son of Jayarāma. This is in Marathi language.

Complete.

**Beginning:**

तारकमार्गदावितिलोकाबोधहरति भेदयशङ्काजे, संसारसागरिनौका, त्याचि नाम पावन ऐका ब्रह्माशम्भुकुबेरप्रभञ्जन इन्द्रचन्द्रयमभास्कर-पावकवाक्पतिवरुणवसिष्ठपराशरवाल्मीकिव्यासमहाकाविगौतमाविश्वामित्र अगस्त्यभार्गव बृषभदेव.

* * * *

मुद्गललीलाशुक अवधूत दिगम्बर सोपन्तरमावलभ लोलम्ब सन्तोष-निम्बयागङ्गाधर कोनेरिमुरारि शान्तालिङ्ग श्रीकृष्णगोगिया कृष्णदास जय-राम तुकोवा रामदास आनन्दमूर्ति.

**End:**

अनन्तमहान्त असे बहुसन्त जगतिर्कतिगुप्त प्रकटजडमूकपिशेचाहे बालोन्मत्तविदेहनिरङ्कुशवर्णियले हरिभक्तिचतुर्विधमुक्तज्वाल भगवत्परज्याते विज्याते ह्मणुचिन्मय मगपावनहे सुकृतीविकृति विणगात असे जयराम सुताचे वाणी.

Foll. 50—52*a* contain some Lāli songs. Fol. 52*b* is left blank. Foll. 53—54 contain also some stray songs.

---

## R. No. 1440.

Palm-leaf. 16×1 inches. Foll. 75. Lines, 5 in a page. Grantha. Good.

Purchased in 1914-15 from M R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) दीक्षितकृतयः.

DĪKṢITAKṚTAYAḤ.

Foll. 1*a*—6*b*.

Devotional songs on Rāma, Kṛṣṇa, Raṅganātha, the goddess Lakṣmī, etc. The names of the Rāgas are also indicated in the case of certain songs.

**Beginning:**

सावेरी ।

कलये तावकीनचरणकिसलये पाहि रङ्गनिलये
लोचनपरिहसितकुवलये त्वदेकशरणोऽहम् ॥ कलये ॥
कमले करयुगलविराजितकमले सुरदन्तिकसमर्पितकमले
निस्तुलधूपादिपरिमले त्वदेकशरणोऽहम्.

**End:**

शारदाम्बुजदलनेत्रन सनकादिमुनिनुतपात्रन ।
सूर्यनन्दन रिपुसूदन सुगुणवारिधीन रणपोतन ॥
पञ्चशरारिनुतनामन संश्रितदुरितविरामन ।
काञ्चनांशकवनमालन वरद काञ्चिनिलयाश्रितपालन दधिचोरना ॥

(*b*) रामदासकीर्तनम्.

RĀMADĀSAKĪRTANAM.

Foll. 6*b*—15*b*.

See the Telugu part of the Triennial Catalogue.

Fol. 16 contains Rāmacūrṇikā and fol. 17 contains some Bhāgavataślōkas.

---

(*c*) पुरन्दरदासकीर्तनानि.

PURANDARADĀSAKĪRTANĀNI.

Foll. 18*a*—21*b*.

Similar to the work described under R.No. 1439(*a*) *ante*. This is in Kanarese language.

Incomplete.

**Beginning:**

ಇದು ಯೇನಂಗ ಮದನಜನಕ ತೋರಮಿಯೆನರಸಿಂಗ । ಮುದ್ದು ರಂಗ । ಮೋಹನಾಂಗ । ದೇವತುಂಗ । ಪಾಂಡು ರಂಗ ॥

ಸುರರುಸ್ತುತಿಸಿ ಕಾರ್ಯಲು ತೊಟ್ಟೇಮಿಸುಕೆ ತಿರಿಯಾ ಯಾತಕೆ । ಬಾ ಯಾಕ್ಷೇರ ನಾಹೇಳೆನಗೆ ॥

**End:**

ಸ್ನಾನಉ ಯಾತಕೆ । ಸಂಧ್ಯಾಜಪತಪವ್ಯಾತಕೆ । ಮೌನವ್ಯಾತಕೆ । ಮಾಘಸ್ನಾನವ್ಯಾತಕೆ । ಅಂಗದಂಡಗಲ್ಯಾಗೆ । ಆತ್ಮದಾಘಾತಉ ತಿಂಗಲ್ ಚಾಂದ್ರಾಯಣವ್ರತವ್ಯಾತಕೆ । ಮಂಗಳಮೂರ್ತಿಯೇ । ಪುರಂಧರ ವಿಠಲನ ಹಿಂಗಾದೆ ಉಚ್ಚರಿಸುವ ಮನುಜರಿಗೆ ॥

Fol. 22 contains a few Phalaśruti stanzas of the previous Kīrtana and fol. 23 contains some miscellaneous stanzas.

---

(*d*) जलक्रीडा.

JALAKRĪḌĀ.

Foll. 24*a*—30*b*.

Describes the sporting of Lord Kṛṣṇa with the Gōpīs in the river Yamunā.

Incomplete.

**Beginning:**

गोपी गोपाललाल रावुमन्दिरमा ।
तेते ता सुगन्दनर्ततिकरि भार्यी ॥ गोपी ॥
धृम धृम धृम धृम मृदङ्ग चिरनननननरूपरङ्गधिगिता ।
धिगतातलुङ्ग उगटतरसनायी ॥ गोपी ॥

**End:**

कण्ठपरकोकिलादशनुपरदामिनी अधरपरसरहितंवारो ।
कहतखविरङ्गजब अंगच्छबकेसरीराधवदनपरचन्द्र बारो ॥

**F**ol. 31 contains a few stanzas relating to Bhagavannāman.

---

(*e*) मुमूर्षुविषयः.

MUMŪRṢUVIṢAYAḤ.

Foll. 31*b*—33*a*.

On the conduct prescribed for a person when he is in imminent danger of death.

Incomplete.

**Beginning:**

वैद्यनाथदीक्षितीये श्राद्धकाण्डे मुमूर्षुविषयम् ।

मानसिकस्नानानि कृत्वा तत ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा उभयमपि वा यथास्वाचारं बिभृयात् ।

यथाह मरीचिः—

सर्पं दृष्ट्वा यथा लोके दर्दुरा भयविह्वलाः ।
ऊर्ध्वपुण्ड्राङ्कितं तद्वत् कम्पन्ते यमकिङ्कराः ॥

* * * *

शरीरस्यात्यये प्राप्ते वदन्ति नियमन्तु ये ।
महत्कार्योपरोधेन न स्वस्थस्य कदाचन ॥ इति ॥

शरीरस्यात्यये मुमूर्षोः भूम्यां शयनं तस्मिन् प्राप्ते सति तेन कर्तुमशक्यं प्राजापत्यादिनियमं कर्तव्यत्वेन ये वदन्ति तेषु तत्पापं गच्छति.

**End:**

अन्त्यकाले हरिहरनामकीर्तनादिफलं स्मर्यते—

यथाकथञ्चिद्गोविन्दे कीर्तिते वा श्रुतेऽपि वा ।
पापिनोऽपि विशुद्धास्स्युः शुद्धा मोक्षमवाप्नुयुः ॥

* * * *

वैकुण्ठस्यैकसोपानं हरेर्नाम विधेस्सुत ।
तस्मात्सर्वं परित्यज्य नामनिष्ठो भवानघ ॥

---

(*f*) जगन्मोहनकृष्णमन्त्रः.

JAGANMŌHANAKṚṢṆAMANTRAḤ.

Fol. 33*a*.

Similar to the work described under No. 6303 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning:**

ओं संमोहनकृष्णमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, परमात्मा श्रीसंमोहनकृष्णो देवता; संमोहनश्रीकृष्णप्रसादसिद्ध्यर्थे जपे विनियोगः.

**End:**

ध्यानम्—

ध्यायेद्धरिन्मणिनिभं जगदेकवन्द्यं सौन्दर्यसारहरिशङ्खवराभयानि ।
दोर्भ्यां दधानमनिशं सरसं च भैष्मीसत्यासमेतमखिलप्रदमिन्दिरेशम् ॥
ओं श्रीं क्लीं संमोहनकृष्णाय नमः ॥

Fol. 33*b*—34*b* contain a few stanzas of Pāpaparihāra taken from the Pañcanadīśvaramāhātmya. Foll. 34*b*—36*a* contain Sītākalyāṇagadya. Foll. 36*b*—37*b* contain a few pithy stanzas.

---

(*g*) सोपानपञ्चकम्.

SŌPĀNAPAÑCAKAM.

Foll. 37*b*—38*b*.

Same work as that described under No. 9543 of the D.C.S. MSS., Vol. XVIII.

Complete.

---

(*h*) शिवरामनामकीर्तनम्.

ŚIVARĀMANĀMAKĪRTANAM.

Foll. 38*b*—39*b*.

On the religious efficacy of repeating the names of Rāma and Śiva.

Complete.

**Beginning:**

म्लेच्छोऽपि वा यदि भवेत् भगवद्भक्तिसंयुतः ।
न तत्समश्चतुर्वेदी नाग्निष्टोमादियज्ञकृत् ॥
नृणामत्यन्तसुलभः सच्चिदानन्दसंभृतः ।
अनादायफलो धर्मो रामरामेतिमन्त्रराट् ॥

* * * *

शिववर्णत्रयं रामो रामवर्णत्रयं शिवः ।
शिवरामद्वयं नाम अग्नितेजो यथा तथा ॥
श्वपचो वा दिवाकीर्त्यश्चण्डालो वात्मघातकः ॥
म्लेच्छो वा पिशुनो वापि सुरापी वाथ निन्दकः ।
नामोच्चारणमात्रेण निवृत्ताघः परं व्रजेत् ॥

**End:**

मन्नाम येषां मरणे समागते मच्चेतसा वान्यधिया च नामा(म्ना) ।
हीनाक्षरं वाधिकवर्णयुक्तं ममैव लोकं प्रददामि सत्यम् ॥

---

(*i*) भक्तिविषयकग्रन्थः.

BHAKTIVIṢAYAKAGRANTHAḤ.

Foll. 39*b*—42*b*.

Stanzas dealing with devotion to God Viṣṇu.

Complete.

**Beginning :**

दत्तात्रेयावतारमाह—

अत्रेरपत्यमभिकाङ्क्षित आह तुष्टो दत्तो मयाहमिति यत् भगवान् स दत्तः ।
यत्पादपङ्कजपरागपवित्रदेहाः योगार्थमापुरुभयीं यदुहेहयाद्याः ॥

अहमेव तुभ्यं दत्त इति यत् अत आह अतस्सनाम्नो दत्तोदजातः अतः स्वभक्तेभ्यो योगैश्वर्यरूपं दानं यच्चरितं दर्शयति ।

**End :**

कर्मानुसारेण धनार्जनं च वेदार्जनं शास्त्रसमार्जनं च ॥
भविष्यति श्रवणं चापि विष्णोः अत्यादरेण श्रवणं दुर्घटं च ।
अत्यादराद् भागवतं च सारमास्वादनं दुर्घटं मर्त्यलोके ॥

---

(*j*) बालचरितम्.

BĀLACARITAM.

Foll. 42*b*—46*b*.

Devotional description in Marathi language of the sports of Lord Kṛṣṇa when he was a child : by Tukārāma.

Complete.

**Beginning :**

श्रीहरिची बालचरित.

गोकुलान्त ऐसस्जाली एकदिवसानन्दकान्ता
प्रातःकालीदहीघुसळिदा कृष्ण एवुनी अवचिता
काये करितो ऐकं अतां एकहाती रवीवरीतरे.

* * * *

एकघटी करि कौतुकधावरि रावुगामगं राजीवलोचनं स्वस्त . . . . . . . . . बानिति निम्बुलोण करि जननि मुकुन्दा बाललीलाहे कथिलीभाष अम्बरनाथ बोले ॥ श्रीहरिचि ॥

**End :**

दोनिलक्षजाचे बन्दिजनदेखा फायीदळलेखानकरवम् ।
तुकाह्मणे ऐशाभोगिता सोहळा साङ्गता आदे लागे लानाही ॥
श्रीकृष्ण ॥

Foll. 47*a*—48*a* contain some Marathi songs. Fol. 48*b* is left blank. Fol. 49 contains some few stanzas.

---

(*k*) वैराग्यशतकम्.

VAIRĀGYAŚATAKAM.

Foll. 50*a*—64*a*. Fol. 64*b* is left blank.

A centum of stanzas inculcating renunciation. The headings of the Daśakas are given below :—

| | |
|---|---|
| १. तृष्णादूषणम्. | ६. यतिनृपतिसंवादः. |
| २. विषयपरित्यागविडम्बना. | ७. मनस्सम्बोधनपद्धतिः. |
| ३. याच्ञादूषणम्. | ८. नित्यानित्यविवेकः. |
| ४. भोगस्थैर्यापह्नुतिः. | ९. शिवार्चनपद्धतिः. |
| ५. कालमहिमपद्धतिः. | १०. अवधूतपद्धतिः. |

Contains Daśakas one to nine complete, and the tenth incomplete.

**Beginning :**

गूढोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तस्स्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयं-
श्चेतस्सद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥

अथ तृष्णादूषणम्—

भ्रान्तं देशमनेकदुःखमखिलं प्राप्तं न किञ्चित्फलं
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला ।

भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ॥

**End :**

चण्डालः किमयं हि जातिरथवा शूद्रोऽथ वैश्योऽथवा
किं वा तत्त्वविवेकपेशलमतिर्योगीश्वरः कोऽपि वा ।
इत्युत्पन्नविकल्पजल्पमुखरैराभाष्यमाणा जनै-
र्न क्रुद्धाः पथि नैव दुष्टमनसो यान्ति स्वयं योगिनः ॥

Fol. 65 contains a few stanzas of Bhīṣmaparvasaṅgraha and foll. 65*a*—69*a* contain some pithy songs in Marathi. Fol. 69*b* is left blank.

---

(*l*) शिवनाममहिमा.

ŚIVANĀMAMAHIMĀ.

Foll. 70*a*—71*b*.

On the religious efficacy and importance of the repetition of as well as the listening to the names of God Śiva.

Incomplete.

**Beginning :**

लोके मुमुक्षवः केचिच्चित्तशुद्धिमभीप्सवः ।
वाचा पठन्ति ये वेदान् तूष्णीं नानुभवन्ति ते ॥
यन्नाम गोकोटिसहस्रकोटिप्रदानपुण्याधिकपुण्यपुण्यम् ।
यन्नाम कन्यार्बुदकोटिकोटिप्रदानपुण्याधिकपुण्यपुण्यम् ॥

**End :**

ब्रह्महत्यासहस्राणि पुरा कृत्वापि पुल्कसः ।
शिवेति नाम विमलं श्रुत्वा मोक्षपदं ययौ ॥
क्रतूनां दशकोटीना(मश्व)मेधसहस्रकम् ।
शतं षोडशदानं तु गायत्री शतलक्षकम् ।
शतवारमिमां भूमिं प्रदक्षिणमथाकरोत् ॥
नामश्रवणतः पुंसां तत्फलं . . . . . ॥

Fol. 72 contains some pithy stanzas in Marathi.

(*m*) राधाकल्याणम्.

RĀDHĀKALYĀṆAM.

Foll. 73*a*—74*b*.

Deals with the marriage of Lord Kṛṣṇa with Rādhā.

Complete.

**Beginning:**

वैनतेयांसगो भूत्वा श्रीकृष्णः पार्थसारथिः ।
सन्ध्यामुखे पुनस्तस्मादाययौ खगवाहनः ॥
पूर्णचन्द्रनिभां राधां दृष्ट्वा नन्दगृहोपरि ।
पुलकाङ्कितसर्वाङ्गः का सा सौधोपरि स्थिता ॥
इति सञ्चिन्त्य लक्ष्मीशः तत्समीपमुपाययौ ।

* * *

विवाहं लौकिकं कृत्वा द्रक्ष्यामोऽत्र महोत्सवम् ।
तदा महावाद्यरवैस्समेता(नागान्तक)स्थं मनुजाकृतिं हरिम् ।
दृष्ट्वाथ तां सागरजां च तस्थौ सन्तोषमापुर्यदुवर्यसङ्घाः ॥

**End:**

पूजयामास सस्नेहं राधायाः पतिमादरात् ।
आरात्रिकं तु चक्राते यशोदा देवकी तयोः ॥
रक्ताक्षतैस्तदा विप्रा अच्युतं पूजयन्त्युत ।
पुष्पवर्षं तदा . . . विष्णुपदा नृप ॥

**Colophon:**

इति ब्रह्मकैवर्ते श्वेताश्वब्रह्मसंवादे कृष्णलीलामृतखण्डे मध्य . . .
. . . . . नाम चतुरशीतितमोऽध्यायः ॥

Fol. 75*a* contains a few lines of Sūryanamaskāra. Fol. 75*b* is left blank.

R. No. **1441.**

Palm-leaf. $14\frac{1}{2} \times 1$ inches. Foll. 45. Lines, 5 in a page. Grantha. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

Incomplete.

## पुरन्दरविट्ठलकीर्तनानि.

## PURANDARAVIṬṬHALAKĪRTANĀNI.

Devotional songs in Kanarese in praise of Viṭṭhala, a form of Viṣṇu: said to be by Purandaradās.

**Beginning:**

ಇವನಾರಿಂ ಉದುಕೊಂಡು ಹೋಗುಜೋಗಿ ॥
ನರಹರಿಯಾರಿಂ । ಉದುಕೊಂಡು ಹೋಗುಜೋಗಿ ॥
ಹಿರೀನಮಾವಮಾತಾ । ಕೇಲನೆ ಬಾಲಃಬಹುಭಂಡ
ಹರಿ ಕುಣಿದು ಕುಣಿದು ಪುಟನೀಜೀವಿ
ವಿದರೇ ಬೆನ್ನವಂದು ಕಟ್ಟಿದಕು
ಕಲ್ಲು ಬೆನ್ನುತಾಕಿ ಹರಿ ಮೌವೋಲ್ಯೆಯಲಿ ॥
ಗಂಡಾನಾ ದೊಳಗೆ ಧಾವ್ಯಾಡಬಂದರ ತುಟ್ಟಿ ಬೀರೇದಾನ ॥

* * * *

ಹತ್ತರ್ವಾಲೊಡನಗಾಳಿಂದ
ಕ್ಷಿತಿಗೋಲಡಾ ಪುರಂದರ ವಿಠಲ ॥
ಅಪ್ಪಯೊಬೋ ಘೋಗದೆಮುನ್ನೆ

**End:**

ಮುಖಾರಿರಾಗ-

ಹರಿಯೆಧಿಕ ಹರನಧಿಕ ಯೆಂದು ದೊಡ್ಡದಾಡದಿರು
ಹರಿಹರಭಕ್ತರಲ್ಲವೆ ಸಾಕ್ಷಿ ನಿಮಗೆ ॥ ಹರಿ ॥
ಹರಿಯು ಬಾಗಿಲಕಾಯಿದವ ಬಲಿ ಭಾಗ್ಯವಂತನಾದ
ಹರನು ಬಾಗಿಲಕಾಯಿದೆ ಬಾಣನಲಿದ ॥
ಹರಿವಾಲಿದೆ ಪ್ರಹ್ಲಾದ ಬಂದ ದುರಿತಪಗೇಲಿದ
ಹರ ವಲಿದೆ ಅವನಮಿತ ಹತಬಾದೆನರಿಯ ॥
ಹರ ವರನಪಡದು ಬಸ್ಮಾಸುರನು ಯೆನ್ನಟ್ಟ

ಹರನ ಶಿರದಲ್ಲಿ ಕರವಿಡಲು ಬರಲು
ಹರಿ ನೀನೇ ಗತಿಯೆಂದು ತ್ರಿಪುರಾರಿ ಮೊರೆಯಿಡಲು
ಕರಿವರದ ಪುರಂಧರ ವಿಠಲ ಕಾದದೆನರಿಯು || ಹರಿ ||

Fol. 45*b* is left blank.

---

## R. No. 1442.

Paper. 10¾ × 5⅝ inches. Foll. 51. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1914–15 from M.R.Ry. Āñjanēya Śarma of Varahūr, Tanjore district.

(*a*) प्रयाणपुरीमाहात्म्यम्.

PRAYĀṆAPURĪMĀHĀTMYAM.

Foll. 1*b*—31*b*.

On the holiness and religious importance of Prayāṇapurī Tirukkaḍambūr (?) (aplace in the Tanjore district) and of the sacred shrine therein dedicated to the worship of Śiva under the name of Purāṇēśvara.

Stated to be found in Adhyāyas 69 to 81 of the Uttarakhaṇḍa of the Skāndapurāṇa.

Contains the following subjects:—

६९. पुराणेश्वरमाहात्म्यकथनम्.
७०. कदलीवनकौशिकापुरीमाहात्म्यकथनम्.
७१. प्रयाणपुर्याख्यानम्.
७२. अमृतरक्षणकथनम्.
७३. युद्धारम्भकथनम्.
७४. अमृतलिङ्गमाहात्म्यकथनम्.
७५. प्रयाणपुरीमाहात्म्यकथनम्.
७६. Do.
७७. गौरीतपश्चरणवर्णनम्.
७८. राजपत्नीमोचनम्.
७९. ब्रह्मशापमोचनम्.
८०. प्रयाणपुरीमाहात्म्यम्.
८१. स्थानप्रभावकथनम्.

**Beginning:**

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

श्रीशौनकः—

कैलासशिखरे रम्ये कल्पद्रुमविभूषिते ।
नानारत्नसमाकीर्णे देवर्षिगणसेविते ॥

* * * *

श्रीभगवानुवाच—

भवतां कथयिष्यामि स्थानं प्रियतरं मम ।
उत्तमं सह्यजातीरे प्राक् सिन्धोर्योजनाष्टके ॥
फलप्रदं मनुष्याणां सद्य एव तथा सताम् ।
पुराणेश्वरमित्येव नाम्ना लोकेऽतिविश्रुतम् ॥

* * * *

इत्यन्योन्यं शम्भुनैव प्रशस्तं सर्वेऽप्येते तापसाः प्रीतिभाजः ।
स्थानादस्मान्नैमिषीमप्यवाञ्छन्(मुञ्चन्)वासं चक्रुः श्रीपुराणेश्वरेऽस्मिन् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे शम्भुसप्तर्षिसंवादे पुराणेश्वरमाहात्म्यं नाम एकोनसप्ततितमोऽध्यायः ॥

* * * *

तदाप्रभृति तत्स्थानं देवानां विजयावहम् ।
विजयाख्यपुरी नाम्ना महावीरपुरीति च ॥
प्रसिद्धिमगमल्लोके तत्र त्वमपि पूजय ।
एकपुष्पार्चनेनापि महादेवः प्रसीदति ॥
तवायं मनसोऽभीष्टं तत्र दास्यति वै ध्रुवम् ।
मदीयं वचनं सर्वमवबुध्यस्व मानद ॥
इत्युक्त्वा विरराामाथ वाणी चाकाशगोचरा ।

**Colophon:**

इति श्रीस्कान्दे पुराणे उत्तरखण्डे कदलीवनकौशिकापुरीमाहात्म्यं नाम सप्ततितमोऽध्यायः ॥

* * * *

तदाप्रभृति तत् क्षेत्रं श्रीप्रयाणपुरीत्यभूत् ॥
तस्मिन् पुण्यतरे क्षेत्रे ब्रह्मविष्ण्वादिसेविते ।
नित्यं च कलयांशेन वासो मोक्षप्रदायकः ॥
क्षणं वा क्षणिकार्धं वा दिनं वाथ दिनार्धकम् ।
तेषां वासं च कैलासं भविष्यति न संशयः ॥
अघहरमतिपुण्यदायकं शुभकरमर्थदमायुषप्रदम् ।
निवसति नियतं नरं च योऽस्मिन्स भवति ह जनस्य चेश्वरः ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे श्रीप्रयाणपुरीमाहात्म्ये प्रयाणपुर्याख्यानं नाम एकसप्ततितमोऽध्यायः ॥

**End:**

यत्सन्निधौ प्रतिदिनं कारणं कथितं मया ।
मत्समो नास्ति वा लोके नास्तीत्येव च मे मतिः ॥
ये शृण्वन्ति कथामेतां ये पठन्ति द्विजोत्तमाः ।
शिवज्ञानैकनिष्ठाश्च लभन्ते पदमैश्वरम् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे क्षेत्रवैभवखण्डे उत्तरखण्डे कदलीवनप्रयाणपुरीमाहात्म्ये स्थानवैभवकथनं नाम एकाशीतितमोऽध्यायः ॥

---

(*b*) कन्दुकापुरीमाहात्म्यम्.

KANDUKĀPURĪMĀHĀTMYAM.

Foll. 32*b*—51*a*. Foll. 32*a* and 51*b* are left blank.

On the holiness and religious importance of Kandukāpurī or Tiruppandaṇainallūr (about 7½ miles from Tiruviḍaimarudūr) and of the sacred shrine therein which is dedicated to the worship of Śiva.

Contains Adhyāyas 1—11 complete as given below :—

१. क्षेत्रवैभवकथनम्.
२. स्थलवैभवकथनम्.
३. तीर्थक्षेत्रवैभवकथनम्.
४. स्वर्गलोकप्राप्तिकथनम्.
५. धर्मकान्तपुत्रावाप्तिकथनम्.
६. पार्वतीशापकथनम्.
७. शिवसन्दर्शनम्.
८. देवीतपश्चरणम्.
९. पार्वतीविवाहः.
१०. आलयनिर्माणरथोत्सवादि-पूजाविधानम्.
११. वालितीर्थमहिमवर्णनम्.

**Beginning:**

ब्रह्मज्ञास्सुमहात्मानः ऋषयश्शौनकादयः ।
धर्मज्ञा अनसूयाश्च सत्यव्रतपरायणाः ॥
* * * *
कन्दुकापुरमाहात्म्यं वद विस्तरतोऽधुना ।

श्रीसूतः—

साधु पृष्टं महाप्राज्ञा लोकानां हितकाम्यया ॥
सम्यग्व्यवसिता बुद्धिः तपतां मुनिसत्तमाः ।
यतः कन्दुकपुर्याश्च माहात्म्यं पृच्छतोऽधुना ॥
कन्दुकापुरमाहात्म्यश्रवणात्पापनाशनम् ।
सर्वाभीष्टप्रदं नृणां पुत्रपौत्रप्रदायकम् ॥
* * *

**Colophon:**

इति श्रीस्कान्दे महापुराणे कन्दुकापुरीमाहात्म्ये क्षेत्रवैभवं नाम प्रथमोऽध्यायः ॥

**End:**

सूतः—

यः स्नायात् वालितीर्थे तु माघमासे दिनत्रयम् ।
कोटिवंशसमायुक्तो ब्रह्मलोकं स गच्छति ॥
* * * *

सूर्यचन्द्रोपरागे च वालितीर्थे च यो नरः ।
स्नानं करोति विप्रेन्द्राः चक्रवर्ती भवेद्धि सः ॥

**Colophon:**

इति स्कान्दे महापुराणे कन्दुकापुरीमाहात्म्ये वालितीर्थमहिमा(नुवर्ण)नं नामैकादशोऽध्यायः ॥

---

R. No. **1443.**

Paper. 8⅜ × 6¾ inches. Foll. 26. Lines, 15 in a page. Grantha. Injured.

Purchased in 1914-15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

**प्रसन्नवेङ्कटेशमाहात्म्यम्.**

PRASANNAVĒṄKAṬĒŚAMĀHĀTMYAM.

On the greatness of Prasanna Vēṅkaṭēśa, a form of Viṣṇu, worshipped in the sacred place known as Kuṇaśēkharam situated about eight miles west of Srirangam.

Adhyāyas 1—10 complete, but wants 30 stanzas in the beginning; stated to be found in the Bhaviṣyōttarapurāṇa.

**Beginning:**

(त्वया) संक्षेपतः प्रोक्तस्सूत विस्तार . . . . . दुः ।
वक्तुमर्हस्यशेषेण तस्य देव . . . . . . . . ॥

* * * *

श्रीरङ्गेशविमानस्य पश्चिमे योजनान्तरे ।
कावेर्या उत्तरे तीरे तपसा तस्य तोषितः ॥
आगमिष्यति (धर्मा)त्मा ह्याकल्पं तत्र तिष्ठति ।
प्रसन्नवेङ्कटेशस्य (दिव्यं रू)पं समुद्वहन् ॥
भक्तानामिष्टदो नित्यं तस्मात्तत्र (तपश्चर) ।
एवं गुरोर्वचश्श्रुत्वा कावेर्या उत्तरे (तटे) ॥
(तप)श्चकार सुमहान् गुणशीलमहामुनिः ।

* * * *

**Colophon :**

इति प्रसन्नवेङ्कटेश्वरमाहात्म्ये द्वितीयोऽध्यायः ॥

**End :**

भवतो दर्शनादेव सम्प्राप्यतां(प्तो)मे मनोरथम्(:) ॥
एवं वदन्तं पृथुकीर्तिभूपं स ज्ञानवर्माभ्यवदत्सुतुष्टः ।
निवेद्य वृत्तान्तमिमं समग्रं हरेस्ततस्सर्वमहं ब्रवीमि ॥

**Colophon :**

इति भविष्योत्तरपुराणे प्रसन्नवेङ्कटेशमाहात्म्ये दशमोऽध्यायः ॥
श्रीवेङ्कटाद्रिनिलयः श्रीमानाश्रितवत्सलः ।
श्रेयांसि दद्यात् भूयांसि शीघ्रं नः कामितार्थधुक् ॥

---

R. No. **1444.**

Paper. $8\frac{3}{8} \times 6\frac{3}{4}$ inches. Foll. 16. Lines, 22 in a page. Grantha. Much injured.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

(*a*) ब्रह्मविदाशीर्वादपद्धतिः.
BRAHMAVIDĀŚĪRVĀDAPADDHATIḤ.

Foll. 1*a*—6*b*.

Benedictory passages wishing the realisation of the identity of the individual soul with the Supreme Brahman which pervades all manifested things : by Vidyāraṇyamuni.

Complete.

**Beginning :**

हिरण्यगर्भादिस्थावरान्तशरीरेषु यदेकं चैतन्यमस्ति तदेवाहमस्मीति दृढज्ञानसिद्धिर्भूयात् । लयविक्षेपकषायरसास्वादेभ्यो रक्षितं चित्तमविघ्नेन ब्रह्मण्यवस्थितं भूयात् ।

**End:**

साधनान्तरनिरपेक्षतया वयमेव भासमानत्वादात्मा स्वयंप्रकाश इति स्वयंप्रकाशात्मानुभवस्सम्यगाविर्भूयात् । अत्रस्थास्सर्वे मद्रूपज्ञानाज्जीवन्मुक्ता भवेयुरिति ॥

**Colophon:**

इति श्रीमद्विद्यारण्यगुरुवर्यविरचितब्रह्मविदाशीर्वादपद्धतिस्समाप्तिमगमत् ॥

---

(*b*) सदाचारः.

SADĀCĀRAḤ.

Foll 6*b*—10*b*.

On the course of conduct said to have been laid down in authoritative treatises and intended for the observance of good people, which is said to consist in self-realisation: by Śaṅkarācārya.

Complete.

**Beginning:**

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यशङ्कराचार्यविरचितस्सदाचारः —

सच्चिदानन्दकन्दाय जगदङ्कुरहेतवे ।
गलिताखिलभेदाय नमोऽनन्ताय विष्णवे ॥
सर्ववेदान्तसिद्धान्तैर्ग्रथितं निर्मलं फलम् ।
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥
प्रातस्स्मरामि देवस्य सवितुर्भर्ग आत्मनः ।
वरेण्यं तद्धियो यो नश्चिदानन्दे प्रचोदयात् ॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ।
यदेकं केवलं ज्ञानं तदेवास्मि परं बृहत् ॥

**End:**

सदाचारमिमं नित्यं योऽनुसन्दधते बुधः ।
संसारसागराच्छीघ्रं मुच्यते नात्र संशयः ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविराचितस्सदाचारः समाप्तः ॥

(*c*) आत्मविद्याविलासः.

ĀTMAVIDYĀVILĀSAḤ.

Foll. 10*b*—16*b*. Foll. 14*b* and 15*b* are left blank.

A eulogy in 60 stanzas of the Āryā metre on his Guru Paramaśivēndrabhagavatpāda made by his disciple Sadāśivēndrabrahmēndra with a view to the attainment of the knowledge of the Brahman. It is so called because it incidentally explains the knowledge of the self.

Complete.

**Beginning:**

चिन्मुद्रितकरकमलं चिन्तिताभी(सकले)ष्टदं विमलम् ।
गुरुवरमाद्यं कञ्चन निरवधिकानन्दनिर्भरं वन्दे ॥
वटतरुनिकटनिवासं पटुतरविज्ञानमुद्रितकराब्जम् ।
कञ्चन देशिकमाद्यं कैवल्यानन्दनिर्भरं वन्दे ॥
निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकाम् ।
परमतभेदनघुटिकां परमशिवेन्द्रार्यपादुकां नौमि ॥
देशिकपरमशिवेन्द्रादेशवशोद्बुद्धदिव्यमहिमाहम् ।
स्वात्मनि विश्रान्तिकृते सरसं प्रस्तौमि कञ्चिदिदम् ॥
निरुपमनित्यनिरीहो निष्कसरिद्वारिपरिवृतोदारे ।
मन्दं मलयजपवने वाति प्रस्वापिति कोऽपि यतिराजः ॥

**End:**

अरसमगन्धमरूपं विरजस्कमसत्त्वमतमस्यम् ।
निरुपमनिभयतत्त्वं तत् किमपि द्योतते नित्यम् ॥
इति गुरुकरुणापाङ्गादार्याभिस्त्र्यधिकषष्टिसङ्ख्याभिः ।
निरवद्याभिरवोचं निगमशिरस्तन्त्रसारललितार्थम् ॥
गदितमिममात्मविद्याविलासमनुवासरं स्मरन् विबुधः ।
परिणतपरात्मविद्यः प्रपद्यते सपदि परमार्थम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रभगवत्पादपूज्यपाद-शिष्यसदाशिवेन्द्रब्रह्मेन्द्रविरचितमा(आ)त्मविद्याविलासः सम्पूर्णः ॥

ब्रह्मानन्दयतीन्द्राय शिष्यवर्गपराय च ।
नित्याय निर्विकाराय पिप्पलेशाय वै नमः ॥

---

## R. No. **1445.**

Paper. 6½ × 8 inches. Foll. 51. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

### सङ्गीतशाकुन्तलनाटकम्.
### SAṄGĪTAŚĀKUNTALANĀṬAKAM.

The well-known drama of Kālidāsa written in Marathi language and intended to be represented in accompaniment to music.

Contains Aṅkas one to four complete, and the fifth incomplete.

**Beginning :**

पद - राग - खमाज तालधुमाली
चाल - जयश्रीरमणा भवभयहरणा

पञ्चतुण्डनररुण्डमालधरपार्वतीश आधीनमितो ॥ विघ्नवर्गनग
भग्नकराया विघ्नेश्वरगणपतिमगतो ॥ पञ्च ॥ ध्रु० ॥
कालिदास कविराजरचितहें गानीं शाकुन्तलरचितों ॥ जाणुनिया न
न सेहें मह कृत्यभरशिरोंधेतों ॥ ईशवाचालेशमिळे तरिमूढयत्न शेवटीं जाता ॥ यान्यायें बलवत्कविनिजवाक्पुष्पीं रसिकार्चन करितो ॥ १ ॥

[सूत्रधारप्रवेशकरितो]

* * * *

साकी - राग - जोगी, ताल धुमाली.

सकलकलागुणवेत्ते पण्डित आजसभेमधिं असती ॥
यांना तोषाबया पाहिजे कालिदासकवी सुकृती ॥
दुष्करबहु आहे । सखये रङ्गस्थलपाहे ॥ १ ॥
म्हणुनि साङ्गतों भलती सलती व्यर्थचि नाटकरचना ॥
अभिज्ञानशाकुन्तल तत्कृतिदावुनि सुखवूं याना ॥
पात्रें तीं सजवी, माझा चिन्ताग्नी विझवी ॥

* * * *

[हीप्रस्तावनाझाली] [तदनन्तर हरिणा मागें सारथ्या सह दुष्यन्त-राजा रथान्त बसून प्रवेशकरितो] (सारथी—राजाकडे व मृगकडे पाहून)

साकी - रागजोगी तालधुमाली.

परव्याचेथन कन्या तेंन्या देउनि आजमि सुटलों ।
ठेवजसी मालकासि अर्पुनी आजऋणां तुनि फिटलों ॥
मुलिनों या आतां ॥ गेलीलाड किमभ दुहिता ॥

चवथा अङ्क समाप्त ॥

अङ्क ५. वा.

(आसनस्थ राजाव विदूषकप्रवेश करितात)

विदू.—(कानदेऊन) अरे मित्रा, सङ्गीतशाळे कडे जराकानदे पहा चीजकशीमजेदार असून त्यांत स्वरकसे गोडभरून सोडले आहेत लावाठतें, हंसपदिकाराणीची गाण्याची ताली मचालली आहे ।

**End:**

शार्ङ्ग—एकमेकांची प्रीति जडल्यामुळें माझ्यामागें तुम्ही माझ्या मुलीचा स्वीकारकेलात, ही गोष्ठप्रीतिपूर्वकमला मानवली.

साकी - रागजोगी ताल धुमाली.

R. No. **1446.**

Paper. 8½ × 7 inches. Foll. 54. Lines, 20 in a page. Grantha. Fair.

Purchased in 1914–15 from M.R.Ry. Lakṣmīnarasiṁhācārya of Rāmēśvaram.

वैखानसागमः—काश्यपीयः.

VAIKHĀNASĀGAMAḤ : KĀŚYAPĪYAḤ.

Foll. 1*a*—24*b*. The remaining foll. are left blank.

This Āgama work on the worship of Viṣṇu consists of many Saṁhitās of which the one in the present MS. is attributed to Kāśyapa.

Contains Adhyāyas one to eighteen complete and the nineteenth incomplete. They treat of the following subjects :—

१. उपोद्घातः.
२. भुवनखण्डविधिः.
३. वासयोग्यदेशनिरूपणम्.
४. विमानभेदविधिः.
५. अग्न्युत्पत्तिविधिः.
६. पौण्डरीकविधानम्.
७. श्रीकामविधिः.
८. पौण्डरीकाग्निविधानम्.
९. अद्भुतशान्तिविधिः.
१०. पौष्टिकाभिचारामुष्मिकविधिः.
११. वास्तुविधिः.
१२. भौतिकादिवृक्षनिरूपणम्.
१३. मासपक्षादिपरीक्षा.
१४. ग्रामादिविधानम्.
१५. गृहश्रेणिकादिनिरूपणम्.
१६. शिबिरविधानम्.
१७. पञ्चमूर्तिविधानम्.
१८. गृहवास्तुविधानम्.
१९. गृहवास्तुविधानम्.

**Beginning :**

शुक्लाम्बरधरं ( . . ) सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः ( . . ) विष्वक्सेनं तमाश्रये ॥
विष्वक्सेनः स्मृतो राजा भगवान् शुद्धकर्मणः ।
तस्मान्नान्यमुपासीत कर्मणां विघ्नशान्तये ॥

श्रौतस्मार्तादिकं कर्म निखिलं येन सूत्रितम् ।
तस्मै समस्तवेदार्थविदे विखनसे नमः ॥

काश्यपमाश्रमे समासीनं सर्ववेदवेत्तारं सर्वशास्त्रार्थतत्त्वज्ञमृषिं सुप्रसन्नमभिगम्य भगवन् केन विधानेन कैर्मन्त्रैः कं देवमर्चयन्तः परमं पदं गच्छेयुरिति सर्वभूतहिते रता मुनयोऽपृच्छन् । स तेभ्यः प्राह श्रुत्यनुकूलविधिना वैदिकैर्मन्त्रैर्देवेशं विष्णुमर्चयन्ते तद्विष्णोः परमं पदं गच्छेयुः.

* * * *

तस्मादालये विधिना विष्णोर्नित्यार्चनामनाहिताग्नीनामग्निहोत्रसमादेतच्चाग्निहोत्रफलन्दद्यादा[त्या]हिताग्नीनामप्येतत् सर्वप्रायश्चित्तहेतुकं सर्वकामावाप्त्यर्थं च द्वितीयं भवति.

* * * *

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे प्रथमोऽध्यायः ॥

**End:**

वायव्यामपि कूपतटाकानामीशान्यामङ्कणेऽभिमुखमार्यास्थानं पार्श्वे हेतुमुख्यागारं दक्षिणे अधिकारिनियुक्तान्तमाग्नेय्यां महानसम् एवं त्रिप्राकारयुतं सुदृढं परिकल्प्य तदभिमुखमङ्गनावाटं प्राच्यान्तर्महानसं सर्वतस्सैनिकान्तमिति ॥

**Colophon:**

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे अष्टादशोऽध्यायः ॥

वैश्यानां क्रयविक्रयागारं प्रत्यङ्मुखे दक्षिणे भोजनस्थानमन्यद्वैश्यसमं सर्वेषां नैरृत्यान्तैरिष्टभल्लातकनिम्बकल्पितं सूतीगृहं

* * * *

देवस्य दक्षिणे पार्श्वे दुर्गां सरस्वतीमुमामिन्द्रं शशिनं सूर्यं च संस्थाप्य त्रिकालं द्विकालमेककालं वार्चयेत् एते च पूजिता यस्य.

---

R. No. **1447.**

Palm-leaf. 15½ and 16¾ × 1⅛ and 1¼ inches. Foll. 85. Lines, 6 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḷ of Rāmēśvaram.

(*a*) अणुजयतीर्थविजयः.
ANUJAYATĪRTHAVIJAYAḤ.

Foll. 1*a*—7*b*.

A short eulogistic account of Jayatīrtha, a Mādhva Guru: by Vyāsatīrtha, a disciple of Jayatīrtha.

Complete.

**Beginning:**

नत्वा कृष्णं तथा मध्वं जयतीर्थगुरूनपि ।
वक्ष्ये श्रीमज्जयार्याणां स्तोत्रं सर्वसमृद्धिदम् ॥

श्रीमानिन्द्रः सुधीमान् गिरिशमुखसुरैः प्रार्थ्यमानं सुशास्त्रं
स्तोत्रं त्वेकाग्रबुद्ध्या वृष[भ]तनुरभवच्छ्रीमदानन्दतीर्थात् ।
धृत्वा स्वच्छास्त्रभारं प्रतिदिनमशृणोद्वाच्यमानं सुशास्त्रं
प्रान्तेऽसौ सूपविश्य द्विजगणसहितो ग्रन्थभारं दधानः ॥

**End:**

चित्रं श्रीमज्जयार्यैः कृतमपि विशदं विक्रमं को नु वक्ता
किन्तु स्मृत्यर्थमल्पं गुरुभिरनुदिनं वर्णितं वर्णितं मे ।
तेन श्रीमध्वनाथो गुरुकुलतिलको माधवो मानसिद्धो
भूयात् प्रीतस्समस्ता अपि गुरुगुरवः प्रीतियुक्ता भवन्तु ॥

**Colophon:**

इति श्रीमज्जयतीर्थपूज्यपादशिष्येण व्यासतीर्थयतिना रचितः अणुजयतीर्थविजयः संपूर्णः ॥

The scribe adds—

दुर्मुखाब्दे भौमवारे आषाढे सितपक्षके ।
रेवत्यृक्षे च षष्ठ्यां तु जयतीर्थमुनेस्तथा ॥
स्तोत्रं भक्त्या विलिखितं कुप्पनामाभिधायिना ।
लेखनेन सदा चैव मध्वेशः प्रीयतां मम ॥

---

(*b*) दण्डतीर्थमहिमा.
DAṆḌATĪRTHAMAHIMĀ.

Foll. 8*a*—13*a*.

Deals with the sacredness and religious importance of the holy collection of water known as Daṇḍatīrtha said to be found about three miles to the west of the Viṣṇu shrine at Śrimuṣṇam in the South Arcot district.

Complete; said to occur as the seventy-first Adhyāya in the Śrīmuṣṇamāhātmya forming part of the Kāśīkhaṇḍa.

**Beginning:**

दक्ष उवाच—

देवदेव विरूपाक्ष करुणाकर शङ्कर ।
संसारभयभीतानां जनानां पापकारिणाम् ॥
स्वहिते मुष्टदृष्टीनां भक्तानां विष्णुपादयोः ।
त्वं गुरुर्हितकृद्बन्धुर्मोक्षादिपुरुषार्थदः ॥
कथं तेषां गतिर्भूयात्तन्मे ब्रूहि महामते ।
इति तेनार्थितः शम्भुस्सन्तोषाकुलमानसः ॥
व्याहर्तुकामो देवेशं नारायणमनामयम् ।

* * * *

क्षेत्राणामुत्तमं क्षेत्रं श्रीमुष्णं पापनाशनम् ।
पूर्वाम्भोधेः पश्चिमे तु कावेर्या उत्तरे तटे ॥
वृद्धाचलात्पूर्वभागे गरुडायास्तु दक्षिणे ।
वर्तते तत्र तीर्थानि सन्ति पापहराणि वै ॥
तेषां तु महिमा लोके पुराणेषु च गीयते ।
विमानात् पश्चिमे भागे सार्धक्रोशविदूरतः ॥
तीर्थमस्ति महत्पुण्यं यतिरूपं मरुत्कृतम् ।
दण्डतीर्थमिति ख्यातं स्नानादघनिवारकम् ॥

**End:**

तस्मात् पुण्यतमे तीर्थे स्नानं कुर्यात् प्रयत्नतः ॥
ऋषिस्तु भगवान् ब्रह्मा देवता भगवान् हरिः ।

त्रिष्टुप् छन्दस्तु विज्ञेयं बळित्थेत्यादिका ऋचः ॥
जप्यादेवं तु विज्ञानं येनाधीस्सन्तरिष्यसि ।
इत्येतत्कथितं विप्र गोप्याद्गोप्यतरं शुभम् ॥
वेणुतीर्थस्य माहात्म्यं पूर्णप्रज्ञमुनेस्तथा ।
शिष्यत्वात्तव वै प्रोक्तमित्युक्त्वान्तर्दधे शिवः ॥

**Colophon:**

इति श्रीकाशीखण्डे तीर्थप्रशंसायां दक्षशङ्करसंवादे श्रीमुष्णमाहात्म्ये एकसप्ततितमोऽध्यायः ॥

Fol. 13*b* contains a few stanzas of Daṇḍatīrthamahiman as found in the Nāradapurāṇa.

---

(*c*) मध्वाचार्यप्रशंसनम्.

MADHVĀCĀRYAPRAŚAṀSANAM.

Foll. 14*a*—25*a*. Fol. 25*b* is left blank.

A eulogistic description of the birth and the leading incidents in the life of Ānandatīrtha or Madhvācārya, who was considered to be an incarnation of Vāyu or the god of Wind. He was born as the son of Madhyagēha.

This is stated to have been taken from the ninth Adhyāya of the Śrīmuṣṇamāhātmya forming part of the Brahmāṇḍapurāṇa, from the Madhyabhāga of the same Purāṇa and from the 160th Adhyāya of the Uttarakāṇḍa of the Skāndapurāṇa.

Complete.

**Beginning:**

श्रीदक्ष उवाच—

देवदेव महादेव उमाकान्त सदाशिव ।
अष्टाविंशत्कलौ प्राप्ते नष्टधर्मा (र्में) जगत्रये ॥
पाषण्डमयभूयिष्टं जगदेतच्चराचरम् ।
सच्छास्त्रश्रवणं नास्ति सम्यक् ज्ञानं तिरोहितम् ॥

राक्षसाः कलिमाश्रित्य जाता विप्रकुले . . . ।
इति विज्ञाप्य देवेशं नम कृत्वाग्रतस्स्थितः ॥

श्रीशङ्करः—

साधु साधु महाप्राज्ञ प्रश्नोऽयं धर्मवत्तरः ।
एवं धर्मा विनष्टास्स्युः सच्छास्त्राणि कलौ युगे ॥

* * * * *

भगवान्—

अहं व्यासतनुर्भूत्वा तिष्ठामि बदरिकाश्रमे ।
वायुस्तच्छिष्यतां प्राप्य उद्धरिष्यति सज्जनान् ॥
इति विज्ञाप्य देवांश्च वायुमाहूय चाब्रवीत् ।
त्वं तु विप्रकुले भूत्वा यतिरूपेण सज्जनान् ॥
उद्धरस्व महाबाहो जित्वा मणिमदादिकान् ।
वेदशास्त्रार्थतत्त्वज्ञान् सज्जनान् कुरु सुव्रतान् ॥
एतच्छ्रुत्वा हरेर्वाक्यं स्वलोकं जग्मिरे सुराः ।
वायुश्च भगवान् देवो माणिभद्रं समाविशत् ॥
वायुरावेशसंयुक्तो माणिभद्रोऽप्यजायत ।
मध्यगेहस्य भार्यायां द्वात्रिंशल्लक्षणैर्युतः ॥
जातमात्रात्ततो देवः प्रविवेश यथापुरम् ।
गर्भदुःखविवर्जस्तु वर्धयन् स बभूव ह ॥

* * * *

निराकृत्य च पाषण्डं मिथ्यावादं महामतिः ॥
तुष्यन्ति मुनयस्सर्वे भविष्यन्ति च निर्भयाः ।
कलौ तु पापभूयिष्ठे सज्ज्ञानं नश्यति ध्रुवम् ॥

इति श्रीब्रह्माण्डपुराणे श्रीसुष्णमाहात्म्ये नवमे अध्याये ।

* * * *

राजद्वारं समासाद्य कृत्वा दुःशास्त्रखण्डनम् ।
व्याकरिष्यति सच्छास्त्रं सगुणब्रह्मवाचकम् ॥

इति श्रीब्रह्माण्डपुराणे मध्यभागे कृष्णमाहात्म्ये श्रीमदानन्दतीर्थाचार्यप्रशंसनम्.

**End:**

इत्येतद्धर्ममखिलं ज्ञात्वा सच्छास्त्रमुत्तमम् ।
श्रुत्वा पठेन्मध्वशास्त्रं विष्णूद्रेकाय कथ्यते ॥

इत्येतद्धर्ममखिलं ज्ञात्वा श्रीमध्वशास्त्रगुणपरिप्रवाहे योऽवगाहति हरिं ध्यायन् नरस्स याति हरिचरणारविन्दम् ॥

**Colophon:**

इति श्रीस्कान्दपुराणे उत्तरकाण्डे उमामहेश्वरसंवादे मध्वमतप्रशंसनं नाम षष्ठिशततमोऽध्यायः ॥

* * * *

द्वात्रिंशल्लक्षणैर्युक्तो गर्भदुःखविवर्जितः ।
स एवानन्दतीर्थेति भुवि ख्यातोऽखिलैर्जनैः ॥

इति च वाराहे ।

The name of the scribe and the date of transcription are given thus:

दुर्मुखिसंवत्सरमाघशुद्धदशमीबुधवारदिनतायिनूरुकुप्पन्नसेवे.

---

(*d*) तुलसीस्तवराजः.

TULASĪSTAVARĀJAḤ.

Foll. 26*a*—27*b*.

A eulogy on the plant Tulasī, which is conceived to be a goddess. The concluding stanzas describe the religious efficacy of the repetition of this eulogy.

Complete; said to form the 39th Adhyāya of the Vṛddhapādmapurāṇa.

**Beginning:**

नारायणः—

स्तवराजमतो वक्ष्ये तुलसीतोषकारणम् ।
यस्याध्ययनमात्रेण सर्वमङ्गलभाग्भवेत् ॥

तुभ्यं नमो महादेवि लक्ष्मीप्रियसखि क्षमे ।
सीते रुक्मिणि पद्मेति श्रीमन्तं मां विदेद्धि भो ॥

सरस्वति नमस्तुभ्यं खिन्नभक्ताभयप्रदे ।
शुभदे देहि मे लक्ष्मीं देवैर्नतपदाम्बुजे ॥

**End:**

दशसाहस्रजापेन साक्षान्नारायणो भवेत् ।
स्त्रिया जप्यं सुमाङ्गल्यं विशेषेणार्थसिद्धये ॥

या परस्तात् द्वादशाब्दात्पुरस्ताद्विंशतेरपि ।
स्त्री ब्राह्मणी पतिमती जपेत् कामार्थसिद्धये ॥

उपवासदिने जप्तं सहस्रगुणितं भवेत् ॥

**Colophon:**

वृद्धपाद्मे तुलसीस्तवराजो नाम एकोनचत्वारिंशोऽध्यायः ॥

---

(*e*) तुलसीकवचम्.

TULASĪKAVACAM.

Foll. 27*b*—29*b*.

Similar to the work described under No. 6329 of the D.C.S. MSS., Vol. XIII.

Complete; stated to be found in the 40th Adhyāya of the Vṛddhapādmapurāṇa.

**Beginning:**

नारायणः—

कवचं तव वक्ष्यामि भवसङ्क्रमनाशनम् ।
यस्य जापेन सिध्यन्ति सर्वार्थानामयत्नतः ॥

तुलसी पातु मे नित्यं शिरो वस्त्रं(वक्त्रं)सनासिकम् ।
श्रोत्रे नेत्रे ललाटं च भ्रूकपोले निरन्तरम् ॥

श्रीसखी पातु मे कण्ठं भुजौ वक्षोजकक्षकम् ।

**End :**

यत्पृष्टमासीद्भवता द्विजेन्द्र तदुक्तवानस्मि मनोज्ञबन्धम् ।
मास्म त्वमस्मत्कथितं कथार्थं विस्मर्तुमर्हस्यतिविस्मितार्थम् ॥

**Colophon :**

इति वृद्धपाद्मे तुलसीकवचं नाम चत्वारिंशोऽध्यायः ॥

---

(*f*) तुलसीकवचम्.

TULASĪKAVACAM.

Foll. 29*b*—30*a*.

Same work as that described under No. 6329 of the D.C.S. MSS., Vol. XIII, but with slight difference in the beginning and end and without Pūrvapīṭhikā

Complete.

**Beginning :**

ब्रह्माण्डपुराणे सुब्रह्मण्याय उपदेशं कृतम् ।

शङ्करः—

तुलसीकवचमन्त्रस्य अहमेव ऋषिस्स्मृतः ॥
अनुष्टुप् छन्द इत्युक्तं देवता तुलसी स्वयम् ।
तुलसी मे शिरः पातु फालं पङ्कजमालिनी ॥

**End :**

इतीदं परमं गुह्यं तुलस्याः कवचामृतम् ।
मर्त्यानाममृ(त)त्वाय भीतानाममृताय च ॥
मोक्षाय च मुमुक्षूणां श्रीकामानां श्रियै तद्।

**Colophon :**

इति तुलसीकवचं संपूर्णम् ॥

---

(*g*) तुलसीपूजा.

TULASĪPŪJĀ.

Foll. 30*a*—33*a*.

Same work as that described under No. 8315 of the D.C.S. MSS., Vol. XIII, but the additional stanzas and Pūrvapīṭhikā are given below.

Complete; stated to occur as the fifth Adhyāya of the Vāmana-purāṇa.

**Beginning:**

पार्वती—

रोप्यते केन विधिना तुलसी पूज्यते तथा।
तमाचक्ष्व ममेशान मय्यनुग्रहकारणात् ॥

* * * *

गायत्र्याष्टशतं जप्त्वा तुलसीमथ पूजयेत् ।
प्राङ्मुख उदङ्मुखो वापि स्थित्वा प्रयतमानसः ॥

**End:**

इदं तु तुलसीपूजास्तोत्रमाहात्म्यमेव च ।
लेखयेद्वा पठेद्वापि स गच्छेद्वैष्णवं पदम् ॥

**Colophon:**

इति श्रीवामनपुराणे तुलसीमाहात्म्ये पञ्चमोऽध्यायः ॥

---

(h) तुलस्यष्टोत्तरशतनामस्तोत्रम्.

TULASYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 33*a*—37*b*.

Similar to the work described under No. 9104 of the D.C.S. MSS., Vol. XVII.

Complete; said to be found in the 35th Adhyāya of the Padma-purāṇa.

**Beginning:**

गौतमः—

अष्टोत्तरशतं नाम्नां तुलस्या ज्ञानसिद्धिदम् ।
प्रवक्ष्यामि महाबुद्धे येन विद्यामवाप्स्यति ॥
ऋषिस्तु भगवान् भर्गः तस्य मन्त्रस्य कीर्तितः ।
अनुष्टुप् छन्द इत्युक्तं ज्ञानार्थे विनियुज्यते ॥

तुलसी श्रीसखी देवी देवपाला दिवस्सखी ।
धारिणी धरणी धात्री सावित्री सत्यसङ्गता ॥
कल्हारिणी च गौर्यङ्गा देवगीता यवीयसी ।

**End:**

सदानन्दा तु संहर्त्री पानीदान(?)मया वनात् ।
श्रुतिस्मृत्यात्मकत्वेन निरुक्तमिदमुत्तमम् ॥

इत्येवमुक्त्वा भगवान् पुनर्ययौ स्वमाश्रमं श्रीनिलयं महामुनिः ।
पुत्रोऽपि तस्याप्रतिरूपपौरुषः सदैव देवीं प्रचय(णतः) : समाप(भ)जत् ॥ ९ ॥

**Colophon:**

इति श्रीपाद्मे पञ्चत्रिंशोऽध्यायः ॥

---

(*i*) तुलसीस्तुतिः.

TULASĪSTUTIḤ.

Foll. 37*b*—38*a*.

Similar to the work described under sub-division (*d*) *ante*.

Complete.

**Beginning:**

राजा—

जगद्धात्रि नमस्तुभ्यं लोकमात्रे नमो नमः ।
अणुर्भवाश्रया देवाः सृष्टिस्थित्यन्तकारिणः ॥
त्वन्मायाजृम्भणमिदं जगत् स्थावरजङ्गमम् ।
त्वत्पूजासक्तमनसां निकटे मुक्तपद्धतिः ॥
त्वत्पादपूजायुक्तानां दुर्लभं किं सुरेश्वरि ।
यस्मै प्रसन्ना त्वं देवि संस्थाप्य जगतीतले ॥

**End:**

तेन प्रीतो महाविष्णुः स्वयं पुत्रत्वमाप्नुयात् ।
आगामिचैत्रमासे तु जातः पुत्रो भविष्यति ॥

इति दत्वा वरं देवी क्षणादन्तर्हिता ययौ ॥

**Colophon:**

इति तुलसीस्तुतिः ॥

Foll. 38*a* to 39*a* contain a few stanzas on the Tulasī plant. Fol. 39*b* is left blank. Foll. 40—43 contain passages dealing with gifts to be made in the month of Kārtika.

---

(*j*) ज्वरस्तोत्रम्.

JVARASTŌTRAM.

Foll. 44*a*—46*b*. Fol. 47 is left blank.

A eulogy on Kṛṣṇa said to have been made by Śiva's fever. The allusion is to the Puranic story of the havoc caused by the two kinds of fever emanating from Viṣṇu and Śiva repectively, and therefore known as Viṣṇu's fever and Śiva's fever and Lord Kṛṣṇa's overcoming the latter kind of fever.

This is different from what is contained in the Adhyāyas 122 and 123 of the printed copy of Harivaṁśa.

Complete.

**Beginning:**

तमुवाच ज्वरो भूयः साक्षाद्विष्णुमपि स्वयम् ।
प्रणम्य शिरसा देवं कृताञ्जलिपुटस्ततः ॥

ज्वरः—

नमः कृष्णाय हरये विष्णवे प्रभविष्णवे ।
आदिदेवाय देवाय पुराणाय गदाभृते ॥

* * * *

अहमेको ज्वरो देव भविता प्राणिनां हरे ।
त्वत्प्रसादेन नान्यः स्याज्ज्वरस्त्वमिति वर्धन ॥

ततस्तुष्टो हृषीकेशः स्तोत्रेणानेन केशवः ।
प्रीतिमांश्चाभवत्कृष्णो रौद्रं ज्वरमुवाच ह ॥

एक एव ज्वरो अस्तु भवानेव यथासुखम् ।
अन्तकाले मनुष्याणां भूयाद्भोगाय मामकः ॥

**End:**

एवमस्त्विति गोविन्दं बभाषे केशवं तदा ।
प्रणम्य शिरसा विष्णुं भक्तानामभयङ्करम् ।
वासुदेवं महात्मानमपाक्रान्तस्ततो रणात् ॥

**Colophon:**

इति हरिवंशे माहेश्वरस्तुतिः समाप्ता ॥

---

(*k*) होलिकाविधानम्.

HŌLIKĀVIDHĀNAM.

Foll. 48*a*—51*a*.

Same work as that described under No. 1435(*a*-9) *ante*.

Complete.

---

(*l*) होलिकाविधानम्.

HŌLIKĀVIDHĀNAM.

Foll. 52*a*—54*b*. Fol. 55 is left blank. Fol. 56 contains the names of some of the works in this manuscript.

Duplicate copy of the previous work.

---

(*m*) पवित्रश्रुतिव्याख्या.

PAVITRAŚRUTIVYĀKHYĀ.

Foll. 57*a*—60*b*.

A commentary on the first verse of the eighty-third Sūkta of the ninth Maṇḍala of the Ṛgvēda beginning with Pavitram, etc., which is here said to enjoin the marking of the body with the heated metallic representations of the conch and the discus of God Viṣṇu.

Complete.

**Beginning:**

तथाहि ऋग्वेदे—

पवित्रं ते विततं ब्रह्मणस्पते ( . . ) श्रितास इद्वहन्तस्तत्समासतेति । इयं श्रुतिः तप्तमुद्राधारणं विधत्ते । अस्याः श्रुतेरयमर्थः—ब्रह्म-

णो वेदस्य चतुर्मुखस्य ब्रह्मजातेश्च पते रक्षक इति विकाससम्बोधनम्। प्रभुः त्वं विश्वतो विश्वेषां गात्राणि पर्येषि व्याप्तोऽसि अन्तर्यामिरूपेण वर्तसे । तादृशस्य ते तव पवित्रं सुदर्शनम् । पवित्रमिति सुदर्शनस्य संज्ञा ।

**End:**

समुद्रियं समुद्रिक्तमपां कर्मणामूर्मिं तरङ्गरूपं संसारं तस्मिन्नपो मातरिश्वा दधाती(ती)शावास्यश्रुतिव्याख्यानावसरे अपः कर्माधीतिव्याख्यातत्वात् ।

ऊर्ध्वपुण्ड्रगदाहीना नारी निस्सार उच्यते ।
विद्यासुखेन यो राजन् ब्रह्मणो वर्ततेऽनिशम् ॥
स स्नातस्सर्वतीर्थेषु तप्तं तेनाखिलं तपः ।

* * * *

श्वेतद्वीपो दिवस्स्रोतस्तत्र मध्यं सरोवरम् ।
लोकत्रयविवक्षायां परतो लक्षयोजनात् ॥

प्रतिबिम्बत्वं नाम तदधी(न)त्वे सति तत्सदृशत्वं प्रतिबिम्बत्वम् ।

Foll. 60*b*—63*b* contain a few stanzas of Rāmāvatārādikālanirṇaya.

---

(*n*) अश्वत्थोपनयनम्.

ĀŚVATTHŌPANAYANAM.

Foll. 63*b*—66*b*.

Slightly different from the work described under No. 8212 of the D.C.S. MSS., Vol. XVI, in the beginning and end.

Complete.

**Beginning:**

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनाद्यष्टमे वर्षे द्वादशैकादशेऽपि वा ॥
उक्ताः कालास्त्रयश्शस्ताः कुर्यात्तत्रोपनायनम् ।

**End:**

प्रतिबन्धविनिर्मुक्तस्सर्वान् भोगानवाप्स्यति ।
कुलकोटिं समुद्धृत्य ब्रह्मसायुज्यमाप्नुयात् ॥

**Colophon:**

इति अश्वत्थोपनयनं समाप्तम् ॥

---

(o) गोपालाष्टोत्तरशतनामस्तोत्रम्.

GŌPĀLĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 66*b*—69*a*.

Same work as that described under No. 8924 of the D.C.S. MSS., Vol. XVII, but the additional stanzas of Pūrva-pīṭhikā in the beginning and the additional stanzas of Phalaśruti in the end are given below.

Complete.

**Beginning:**

कैलासशिखरे देवी पप्रच्छ रहसि स्थितम् ।
केनोपायेन मर्त्यानां मन्त्रसिद्धिर्भवेत्सदा ॥

* * * *

जयदं सर्वलोकानां राजवश्यकरं परम् ॥

**End:**

इत्येवं गोपिकानाथनाम्नामष्टोत्तरं शतम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

* * * *

माधवाय नमस्तेऽस्तु हयग्रीवाय ते नमः ।

**Colophon:**

इति पाराशरस्तोत्रं संपूर्णम् ॥

(*p*) पूर्वादिदिङ्नामनिर्वचनम्.

PŪRVĀDIDIṄNĀMANIRVACANAM.

Foll. 69*b*—76*a*.

Gives the Puranic stories relating to and the origin of the names of and other details connected with the various directions, viz., east, west, north, and south. As stated herein it forms the Adhyāyas 110 to 113 in the Udyōgaparvan of the Mahābhārata.

Complete.

**Beginning:**

उद्योगपर्वणि १[०]१० अध्याये

सुपर्णः—

अनुशिष्टोऽस्मि देवेन गालवज्ञानयोगिना ।
ब्रूहि कामनुयास्यामि द्रष्टुं प्रथमतो दिशम् ॥
पूर्वां वा दक्षिणां चेमामथवा पश्चिमां दिशम् ।
उत्तरां वा द्वि(जश्रे)ष्ठ कुतो गच्छामि गालव ॥
यस्यामुदयते पूर्वं सर्वलोकप्रभावनः ।
सविता यत्र साध्यानां सिद्धानां वर्तते तपः ॥

**End:**

उद्यतोऽहं द्विजश्रेष्ठ तव दर्शयितुं जगत् ।
पृथिवीं चाखिलां ब्रह्मन् तस्मादारोह मां द्विज ॥

**Colophon:**

इति उद्योगपर्वणि सुपर्णगालवसंवादे श्याकर्म(श्यामकर्ण)अश्वसम्पादने विश्वामित्राय दातुं त्रयोदशोत्तरशततमोऽध्यायः ॥

एवं पूर्वदक्षिणपश्चिमोत्तरदिशानिर्वचनप्रकारः ॥

Foll. 76*b*—79*a* contain a few stanzas of Yatinamaskāraviṣaya.

---

(*q*) सर्वतोभद्रमण्डलपद्धतिः.

SARVATŌBHADRAMAṆḌALAPADDHATIḤ.

Foll. 79*b*—84*b*.

On the drawing and worship of the design called **Sarvatō-bhadra.**

Comptete.

**Beginning:**

प्रागुदीच्या कृता रेखा कुर्यादेकोनविंशतिः ।

इत्थं रेखा कृता चेत् त्रिशतोत्तरचतुर्विंशतिकोष्ठा भवन्ति । कोष्ठसङ्ख्या ३०२४.

खण्डेन्दुस्त्रिपदा कोणे शृङ्खला पञ्चभिः पदैः ।
एकादशपदा वल्ली भद्रन्तु नवभिः पदैः ॥

**End:**

नवनीतोदनं वरुणाय यवोदनं वायवे प्रियङ्गो(ङ्ग्वो)दनं सोमाय गोदुग्धोदनमीशानाय अन्येभ्यो यथालाभः नैवेद्यशेषेण बलिः कार्या । अथ पूजाविधिः । इति समाप्तम् ।

सप्तसमुद्राय स्वाहा । पर्यन्तर ऋक् । अन्येषां नाममन्त्रेण जुहुयात् ॥

**Colophon:**

इात सर्वतोभद्रमण्डलपद्धातिः ॥

---

## R. No. 1448.

Palm-leaf. 14¾ × 1⅜ inches. Foll. 59. Lines, 5 in a page. Nandi-nāgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḷ of Rāmēśvaram.

(*a*) सङ्क्षेपसृष्टिप्रकारनिरूपणम्.

SAṄKṢĒPASṚṢṬIPRAKĀRANIRŪPAṆAM.

Foll. 1*a*—19*b*.

A short description of the creation of the universe, as based on the substance of what is stated in the Bhāgavatatātparyanirṇaya, the Viṣṇurahasya and the Varāhapurāṇa on this subject.

Complete.

**Beginning :**

श्रीमद्भागवततात्पर्यनिर्णयविष्णुरहस्यवराहपुराणादीनि यथाशक्त्या-लोड्य ध्यानार्थं सृष्ट्यादिकं सङ्क्षेपेण निरूप्यते—

तत्र भूगोलः—

ब्रह्माण्डं स्रष्टुकामोऽथ विष्णुर्लक्ष्मीमसेवत ।
तया विंशतितत्त्वानां गणं युगपदाविशत् ॥

अनन्तरं विष्णुतत्त्वैस्सह रेतो रमायां विदधे । तद्रेतस्तदुदरं प्रविश्य तदैवोदके निपपात । तदैव सौवर्णं समावर्तकं ब्रह्माण्डं तैजसाद्राशेर-भवत् । ब्रह्माण्डान्तः पञ्चाशत्कोटिविस्तीर्णं भूमण्डलं वर्तते ।

**End :**

तस्मिन् मन्वन्तरे ब्रह्मन् शुचिरिन्द्रीभविष्यति ।
नारायणस्य तनयो बृहद्भानुस्तथा हरिः ॥
विनतायां महाराजन् कृपातन्तुवितानितः ।
राजंश्चतुर्दशैतानि त्रिकालानुगुणानि ते(वै). ॥
प्रोक्तान्येभिर्मनुः कल्पः युगसाहस्रपर्णयः ।

जविसृष्टिप्राकारः संक्षेपेण कथ्यन्ते—

Fol. 20 is left blank.

---

(*b*) ऋषिपञ्चमीव्रतकल्पः.

ṚṢIPAÑCAMĪVRATAKALPAḤ.

Foll. 21*a*—35*b*.

Similar to the work described under No. 8230 of the D.C.S. MSS., Vol. XVI.

Incomplete.

**Beginning :**

आसनं प्राणानायम्य सप्तऋष्यन्तर्गतश्रीलक्ष्मीवेदव्यासप्रेरणया श्रीलक्ष्मीवेदव्यासप्रीत्यर्थं मया आचरितऋषिपञ्चमीव्रतस्य समग्रसंपूर्ण-फलावाप्त्यर्थं मया ज्ञानतोऽज्ञानतः कृतरजस्वलादिदोषपरिहारार्थम्

* * * *

सप्तर्षिपूजां करिष्ये इति सङ्कल्प्य

कश्यपस्सर्वलोकानां सर्वभूतहिते रतः ।
नराणां पापनाशाय ऋषिरूपेण संस्थितः ॥

कश्यपमावाहयामि

**End:**

पितोवाच—

श्रृणु पुत्र प्रवक्ष्यामि आवयो . . . . वान् ।
आर्जितं स्नुषया तत्र पुण्यं जन्मनि सप्तमे ॥
ऋषिव्रतस्समुद्भूत आवाभ्यां यदि दीप्यते ।
तेन . . . . . . . . . . . . . . ॥

---

(c) कृष्णामृतमहार्णवः.

KṚṢṆĀMṚTAMAHĀRṆAVAḤ.

Foll. 36*a*—47*b*.

Inculcates the worship of Lord Kṛṣṇa, who is an incarnation of Viṣṇu. The importance of wearing the Ūrdhvapuṇḍra is explained in the concluding stanzas.

Incomplete. Breaks off in the 227th stanza.

**Beginning:**

अर्चितस्संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥
तापत्रयेण सन्तप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शान्तये ह्यस्य कृष्णामृतमहार्णवम् ॥
ये नराः पशवो लोके किं तेषां जीवने फलम् ।
यैर्न वाधा(लब्धा)हरेर्दीक्षा नार्चितो वा जनार्दनः ॥

* * * *

आधारस्सर्वभूतानां येन विष्णुः प्रसाधितः ।
यज्ञानां तपसां चैव शुभानां चैव कर्मणाम ॥

तद्विशिष्टफलं नृणां तदेवाराधनं हरेः ।
कलौ कलिमलध्वंसि सर्वपापहरं दतम् (हरिम्) ॥

**End:**

ऊर्ध्वपुण्ड्रमृजुं सौम्यं ललाटे यस्य दृश्यते ।
स चण्डालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥

अशुचिर्वाप्यनाचारः मनसा पापमाचरन् ।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रधरो नरः ॥

Foll. 48—49 are left blank.

---

(*d*) शीतलास्तोत्रम्.
ŚĪTALĀSTŌTRAM.

Size, 13 × 1¼ inches. Foll. 50*a*—51*b*.

Similar to the work described under No. 7397 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अस्य श्रीशीतलास्तोत्रमहामन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीशीतला देवता । श्रीं बीजम्, श्रीं शक्तिः, श्रीं कीलकम्, शीतलाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं श्रीं शीतले शीतले शोकान् दाहय दाहय सर्वदा शमय शमय छेदय छेदय शीतले शीतले श्रीं ह्रीं श्रीं.

स्कन्द उवाच—

भगवन् देवदेवेश शीतलायास्स्तुतिं शुभाम् ।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहाम् ॥

End:

शीतलास्तोत्रमेवैतन्न देयं यस्य कस्यचित् ।
दातव्यो न सदा तस्मै भक्तिश्रद्धान्विताय च ॥

Colophon:

इति शीतलास्तोत्रं संपूर्णम् ॥

शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शीतलायै नमो नमः ॥

Fol. 51 contains a few stanzas of Adhimāsadāna.

---

(*e*) प्रमाणलक्षणम्.

PRAMĀṆALAKṢAṆAM.

Foll. 52*a*—55*b*.

By Ānandatīrtha. Same work as that described under No. 4808 of the D.C.S. MSS., Vol. X.

Complete.

---

(*f*) तत्त्वसङ्ख्यानम्.

TATTVASAṄKHYĀNAM.

Fol. 56.

By Ānandatīrtha. Same work as that described under No. 4788 of the D.C.S. MSS., Vol. X.

Complete.

---

(*g*) तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

Foll. 57*a*—58*a*.

Same work as that described under No. 4785 of the D.C.S. MSS., Vol. X.

Complete.

(*h*) मायावादखण्डनम्.

MĀYĀVĀDAKHAṆḌANAM.

Foll. 58*a*—59*b*.

Same work as that described under No. 4835 of the D.C.S. MSS., Vol. X.

Complete.

---

R. No. **1449.**

Palm-leaf. 18 × 1¾ inches. Foll. 19. Lines, 5 in a page. Nandi-nāgarī. Slightly injured.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḷ of Rāmēśvaram.

अणुजयतीर्थविजयः—सव्याख्यः.

AṆUJAYATĪRTHAVIJAYAḤ WITH COMMENTARY.

Foll. 1*a*—18*b*.

Same text as that described under R.No. 1447(*a*) *ante*. The commentary is by Vēṅkaṭa, son of Mādhavācārya and disciple of Kṛṣṇavarya.

Complete.

**Beginning** of commentary :

वेदव्यासमहं वन्दे तत्त्वज्ञानार्थसेविनम् ।
नमामि श्रीमदानन्दान् जयार्यगुरुसेवितान् ॥
नमामि माधवाचार्यगुरूणां पादपङ्कजे ।
यैरहं पक्षिवत् सम्यक् शिक्षितोऽस्मि कृपालुभिः ॥
तान् वन्दे कृष्णवर्यांश्च सदा विद्यागुरून् मम ।
जयार्यविजयस्याहं कर्तुं व्याख्यामिहोद्यतः ॥

लोकानुग्रहकातराः(तत्पराः) श्रीमद्वेदव्यासस्वामिनः परममोक्षसाधन-भूततत्त्वज्ञानस्य श्रीसदाचार्यपरमानुग्रहपात्रभूतजयार्याणां प्रसादेन विना-नुदयात् तदर्थं तत्स्तोत्रं कर्तुकामास्सन्तः अविघ्नेन परिसमाप्त्यर्थं स्वेष्ट-

देवतानमनरूपमङ्गलं मनसि कृत्वा यस्य देवेति श्रुतेः श्रीमदाचार्याणां जयार्याणां च वन्दनं कृत्वा सन्निहिताशिष्याशिक्षार्थं ग्रन्थादावुपनिबध्नन्तः स्वचिकीर्षितप्रतिज्ञां कुर्वन्ति नत्वेति । वक्ष्ये इति उत्तमपुरुषप्रयोगादहमिति कर्ता लभ्यते । अहं श्रीमन्तश्च ते जयार्याश्च येषां सर्वसमृद्धिदं सर्वेषां भक्त्यादिसाधनानां समृद्धिं ददातीति तत् स्तोत्रं स्तुतिं वक्ष्ये वच्मीत्यर्थः ।

**End:**

श्रीकृष्णः प्रीतः सन्तुष्टो भूयात् भवतु समस्ताः गुरुगुरवः रुद्रादीनां गु . . . . . . . . . . . . . .

श्रीमदानन्दतीर्थाः समस्ता अपि अखिला अपि गुरवः प्रीतियुक्ताः प्रेम्णा युक्ताः भवन्त्विवति अशेषमतिमङ्गलम् ॥

**Colophon:**

इति श्रीमत्कविकुलतिलकश्रीमद्वेदव्यासस्वामिविरचिताणुविजय- . . . . . . . . . . . . . . . . . . . हृदये गोपमालावचननामिका ।

कृता वेङ्कटनाम्नासौ माधवाचार्यसूनुना ।

इति श्रीमत्पदवाक्यप्रमाणज्ञश्रीमन्माधवाचार्यसुतवेङ्कटनाथकृत- . . . . . . . . विजयटीका समाप्ता ॥

Fol. 19 contains a few stanzas of Nṛsiṁhastōtravyākhyāna.

---

## R. No. 1450.

Palm-leaf. 13⅜ × 1¼ inches. Foll. 47. Lines, 6 in a page. Nandināgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigal̤ of Rāmēśvaram.

(*a*) **कार्तिकमाहात्म्यम्.**

KĀRTIKAMĀHĀTMYAM.

Foll. 1*a*—39*a*. Fol. 39*b* contains a few stanzas of Kārikāvali.

Deals with the importance of the Kārtika month (October-November) and describes the manner as well as the efficacy of bathing and giving gifts, etc., during that month.

Complete; stated to be found in the fourteenth Adhyāya of the Bhārdvājasaṃhitā of the Pāñcarātrāgama.

**Beginning:**

कार्तिकस्य तु माहात्म्यं वद मे वदतां वर ।
कथं च कार्तिके मासि स्नानदानादिकाः क्रियाः ॥
कर्तव्याः किं फलं तस्य तत्सर्वं वद विस्तरात् ।
यदवश्यं च कर्तव्यं कार्तिके मासि सुव्रत ॥

श्रीहंसः—

साधु पृष्टं त्वया ब्रह्मन् लोकानुग्रहसिद्धये ।
कार्तिकस्य च मासस्य वक्ष्ये माहात्म्यमुत्तमम् ॥
कार्तिके मासि संप्राप्ते प्रातरुत्थाय चादृतः ।
अरुणोदयवेलायां शौचस्याचमनं तथा ॥
कृत्वा यथोक्तविधिना धृत्वा चैवोर्ध्वपुण्ड्रकम् ।
पश्चिमे जागरं कृत्वा स्नानं कुर्यात् बहिर्जले ॥

**End:**

ब्रह्मचारी भवेद्रात्रौ क्षितिशय्या भवेन्नरः ।
गृहस्थैश्च मिलित्वा तु स्वयं वा कारयेत् बुधः ॥
सर्वपापविमुक्त्यर्थं वनभोजनमुत्तमम् ।
कृत्वैव सर्वकार्याणि कृत्वा चैवं समर्पयेत् ॥
अश्वमेधसहस्रेषु वाजपेयशतेषु च ।
यत् फलं समवाप्नोति तत्फलं वनभोजनात् ॥

**Colophon :**

इति पाञ्चरात्रागमे भारद्वाजसंहितायां कार्तिकमाहात्म्ये भगवद्ब्रह्म-संवादे चतुर्दशोऽध्यायः ॥

---

(*b*) अणुजयतीर्थविजयः.

ANUJAYATĪRTHAVIJAYAḤ.

Foll. 40*a*—47*b*.

Same work as that described under R. No. 1447 (*a*) *ante*.

Complete.

---

R. No. **1451**.

Palm-leaf. 17 × 1 inches. Foll. 47. Lines, 5 in a page. Nandināgarī. Slightly injured.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigal of Rāmēśvaram.

(*a*) मणिमञ्जरीव्याख्यानम्.

MAṆIMAÑJARĪVYĀKHYĀNAM.

Foll. 1*a*—39*b*.

A commentary by Viṭṭhalācārya on the Maṇimañjarī of Nārāyaṇapaṇḍitācārya. Similar to the work described under R. No. 1083 *ante*.

Complete.

**Beginning :**

मणिमञ्जर्यास्सद्व्याख्यानं कर्तुकामः आदौ भगवन्तं प्रणमति । आनन्दज्ञानदेहम् । आनन्दश्च ज्ञानं च . . ते एव देहो यस्य तथा तम् । श्रियः पतिम् श्रियः लक्ष्म्याः पतिं भर्तारम् । श्रीमदानन्दतीर्थार्यवल्लभम् । श्रीरस्यास्तीति श्रीमान् । आनन्दसन्दायि सुशास्त्रकर्तृत्वादानन्दतीर्थः श्रीमांश्चासावानन्दतीर्थश्चेति श्रीमदानन्दतीर्थः स चासावाचार्यश्चेति तथा तस्य वल्लभं स्वामिनं परं सर्वोत्तमं चतुर्विधनाशरहितम् गोविन्दं वेदप्रतिपाद्यं श्रीनारायणम् । अहमित्यध्याहारः अहं वन्दे वदि अभिवादनस्तुत्योः लडात्मनेपदम् ।

**End:**

नारायणार्योद्भवः, त्रिविक्रमपण्डिताचार्यसूनुना नारायणपण्डिताचार्येण उद्भवो निर्माणं यस्य सः तथा मध्वविजयः। मध्वविजयाख्यकाव्यः व्यद्योतिष्ट बभौ वीत्युपसर्गः व्यद्योतिष्ट द्युतदीप्तौ कर्तरि लुङात्मनेपदि। वृत्तम्। नि— चरित्रे त्रिष्वतीते दृढनिश्चिते। खनिः स्त्रियामाकरे स्यात् अर्थोऽभिधेयो रैवस्तु- प्रयोजननिवृत्तिष्वित्यमरः। नराब्दभेदे स्त्रीनृत्ते ललितं त्रिषु सुन्दरे इति शब्दार्णवे।

श्रीमदानन्दतीर्थार्यहृदयाम्भोजमन्दिरः।
कमलाश्लेषरसिकः प्रीयतां नः परः पुमान्॥

**Colophon:**

इति श्रीमदानन्दभगवत्पादचरणनलिनसेव्योपजीविश्रीत्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायणपण्डिताचार्यविरचि[।]मणिमञ्जरीव्याख्याने विट्ठल- कृते अष्टमस्सर्गः॥

The scribe adds—

वर्षे विजयचैत्रे च पूर्वपक्षे चतुर्थके।
रामसेतौ च लिखितं प्रीत्यै माधवमध्वयोः॥

---

(*b*) **शिवस्तुतिव्याख्या.**

ŚIVASTUTIVYĀKHYĀ.

Foll. 40*a*—45*b*.

A commentary by Mahēśācārya on the Śivastuti, which is a eulogy on God Śiva: by Nārāyaṇapaṇḍitācārya, son of Trivikrama-paṇḍitācārya.

**Beginning:**

वन्दे लक्ष्मीनृसिंहस्य चरणाम्बुरुहद्वयम्।
(नाभी)कमलाशम्बु(सम्भूत)शर्वेन्द्रादिसुरार्चितम्॥

इह खलु श्रीमदानन्दतीर्थाचार्यस्य श्रीपादनलिने भृङ्गायमाणः दुर्वादि-

द्विरदकुम्भस्थलदलने सिंहायमानः लिकुचकुलतिलकः त्रिविक्रमपण्डिताचार्य-[सुधी]सूरिसुतः श्रीमन्नारायणपण्डिताचार्यवर्यः सज्जनाननुजिघृक्षुः श्रीमन्महा-रुद्रप्रसादमभीप्समानस्सन् इन्द्रादिसुरैः वन्दितपादारविन्दस्य पार्वतीपतेः स्तुतिं करोति स्फुटेति ।

स्फुटस्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकण्ठ ते वपुरवेक्षते चेक्षणम् ॥

**End:**

कुरुतादित्यनेन हेतुना न तु प्रयोजनान्तरोद्देशेन निमित्तेन प्रथिते मानसे प्रसिद्धबुद्धिर्लिकुचतिलकसूरिसूनुः लिकुचसूरिः त्रिविक्रमपण्डिता-चार्यः तस्य सूनुः नारायणभट्टाख्यः सुधीः विद्वान् इमां शुभां शिव-स्तुतिं शिवस्य श्रीमहादेवस्य स्तुतिं स्तोत्रम् व्यधित कृतवान् । इति प्रसिद्धः ॥

शिवस्तुतेरियं व्याख्या महेशाचार्यसूरिणा ।
तयोरनुग्रहे प्रीत्यै मया भक्त्या यथामति ॥

**Colophon:**

इति श्रीमत्कविकुलतिलक श्रीमत्त्रिविक्रमपण्डिताचार्यसुतश्रीमन्नारायण-पण्डिताचार्यविरचित[ा]शिवस्तुतिव्याख्या संपूर्णा ॥

---

(*c*) ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः.

BRAHMASŪTRĀDHIKARAṆASAṄKHYĀNIRṆAYA-SAṄGRAHAḤ.

Foll. 46*a*—47*a*. Fol. 47*b* is left blank.

Gives the number of Sūtras and Adhikaraṇas contained in each of the Pādas of the various Adhyāyas of the Brahmasūtra. By Ahōmaṭha, a disciple of Ahōbala and the son of the latter's elder brother.

Complete.

**Beginning:**

अहोबलार्यशिष्येण तदग्रजसुतेन च ।
अहोमठाभिधानेन सत्कृपाविषयेण च ॥

ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः ।
लोकसङ्केतितैर्वर्णैः क्रियते मतिशुद्धये ॥

बाणर्तुवेदसङ्ख्यानि ब्रह्मसूत्राणि वेदराट् ।
चकार चक्षुर्नेत्राक्षिसङ्ख्याधिकरणान्यपि ॥

**End:**

एतद्गतं चाधिकरणं वसुसङ्ख्यामचीक्लृपत् ॥
चतुर्थस्य द्वितीयाङ्घ्रिसूत्रं चक्षुर्विलोचनम् ।
तद्गतं चाधिकरणं विश्वेदेवोपमं स्मृतम् ।
चतुर्थस्य तृतीयाङ्घ्रिसूत्रं च स्वरसङ्ख्यकम् ।
तद्गतं चाधिकरणमृतुसङ्ख्यमुदाहृतम् ॥
चतुर्थस्य चतुर्थाङ्घ्रिसूत्रं लोचनवाह्निगम् ।
तद्गतं चाधिकरणं रुद्रसङ्ख्यं व्यधाद्धरिः ॥
इति सूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः ।
नित्यं पारायणार्थं च कृतस्समभिसिद्धये ॥

**Colophon:**

इति । श्लोकाः २४ ॥ इति श्रीचतुर्थाध्यायः समाप्तः ॥

---

R. No. **1452.**

Palm-leaf. $10\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 137. Lines, 8 in a page. Nandi-nāgarī. Good.

Purchased in 1914–15 from M.R.Ry. Śinnaṇṇā Śāstrigaḻ of Rāmēśvaram.

(*a*) केशवादिचतुर्विंशतिनामस्तोत्रम्.

KĒŚAVĀDICATURVIṀŚATINĀMASTŌTRAM.

Foll. 1*a*—3*a*.

Similar to the work described under No. 8922 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

केशवस्तु सुवर्णाभः संयुतश्च श्रिया सदा ।
शङ्खचक्रगदापद्मधरो ध्येयोऽखिलैर्जनैः ॥
नारायणः श्यामवर्णस्सदा लक्ष्म्या युतः प्रभुः ।
पद्मगदाचक्रशङ्खधरो ध्येयोऽखिलैर्जनैः ॥

**End:**

कृष्णो भिन्नाञ्जनप्रख्यः लक्षणाख्यप्रियायुतः ।
गदापद्मचक्रशङ्खधरो ध्येयोऽखिलैर्जनैः ॥

Fol. 3*b* contains a few lines of Hanumanmantradhyāna. Foll. 4*a* to 7*a* contain a few sentences of Ēkādaśīdvādaśī-nirṇayaprakāra of Vijayēndratīrtha. Fol. 7*b* is left blank. Foll. 8 and 9 contain a few lines of the Śāntipāṭha of Ānandatīrtha's Brahmasūtrabhāṣya. Fol. 10 contains a few stanzas of Kēśavādicaturviṁśatināmabhāryāvarṇanirūpaṇa and Daśāvatārabhāryāvarṇananirūpaṇa

---

(*b*) ब्रह्मसूत्राधिकरणसङ्ख्यानिर्णयसङ्ग्रहः.

BRAHMASŪTRĀDHIKARAṆASAṄKHYĀNIRṆAYA-SAṄGRAHAḤ.

Foll. 11*a*—12*b*.

Same work as that described under R. No. 1451(*c*) *ante*.

Complete.

Fol. 13 contains a few stanzas of Brahmasūtrādhikaraṇapāda-saṅkhyānirūpaṇa.

---

(*c*) ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Foll. 14*a*—133*b*.

Same work as that described under No. 4810 of the D.C.S. MSS., Vol. X, but the additional stanzas in the beginning are given below.

Complete.

**Beginning:**

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि तत्र सूत्रार्थ उच्यते ॥

द्वापरे सर्वत्र ज्ञान आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरार्चितो भगवान् नारायणो व्यासत्वेनावततार ॥

* * *

निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः ।
यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ॥

---

(*d*) **ग्रन्थमालिकास्तोत्रम्.**

GRANTHAMĀLIKĀSTŌTRAM.

Foll. 134*a*—135*a*.

Gives in verse the names of the thirty-seven works written by Madhvācārya or Ānandatīrtha.

Complete.

**Beginning** and **End:**

कृष्णं विद्यापतिं नत्वा पूर्णबोधार्यसद्गुरून् ।
ग्रन्थान् वक्ष्ये नन्दतीर्थमुखाम्बुजविनिस्सृतान् ॥
ग्रन्थान् मध्वश्चकारासौ सप्तत्रिंशदमन्दधीः ।
गीताभाष्यं चकारादौ प्रथमं तुष्टिदं हरेः ॥
भाष्याणुभाष्ये चक्रेऽथ अनुव्याख्यानमेव च ।
प्रमाणलक्षणं नाम कथालक्षणमेव च ॥
उपाधिखण्डनं चक्रे मायावादस्य खण्डनम् ।
चक्रे प्रपञ्चमिथ्यात्वमानखण्डनमत्र हि ॥
चकार तत्त्वसङ्ख्यानं साधनं विष्णुदर्शने ।
ग्रन्थं तत्त्वविवेकाख्यं तत्त्वोद्योतं हरेः प्रियम् ॥
कर्मनिर्णयनामानं ग्रन्थं न्यायार्थबृंहितम् ।

सुखतीर्थयतिश्चक्रे विष्णुतत्त्वाविनिर्णयम् ॥

ऋग्भाष्यं च चकारासौ सर्ववेदविनिर्णयम् ।
ऐतरेयं तैत्तिरीयं बृहदारण्यमेव च ॥

ईशावास्यं काठकं च छान्दोग्याथर्वणं तथा ।
माण्डूक्यं नाम षट्प्रश्नं तथा तलवकारकम् ॥

चक्रे भाष्याणि दिव्यानि दशोपनिषदां गुरुः ।
निर्णयं सर्वशास्त्राणां गीतातात्पर्यसङ्गतिम् ॥

सन्न्यायविवृतिं चक्रे पापशास्त्रार्थकृन्तनीम् ।
नरसिंहनखस्तोत्रं चक्रे यमकभारतम् ॥

द्वादशस्तोत्रमकरोत्कृष्णामृतमहार्णवम् ।
तन्त्रसारं चकारासौ सदाचारस्मृतिं सुधीः ॥

श्रीमद्भागवतस्यापि तात्पर्यं ज्ञानसाधनम् ।
महाभारततात्पर्यनिर्णयं संशयाच्छिदम् ॥

यतिप्रणवकल्पं च प्रणवार्थप्रकाशनम् ।
जयन्तीनिर्णयं चक्रे देवकीगर्भजन्मनः ॥

कृष्णस्य कृष्णभक्तोऽयं द्वैपायनकराब्जभूः ।
एतेषां पाठमात्रेण मध्वेशः प्रीयतां हरिः ॥

**Colophon:**

इति श्रीग्रन्थमालिकास्तोत्रं संपूर्णम् ॥

Fol. 135*b* is left blank. Foll. 136 and 137 contain some miscellaneous stanzas realating to the Mādhva religion.

R. No. **1453.**

Palm-leaf. 16½ × 1½ inches. Foll. 202. Lines, 8 in a page. Grantha and Tamil. Much injured.

Presented in 1914–15 from M.R.Ry. S. Kṛṣṇamācāryar of Triplicane.

Fol 1 contains a few lines of Pūrvācāryastōtras.

(*a*) **श्रीमुष्णनाथप्रार्थनाषोडशी.**

ŚRĪMUṢṆANĀTHAPRĀRTHANĀṢŌḌAŚĪ.

Foll. 2*a*—3*a*.

Same work as that described under No. 10538 of the D.C.S. MSS., Vol. XVIII.

Incomplete.

Foll. 3*b*—5*b* contain the Bhōgirājaviṁśati, which is found included in the works attributed to Vēṅkaṭēśa. As the leaves are fragmentary no extracts are given.

---

(*b*) **भक्तवैभवदीपिका.**

BHAKTAVAIBHAVADĪPIKĀ.

Foll. 6*a*—9*b*.

This is a treatise giving details of the month, the year and the moon's position in the several constellations, etc., in regard to the time of birth of the several Āḻvārs: by Vēṅkaṭēśa, son of Vādibhīkṛt.

Complete.

**Beginning :**

. . . . . . . . . . . . परवादिभयङ्करम् ।
यत्कटाक्षलवः पुंसामलं सर्वार्थसिद्धये ॥
अस्मदाचार्यतत्तुल्य . . . . . . . ।
. . . . . . . . . प्रोक्तानपि वदाम्यहम् ॥
सरोमुनिर्भूतमुनिर्महदाह्वययोगिराट् ।
भक्तिसारः शठारातिः कुलशेखरसंयमी ॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
भट्टनाथ (भक्ताङ्घ्रि)रेणुश्च मुनिवाहन . . . . ॥
. . . . . . मुनिरित्येते क्रमेणोक्तेन जज्ञिरे ।
जन्ममासान्तथैतेषां तारकाश्च ब्रवीम्यहम् ॥

**End:**

मङ्गलं श्रीनिवासाय तद्विभूत्योश्च मङ्गलम् ॥
वादिभीकृत्सुतेनेयं वेङ्कटेशेन निर्मिता ।
उररीक्रियतां सद्भिः भक्तवैभवदीपिका ॥

---

(*c*) शारीरकप्रदीपिका.

ŚĀRĪRAKAPRADĪPIKĀ.

Foll. 10*a*—20*b*.

A eulogy on Viṣṇu worshipped under the name of Bhūvarāha in the sacred shrine at Śrīmuṣṇam. The meaning conveyed by the various Adhikaraṇas of the Brahmasūtras are incidentally explained in order in this eulogy. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya of Śrīvatsagōtra. In the beginning the author salutes his father, Varayōgin, Vēdāntācārya, under whom, he says, he studied the Brahmasūtras, and Yatirāja.

Complete.

**Beginning:**

वन्दे वत्सान्वयाकल्पं वादिभीतिकरं गुरुम् ।
वरणीयगुणावासं वरयोगिनमाश्रये ॥
भजामि वेदशीर्षार्थं भजतामभयप्रदम् ।
शारीरकान्वयो यस्य प्रसादेन ममाप्यभूत् ॥
भवसागरसन्तारो भविनां सुलभो भवेत् ।
भाष्यपोतेन यस्याहं भजे तं यतिभूभृतम् ॥
सूत्राधिकारचरणलक्षणैर्भाष्यकल्पकम् ।
दलसूनोपविटपशाखाढ्यं फलदं भजे ॥

योगाधिकारविषयश्रुत्यर्थालोचनात्मकम् ।
शारीरकप्रदीपाख्यं स्तोत्रमाकलयाम्यहम् ॥

श्रीमुष्णनिलयः श्रीमानादिपोत्री जगत्पतिः ।
शारीरकप्रदीपेन स्तूयते शक्तितो मया ॥

नापि शक्यं परं स्तोतुं शारीरकविनिर्णयः ।
इति चेन्न यतीशाय कृपया शकनं भवेत् ॥

पूर्वोत्तरात्मकैर्वेदैर्वेद्याय व्यवधानकः ।
साक्षाच्च कर्माराध्याय वराहाय नमो नमः ॥

* * * *

जिज्ञास्यब्रह्मणे सिद्धे व्युत्पन्नैर्वाक्यसंचयैः ।
वेदान्तगैर्बोधिताय जगज्जन्मादिहेतवे ॥

जननं जीवनं यस्मात् लयो मुक्तिश्च जायते ।
जगतः प्रतिपन्नाय तन्निदानत्वलक्षणात् ॥

अनन्यमानसिद्धाय नमस्ताच्छास्त्रयोनये ।
अभिधेयतया सम्यगन्विताय फलत्वतः ॥

**End:**

मुक्तैश्वर्यं यदायत्तं यदि तद्ब्रह्मस्य पोत्रिणः ।
स्वतन्त्रत्वेन सङ्कल्पात् तस्यावृत्तिः पुनर्भवेत् ॥

इति चेदुत्तरं तत्रानावृत्तिरिति सूत्रतः ।
दीयते हि यथा हेयप्रत्यनीकः परः पुमान् ॥

जगज्जन्मस्थितिध्वंसकारणं मङ्गलास्पदम् ।
सर्वज्ञस्सत्यसङ्कल्पः श्रितवात्सल्यवारिधिः ॥
समस्तवस्तुव्यावृत्तः परकारुण्यसिन्धुराट् ।

निस्समाभ्यधिकोऽस्तीति शब्दादेवावगम्यते ॥
तथोपासनधीप्रीतोऽनाद्यविद्यां निवर्त्य च ।
कर्मरूपामुपासीनां निजानुभवजां मुदम् ॥
प्रापय्य नावर्तयति पुनरित्यपिशब्दतः ।
निश्चीयते हि शब्दश्च स खल्वित्यादिकस्तथा ॥
मामुपेत्य पुनर्जन्मेत्यादिनाभिहितं स्वयम् ।
येन कृष्णस्वरूपेण नापि व्युच्छिन्नकर्मणः ॥
असङ्कुचितसंवित्तेर्यत्प्रियस्यान्यवाञ्छया ।
ब्रह्मानुभवतोऽनन्तातिशयानन्दमादरात् ॥
पुनरावृत्तिशङ्का स्यान्न परः पुरुषोऽप्यमुम् ।
सत्यसङ्कल्पिनोऽत्यर्थप्रियमावर्तयिष्यति ॥
कदाचित् ज्ञानिनं लब्ध्वा यः प्राहैवं वचः शुभम् ।
प्रियो हि ज्ञानिनोऽत्यर्थं स महात्मा सुदुर्लभः ॥
इत्याद्यन्तमतस्सर्वं समञ्जसमितीरितम् ।
भाष्ये शारीरकार्थानां दर्पणे यतिभूभृता ॥
स मुष्णनगरीशानो वराहो वसुधाधरः ।
जगन्ति रक्षन् सर्वाणि भासता शाश्वतीस्समाः ॥
मुष्णे वराहं धवलं मुष्णन्तं पापसञ्चयान् ।
पुष्णंश्च मङ्गलं पुंसां पश्येम शरदश्शतम् ॥

* * * *

मङ्गलं मुष्णनाथाय मङ्गलं कमलाभृते ।
मङ्गलं धवलायादिवराहायास्तु मङ्गलम् ॥
वेङ्कटेशेन वादीन्द्रभीकृद्देशिकसूनुना ।
शारीरकप्रदीपोऽयं रचितस्सद्भिरीक्ष्यताम् ॥

(*d*) अञ्जनशैलनाथस्तोत्रम्.

AÑJANAŚAILANĀTHASTŌTRAM.

Fol. 21.

By Prativādibhayaṅkara. Same work as that described under No. 9819 of the D.C.S. MSS., Vol. XVIII, but the additional stanzas found in the beginning and end respectively are given below.

**Beginning:**

वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयङ्करार्यम् ॥

**End:**

वादिभीतिकरार्येण रचिता भावबन्धनैः ।
शोभते वेङ्कटाद्रीशविषया स्तुतिरद्भुता ॥

---

(*e*) वेङ्कटेशस्तोत्रम्.

VĒṄKAṬĒŚASTŌTRAM.

Foll. 21*b*—22*a*.

A eulogy on God Vēṅkaṭēśa, a form of Viṣṇu, worshipped in the sacred hills at Tirupati: by Prativādibhayaṅkarārya, who mentions Saumyajāmātṛmuni.

Complete.

**Beginning:**

सेवे वेङ्कटनाथं सेव्यगुणाधारम् ।
देवेशं दनुजरिपुं देवशिरोरत्नम् ॥
प्राचीनं परमधनं प्रणिपतता लभ्यम् ।
प्राचीने वचसि परं ब्रह्म समाम्नातम् ॥
प्राचीनाचार्यवरैः प्राप्यजयावगतम् ।
वीचीनाममृतभुवां विजयपरालोकम् ॥
कारुण्यामृतजलधिं कमपि महापुरुषम् ।

**End:**

वन्दारुत्रिदशवरावनतशिरो(यु)क्तं
मन्दारद्रुमकुसुमैर्महितपदाम्भोजम् ।

सौन्दर्यामृतसरिता सकलदृशां सुखदं
सुन्दरजामातृमुनेश्शुभतरमन्दारम् ॥
वादिभीतिकराचार्यरचितं वेङ्कटेशितुः ।
स्तोत्रं पठति यस्तस्य नित्यं तत्सेवनं भवेत् ॥

---

(*f*) वेङ्कटेशविजयस्तोत्रम्.

VEṄKAṬEŚAVIJAYASTOTRAM.

Foll. 22*a*—23*a*.

Similar to the above; each stanza ends with the expression **विजयी भव,** the meaning of which is 'may you be victorious.' By the same author as that of the last.

Complete.

**Beginning:**

दैवतदैवत मङ्गल (मङ्गल) पावनपावन कारणकारण ।
वेङ्कटभूधरमौलिविभूषण माधव भूधव देव जयी भव ॥
वारि . . . . . . दयाकर शारदनीरजचारुविलोचन ।
देवशिरोमणिपादसरोरुह वेङ्कटशैलपते विजयी भव ॥

**End:**

काननवानरवीरवनेचरकुञ्जरसिंहमृगादिषु वत्सल ।
सूरिनिरस्तभवादर वेङ्कटशैलपते विजयी भव ॥
वादिसाध्वसकृत्सूरिकथितं स्तवनं महत् ।
वृषशैलपतेः श्रेयस्कामो नित्यं पठेत्सुधीः ॥

---

(*g*) वृषाद्रिनाथसप्तविभक्तिः.

VṚṢĀDRINĀTHASAPTAVIBHAKTIḤ.

Fol. 23.

Similar to the above. The stanzas are composed in the Āryā metre. By the same author as that of the last.

The name and attributes of God Vēṅkaṭēśa are used in the seven declensional cases in order in the seven stanzas of this work.

Complete.

**Beginning:**

श्रीवेङ्कटाद्रिधामा भूमा भूमाप्रियः कृपासीमा ।
निरवधिकनित्यमहिमा भवतु जयी प्रणतदर्शितप्रेमा ॥

ज . . . . जनविमलीकृतिसफलीकृतसकलमङ्गलाकार ।
विजयी भव विजयी भव विजयी भव वेङ्कटाचलाधीश ॥

**End:**

लक्ष्मीललितपदाम्बुजलाक्षारसरञ्जितायतोरस्क(स्के) ।
श्रीवेङ्कटाद्रिनाथे नाथे मम नित्यमर्पितो भारः ॥

आर्यावृत्तसमेता सप्तविभक्तिर्वृषाद्रिनाथस्य ।
वादीन्द्रभीकृदाख्यैरार्यै रचिता जयत्वियं सततम् ॥

---

(*h*) वृषाद्रिनाथस्तोत्रम्.

VṚṢĀDRINĀTHASTŌTRM.

Foll. 23*b*—24*a*.

Same work as that described under No. 10389 of the D.C.S. MSS., Vol. XVIII. The author's name is given to be Paravādibhayaṅkarārya in the additional stanzas found at the end and extracted below.

Complete.

**End:**

सुमुखं सुखदं सुलभं सुहृदं सुजनं च सुजायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं न कथञ्चन (कंचन) जातु भजे ॥

रचितं गुरुणा परवादिभयंकरनामभृता स्तवनं महितम् ।
वृषशैलपतेस्सततं पठतः करपद्मगता परमुक्तिरहो ॥

---

(*i*) फणीन्द्रगिरिस्तोत्रम्.

PHAṆĪNDRAGIRISTŌTRAM.

Fol. 24.

Similar to the above. By the same author as that of the last. It is stated herein that he who learns this eulogy becomes skilled in poetics.

Complete

**Beginning:**

अस्ति श्रीमानवनितिलको वेङ्कटो नाम शैलः
भूयानेको भुवि परिणतः पुण्यराशिः प्रजानाम् ।
सारोद्धारस्सकल . . . . . स्थापितः क्वापि धात्रा
यस्मिन् साक्षात्परमपुरुषो दीव्यति श्रीसखायः ॥
सौवर्णात्मा मरकतमयैर्वज्रवैडूर्यरूपैः
नीलोत्की(र्ण)स्फटिकघटितैः पद्मरागप्रणीतैः ।
नानारत्नाकृतिभिरखिलैस्सानुभिस्संभृतश्रीः
सर्वैस्सोऽयं सुरगिरिरिति प्रत्यभिज्ञायते यः ॥

**End:**

क्रूरास्सिंहाः कुपितशरभाः कुञ्जरेन्द्रा मदान्धाः
घोरा व्याघ्राः कटुककिटयो भीमभल्लूकसङ्घाः ।
सर्वे चान्ये सहजरिपवो जन्तवो यत्र वा(सात्)
संगाहन्ते प्रशमितरुषस्स्वैरमेकोदपाने ॥
श्रीमद्वादिप्रवरभयकृद्देशिकोक्तं फणीन्द्र-
क्ष्माभृत्स्तोत्रं भुवनमहितं शब्दतोऽर्थाच्च साधु ।
श्रुत्वा श्री . . . . . . काव्यनाट्यादिदक्षा
नैतत्तुल्यं भवति भवति स्मापि यावद्धरिव्याम् ।—

---

(*i*) लक्ष्मीस्तोत्रम्.

LAKṢMĪSTŌTRAM.

Foll. 24*b*—31*b*.

A eulogy on the goddess Lakṣmī conceived as the consort of God Śrīnivāsa. The author speaks of Saumyajāmātṛmuni as a Guru.

Complete.

**Beginning:**

श्रियं श्रीवेङ्कटेशस्य श्रीनिवासस्य वल्लभाम् ।
ईश्वरीं सर्वभूतानामाश्रये विश्वमातरम् ॥
विष्णोर्विचित्रचिदचिन्मिश्रविश्वविधिश्रमः ।
सफलस्सकृदालोकाद्यस्यास्तस्यै नमः श्रियै ॥

**End:**

सौम्योपयन्तृमुनिमात्मविदं समीक्ष्य
मातः प्रसीद मम वृत्तमचिन्तयित्वा ॥
देव्या मदीयरसनाध(थे)नया श्रियैव
स्वप्रीतये स्तुतिमिमामुदितां गृणन्तः ।
भुक्त्वा समृद्धिमिह सद्भिरनन्यभोगै-
रन्ते च सूरिपारिषत्प्रथमा भवन्ति ॥

---

(*k*) पराङ्कुशपञ्चविंशतिः.

PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 32*a*—33*a*.

By Varadadēśika, a disciple of Vēṅkaṭapati, son of Varadārya of Vādhūla family. Same work as that described under R. No. 173(*m*) *ante*.

Complete.

The last stanza runs as follows :—

वाधूलवेङ्कटपतिं वरदार्यसूनुमस्मद्गुरुं तव पदप्रवणं समीक्ष्य ।
अज्ञं कृतागसमनाथमकिञ्चनं मां त्वत्किङ्करं शठरिपो सततं कुरुष्व ॥

Fol. 33 contains four Citra and Bandha stanzas, the first two relating to the story of Kṛṣṇa and the last two eulogizing the holy sandals of God Raṅganātha (probably taken from the Pādukāsahasra of Vēdān[illegible]śika).

(*l*) श्रीवचनभूषणसारः.

ŚRĪVAGANABHŪṢAṆASĀRAḤ.

Foll. 34*a*—48*a*.

This work purports to give the substance of the Śrīvacanabhūṣaṇa of Piḻḻailōkācārya. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Wants beginning.

**Beginning:**

. . . . . नवेत्यपि काचिद्योजनास्ति। तत्प्रतिपादिका काचन गाथा च श्रीवचनभूषणानुसन्धानारम्भात् पूर्वमनुसन्धीयमाना द्रष्टव्या। ननु कोंडीकारेण षडेवार्था इत्युक्तम्। इतरौ(रे)सर्वेऽपि एतदुपयुक्ता इत्यप्युक्तम्। पृथक् पृथगुपादाने अशेषाणामर्थानामुपादानं कर्तव्यम्। तद्विनोक्तार्थेभ्यः पुनरप्यर्थत्रयमादाय नवार्था इति काचन योजना कथमिति चेत्। समीचीनोऽसि.

* * * *

अनभिज्ञो भवान् वरवरमुनिवैभवस्य। वरवरमुनिस्तावत् लोकाचार्यशिष्यसौम्यजामातृगुरोः जामातुः दीप्रशयानादवततार। लोकाचार्यान्तेवासिनं कूरकुलोत्तमदासशिक्षितस्वरूपं श्रीशैलनाथदेशिकं समाश्रयते स्म। दीप्रशयानसौम्यवरावपि एतस्यार्थविशेषपरिज्ञापनोपकारकौ।

**End:**

तस्माच्चरमपर्वनिष्ठो मुमुक्षुः यावच्छरीरपातं दिव्यदेशेष्वेव वसन् श्रीवचनभूषणार्थविश्वासशाली तदुक्तानुष्ठानतत्परो भगवत्प्राप्तौ निस्संशयो निर्भरो निर्भयस्सुखमासीत।

वेङ्कटेशेन वादीन्द्रभयकृत्सूनुना कृता।
श्री(वाग्)भूष(ण)सारोऽ(यं सन्तनोतु सतां) मुदम्॥

(*m*) भगवदाराधनक्रमकारिका.

BHAGAVADĀRĀDHANAKRAMAKĀRIKĀ.

Foll. 48*b*—50*b*.

Similar to the work described under No. 8659 of the D.C.S. MSS., Vol. XVI. By Vēṅkaṭēśa, son of Prativādibhayaṅkara. The author says he has given in verse what has been laid down by Maṇavālamāmuni regarding the conduct of worship of the divine images.

Complete.

**Beginning:**

उषस्युत्थाय दन्तानां धावनं स्नपनं ततः ।
नित्यानि सर्वकर्माणि कृत्वा पादकरावपि ॥
प्रक्षाल्याचम्य पुण्ड्रांश्च धृत्वा द्वादश सन्निधिम् ।
गत्वार्यपङ्क्तिं मन्त्रेशद्वयमप्यन्ततोऽन्तिमम् ॥
अनुसन्धाय लक्ष्मीशं नत्वा प्राबोधकं वचः ।
गोदोक्तिं चानुसन्धाय गीते वर्षादिके ततः ॥
अररोद्घाटनं कृत्वा पुरस्कृत्य स्वदेशिकम् ।
हरिं प्रणम्य शेषं च सूक्तैर्मङ्गलरूपिणीम् ॥

**End:**

पुरस्कृत्य हरिं नत्वा नित्यश्रीर्व्याहरान्निति ।
भूयो मङ्गलसूक्तेन मङ्गलाशासनं चरेत् ॥
श्रीरम्यवरयोगीन्द्रप्रोक्तमाराधनक्रमम् ।
अकरोच्छ्लोकरूपेण वादिभीतिकरात्मजः ॥

---

(*n*) वेदान्तदेशिकशतकम्.

VĒDĀNTADĒŚIKAŚATAKAM.

Foll. 50*b*—56*a*.

A centum of stanzas in praise of Vēdāntadēśika: by Vēṅkaṭēśa, son and disciple of Prativādibhayaṅkara. The date in the cyclic era is given in regard to the completion of this work.

Complete.

**Beginning:**

श्रीमद्वेणुक्वणनजनितानन्दगोपाम्बुजाक्षी-
दृंक्पीताङ्गच्छवितरुणतासौकुमार्याङ्घ्रिपूरम् ।
आगच्छन्तं हृदि कलयते यत्र संपूर्य वीथीं
जीयान्नित्यं भुवनविदितो वेदचूडार्यवर्यः ॥

श्रियं सवित्रीं जगतो मुरारेः प्रियां प्रणम्यावनबद्धदीक्षाम् ।
प्रपद्य धन्यं शरणं शरण्यां वेदान्तसूरिं शरणं प्रपद्ये ॥

**End:**

वेदान्तसूरिशतकं विविधैर्हि वृत्तैः
चित्रं च तस्य गुरुपङ्क्तिषु भक्तिवृद्धिम् ।
चर्यां दिनेऽपि वपुषोऽपि विलक्षणत्वं
सम्यक् प्रकाशयदिदं धरणौ समिन्धे ॥
श्रीवेङ्कटेशकविना परवादिभीक-
दासेन वेदशिखरार्यवरप्रबन्धम् ।
उक्तं पठन्ति भुवि ये सकलं शुभन्तत्
हस्तस्थितं तदनु मुक्तिरपीदृशी स्यात् ॥

**Colophon:**

शुभकृति शशिवारे वत्सरेऽर्के सुकन्ये
धवलिमयुजि पक्षे पर्वतः पूर्वतिथ्याम् ।
शतकमुदितमेतद्वेङ्कटेशेन तुष्ट्यै
निगमशिखरसूरेः पूरणं प्रापदर्थ्यम् ॥

---

(*o*) वरवरमुनिविंशतिः.

VARAVARAMUNIVIMŚATIḤ.

Foll. 56*a*—57*b*.

Twenty stanzas in praise of Varavaramuni or **Kāntōpayantṛ**-muni, also well-known as Maṇavāḷamāmuni. The Śrī-Vaiṣṇava

religious teachers who are said to have been worshipped by Maṇavāḷamāmuni are given in the beginning. By a disciple of Prativādibhayaṅkara.

**Beginning:**

श्रीशाम्बुजाहरिचमूपतिकारिसूनुनाथाब्जलोचनरघूत्तमयामुनार्यान् ।
यस्सेवते तमखिलाश्रितपारिजातं वन्देय कान्तवरयोगिवरं महान्तम् ॥
पूर्णार्यलक्ष्मणमुनीश्वरकूरनाथगोविन्दभट्टगुरुवेदशिरोमुनीन्द्रान् ।
नित्यं भजन् भुवनदेशिकमप्युदग्रं कान्तोपयन्तृमुनिरस्तु गतिस्स्वयं नः॥

**End:**

दासेन वादिभयकृद्गुरुपुङ्गवस्य प्रोक्तां मनोज्ञवरयोगिधुरन्धरस्य ।
यो विंशतिं कलयते मुनिरेष तस्मै दद्यात् स्वरूपसदृशीमखिलां समृद्धिम्॥

---

(*p*) पराङ्कुशस्तोत्रम्.

PARĀṄKUŚASTŌTRAM.

Foll. 57*b*—58*b*.

A eulogy on Parāṅkuśa or Saint Śaṭhakōpa, well-known as Nammāḻvār.

Complete.

**Beginning:**

त्रय्यन्तदेशिकवरप्रदलक्ष्मणार्यवानाद्रियोगिवरयोगिवरान् प्रपद्ये ।
श्रीशैलनाथसुरनायककौलपद्मनाभार्यमाधवगुरून् सह कृष्णयुग्मान् ॥
लोकार्यवेदशिखराह्वमुनीन्द्रभट्टगोविन्दकूरकुरुकेश्वरयोगिराजान् ।
मालाधरार्यगुरुपुङ्गवयामुनार्यरामाम्बुजाक्षगुरुनाथशठाद्विषोऽपि ॥

**End:**

विमलात्मचित्तकमलावनीश्वरः शरणाक्षि(र्थि)नां च तरणाय संसृतेः ।
घटतां शठारिरटतां भवाम्बुधौ पुरवैरिरक्षमुरवैरिसक्तधीः ॥
स विधाय सत्सु महसा पराङ्कुशं कुरुतादुदारगरुताहिविद्विषा ।
स्थितवप्रधाम्नि मतवज्जनेडितो विनतान् निरस्तघनतापसंसृतीन् ॥

सनकादिसेव्यघनकान्तिविग्रहे परभक्तिरीशशरभाच्छिदि प्रभौ ।
द्विरदेश्वरासु(शु) वरदे पराङ्कुशं करुणागुणादिवरुणालयोऽवतात् ॥

(q) रामानुजनक्षत्रमाला.

RĀMĀNUJANAKṢATRAMĀLĀ.

Foll. 58b—60a.

Stanzas in praise of Rāmānuja: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. The eulogy proper consists of twenty-seven stanzas containing respectively the names of the twenty seven Nakṣatras or constellations in order.

Complete.

**Beginning:**

आनन्दहेतुं विश्वस्य ज्ञानज्योत्स्नं कलाश्रयम् ।
अलङ्करोमि योगीन्द्रचन्द्रं नक्षत्रमालया ॥
श्रीमान् रामानुजो जीयाद्यत्पादद्रविणोन्नताः ।
तिरस्कुर्वन्ति हर्यश्विनीरजागारसम्पदम् ॥

**End:**

अधःकृताप्यधीरेव तीव्रबुद्धिमतामपि ।
कुमतीनां ततिर्येन यतीशं नौमि सश्रियम् ॥
चेतो रामानुजं भजेति वा—
वाचिकं मम कैङ्कर्यं तारामालाभिधायि(यु)तम् ।
प्रतिगृह्णातु कृपया लक्ष्मणार्यो यतीश्वरः ॥
वादिभीकरपुत्रस्य वेङ्कटेशकवेरियम् ।
कृतिर्नक्षत्रमालेति श्रुतो विजयतेतराम् ॥

(r) द्राविडाम्नायशतकम्.

DRĀVIḌĀMNĀYAŚATAKAM.

Foll. 60a—63b.

This is a summary in 100 stanzas of the Tamil work called Tiruvāymoḻi of Saint Śaṭhakōpa or Nammāḻvār who is also spoken of eulogistically in them. The Tamil work contains 1,102 stanzas divided into 10 sections called Pattus each of which is further sub-divided into sub-sections called Tiruvāymoḻis, each containing almost invariably 11 stanzas. The Sanskrit work summarizes one sub-section in one stanza and begins it with the same letter as the first letter of the Tamil sub-section. Further, each of the 100 stanzas ends with the same letter as the first letter of the next stanza. By Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning :**

द्राविडाम्नायदशकाद्यक्षरप्रतिमादिकैः ।
पद्यैः स्तौति शठारातिं तत्तात्पर्यप्रकाशकैः ॥

उत्तारकस्य जन्यब्धेः परत्वस्थापनाद्धरेः ।
चरणौ शरणं यामः शठारेर्विमलच्छवी ॥

वीतसङ्गास्तु सर्वत्र भजतेति जनान् प्रति ।
नारायणं शठारातिर्जगाद परमं तपः ॥

परभक्तिमतः श्रीशः सुलभोऽवददित्यपि ।

* * * *

ऐश्वर्यमस्थिरं यस्माद्भिक्षवो वसुधाधिपाः ।
पावनः कारिभूरैच्छत् द्योतितं चरितं हरेः ॥

**End :**

वदन्तं कारिजं तत्र वासं मुक्तैश्च नौम्यमुम् ।
मुनिः परमया भक्त्या विधिशम्भुतनुं हरिम् ।
स्वस्मादभिनिवेशाढ्यं प्रापच्छठरिपुं गुरुम् ॥
द्राविडाम्नायशतकं योऽधीते भक्तिमान् सदा ।
तस्मिन् कृपा शठारातेः पूर्णा स्याद्भव्यदायिनी ॥

वादिभीकृत्सुतेनोक्तं वेङ्कटेशविपश्चिता ।
द्राविडाम्नायशतकमङ्गीकुर्वन्तु सज्जनाः ॥

**Colophon:**

द्राविडाम्नायशतकं समाप्तम् ॥

---

(8) कलिजित्पञ्चविंशतिस्तोत्रम्.

KALIJITPAÑCAVIMŚATISTŌTRAM.

Foll. 64*a*—66*a*.

Twenty-five stanzas in praise of Parakāla, also called Kaliripu or Tirumaṅgai Āḻvār: by Vēṅkaṭēśa, son of Vādibhītikarācārya.

Complete.

**Beginning:**

श्रीरङ्गराजकरुणासमवाप्तमूलमन्त्रं तदङ्घ्रिकमलद्वयसक्तचित्तम् ।
रङ्गस्थलोपवनभूम्यखिलस्थलेशगानप्रवीणमनिशं परकालमीडे ॥

श्रीरङ्गदिव्यनगरे जितबाह्यबौद्धजैनादिहेममणिबिम्बगणान् विधातुम् ।
यो वैदिकानिव जनाश्रयवप्रपाकशालादि नौमि विदधे तमहं कलिघ्नम् ॥

**End:**

विज्ञापन कलिरिपो यदिद मदीयं तत्स्वीकुरुष्व नतवत्सलताम्बुराशे ।
वादीन्द्रभीकरगुरुं भवदङ्घ्रिभक्तं वीक्ष्य प्रसीद मम वृत्तमचिन्तयित्वा ॥

**Colophon:**

वादिभीतिकराचार्यतनयेनोररीक्रियात् ।
वेङ्कटेशेन रचितां कलिजित्पञ्चविंशतिम् ॥

Fol. 66*a* contains four stanzas giving the number of the section and of the stanzas in the Tiruvāymoḻi referring to Tulasī. Foll. 66*b* and 67*a* give the following list of works attributed apparently to Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. Against the names are given the references to the number under which they are described in this Cataolgue or to the folio number in this MS. where they are found.

1. प्रार्थनाविंशतिः (षोडशी) R. No. 1453(*a*)
2. भोगिराजविंशतिः Foll. ?*b*—5*b*
3. शारीरकप्रदीपिका R. No. 1453(*c*)
4. भक्तवैभवदीपिका ,, (*b*)
5. मुकुन्दमालाव्याख्या.
6. श्रीवचनभूषणसारः ,, (*l*)
7. आराधनक्रमः ,, (*m*)
8. वेदान्ताचार्यशतकम् ,, (*n*)
9. वरवरमुनिविंशतिः ,, (*o*)
10. ஈட்டு குருபரம்பரை. Foll. 82*a*—84*a*.
11. नक्षत्रमाला R. No. 1453(*q*)
12. द्राविडाम्नायशतकम् ,, (*r*)
13. अभिनवसारसंग्रहः ,, (*o*-1)
14. वरदराजाष्टकव्याख्या ,, (*t*-1)
15. परकालपञ्चविंशतिः ,, (*s*)
16. திருநாகைமங்களாசாஸநம் R. No. 1453(*t*)
17. मङ्गलगिरिप्रपत्तिः ,, (*k*-1)
18. मङ्गलगिरिमङ्गलाशासनम् R. No. 1453(*u*)
19. मन्नार्प्रपत्तिः ,, (*w*)
20. मन्नार्मङ्गलाशासनम् ,, (*v*)
21. திருநீர்நாயப்ரபத்தி ,, (*y*)
22. திருநீர்நாயமங்களாசாஸநம். R. No. 1453(*x*)
23. கோமளவல்லியார் ப்ரபத்தி:. R. No. 1453(*z*)
24. கோமளவல்லியார் மங்களாசாஸநம். R. No. 1453(*a*-1)
25. திருநாகை வஜ்ஹன் ப்ரபத்தி:.
26. திருநாகை வஜ்ஹன் மங்களாசாஸநம். R. No. 1453(*d*-1)
27. श्रीमुष्णप्रपत्तिः.
28. श्रीमुष्णमङ्गलाशासनम्.
29. चूर्णिका; (திருப்பள்ளி) எழுச்சி. (*b*-1)
30. திருநாகூர் மங்களாசாஸநம். R. No. 1453(*n*-1)
31. पुरुषोत्तमप्रपत्तिः.
32. पुरुषोत्तममङ्गलाशासनम्.
33. यामुनाचार्यपञ्चविंशतिः R. No 1453(*e*-1)
34. शठारिस्तवः ,, (*f*-1)
35. रामसंबोधनस्तोत्रम् ,, (*g*-1)
36. परकालशतकम् ,, (*l*-1)
37. नागपुरशतकम् ,, (*j*-1)
38. वत्सरावलि ,, (*m*-1)
39. अङ्गाङ्गिभावसमर्थनम्.
40. சம்பமாக ஸ்வப்ராஸ்வப்ராகம்.
41. ஆழ்வான் ஸத்துவிஷக்தி:. R. No. 1453(*p*-1)

42. भुजङ्गप्रयातस्तुतिः
R. No. 1453(*q*-1)

43. வண்ணனருப்பதம்.

44. प्रमेयशेखरम् R.No.1453(*s*-1)

45. पादुकासहस्रश्लोकव्याख्या
Fol. 94.

46. गुरुपरम्पराविषयमकम्.

47. चतुरक्षरीश्लोकाः.

48. भक्तनाथमङ्गलाशासनम्
R. No 1453(*u*-1)

49. भक्तामृतरामचरितामृतमैत्री
R. No. 1453(*v*-1)

50. नागपुरीगुणप्रकाशः ,, (*c*-1)

51. दुष्टशिक्षा ,, (*w*-1)

52. यतिपतिश्लोकव्याख्या ,, (*z*-1)

53. अर्धभ्रमकश्लोकाः.

54. सर्वतोभद्रश्लोकाः
Foll. 174*b*—176*a*.

55. दशावतारस्तोत्रम्
R. No. 1453(*a*-2)

56. अष्टोत्तरशतस्थान(महिम)स्तुतिः.

57. செல்வப்பிள்ளை திருமஞ்சனஷோகவர்ணநம்.

58. यादवगिरिस्थनृसिंहमङ्गलम्.

59. செல்வப்பிள்ளை மங்களாஸாஸநம்.
R. No. 1453(*c*-2)

60. यतिराजस्तवः.

61. ஸம்ஸ்க்ருத நூற்றந்தாதி.

62 चतुर्गतिप्रकारचिन्तनम्.

63. திருவிடவெந்தை மங்களாஸாஸநம்.

64. संस्कृततत्त्वत्रयम्.

65. ब्रह्मविदन्तिमकालकृत्यप्रक्रिया.

66. பெரியாழ்வார் மங்களாஸாஸநம்.

Fol. 67*b* contains four Bandha stanzas apparently from Pādukāsahasra, one of which is also commented upon. Fol. 68*a* contains some Stōtras of Vēdāntadēśika and God Sampatkumāra. Fol. 68*b* contains a few stanzas of Varavaramunyudbōdhana composed by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

---

## (*t*) नागपुरीशमङ्गलाशासनम्.
## NĀGAPURĪŚAMAṄGALĀŚĀSANAM.

Fol. 69*a*.

Benedictory stanzas in praise of Viṣṇu worshipped under the name Saundaryarāja in the sacred shrine at Tirunāgai or Negapatam (in the Tanjore district) : apparently by Vēṅkaṭēśa.

Complete.

**Beginning:**

श्रीनागनगरीशाय सुन्दराय कलिद्विषे ।
सङ्गीतवैभवायास्तु रुक्माभाङ्गाय मङ्गलम् ॥
पुष्यन्मरतकज्योतिर्दीप्ताय श्रुतिदायिने ।
श्रीकुम्भकोणनगरे शयानायास्तु मङ्गलम् ॥
मणिमुक्ताविभूषाय चतुर्बाहाय सन्ततम् ।
धृतशङ्खरथाङ्गाय सुन्दराख्याय मङ्गलम् ॥

**End:**

हंसाय पोत्रिणे मत्स्यरूपाय जगदादये ।
आसीनाय स्थितिजुषे शयानायास्तु मङ्गलम् ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
श्रीमन्नागपुरीशाय सुन्दरायास्तु (मङ्गलम्) ॥

---

(u) मङ्गलगिरिनृसिंहमङ्गलाशासनम्.
MAṄGALAGIRINṚSIMHAMAṄGALĀŚĀSANAM.

Fol. 69a.

In praise of God Nṛsiṁha, a form of Viṣṇu, worshipped in the sacred shrine at Maṅgalagiri (in the Guntur district?): by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

श्रीमते जगतीसर्गरक्षणाप्ययकेलये ।
मङ्गलाचलनाथाय नरसिंहाय मङ्गलम् ॥
ज्वालाकेशाय दंष्ट्राभ्यां भीषणायोग्रचक्षुषे ।
सर्वतोवदनायास्तु नर . . . . . . . ॥

**End:**

श्रीमते मङ्गलाभिख्यभूधराग्रनिवासिने ।
अभिरामाय सततं नर . . . . . . ॥
अवतीर्यास्तसमये रवेररिभुजान्तरम् ।
कठिनं भिन्दते भूयात् नर . . . . ॥

भक्तप्रतिज्ञासमये स्तम्भतो . . . . ॥
वादिभीतिकराचार्यमानसाब्जदिवाकृते ।
मङ्गलाचलनाथाय नरसिंहाय मङ्गलम् ॥

---

(v) चम्पकेशमङ्गलाशासनम्.

CAMPAKEŚAMAṄGALĀŚĀSANAM.

Fol. 69*b*.

In praise of God Viṣṇu worshipped in the form of Kṛṣṇa in the sacred shrine at Campakāraṇya or Mannargudi (in the Tanjore district): by the same author as of the last.

Complete.

**Beginning:**

श्रीमते क्षीरपाथोधिशयायोत्सृष्टभोगिने ।
वसुदेवात्मजायास्तु चम्पकेशाय मङ्गलम् ॥

**End:**

औदार्यप्रमुखैः पुंसां रूपेणापि गुणैरपि ।
दृष्टिचित्तहरायास्तु चम्पकेशाय मङ्गलम् ॥
वादिभीतिकराचार्यमानसाम्बुजभानवे ।
अस्मत्कुलधनायास्तु चम्पकेशाय मङ्गलम् ॥

---

(w) चम्पकेशप्रपत्तिः.

CAMPAKEŚAPRAPATTIḤ.

Foll. 69*b* and 70*a*.

Stanzas of self-surrender addressed to God Viṣṇu referred to under the last work: by the same author as of the last.

Complete.

**Beginning:**

लक्ष्मीश वत्सल सुशील ममेशशक्ति-
सौलभ्यधीमुखगुणाकर कृष्ण विष्णो ।
सौन्दर्यमुख्यगुणवारिधिदिव्यरूप
श्रीचम्पकेश चरणौ शरणं प्रपद्ये ॥

**End:**

श्रीकृष्णपुष्करिणिकातटवासनाथ श्रीद्वारकाह्वयपुरस्य तु दक्षिणस्य ।
चाम्पेयकाननपते सरसीरुहाक्ष तौ तावकीनचरणौ शरणं प्रपद्ये ॥
भक्तचम्बुपूर्णपरवादिभयङ्करार्यचित्ताकळङ्कसालिलाशयराजहंस ।
सन्दर्शितौ मम च तेन कृपालयेन श्रीचम्पकेश चरणौ शरणं प्रपद्ये ॥

Here two stanzas are added which are in praise of Tirukkaṇṇamaṅgaiyāṇḍān and Tirukkurugaikāvalappan, respectively.

---

(x) तोयाद्रीशमङ्गलाशासनम्.
TŌYĀDRĪŚAMAṄGALĀŚĀSANAM.

Fol. 70*a*.

In praise of God Viṣṇu worshipped in the sacred shrine at Tōyādri or Tirunīrmalai, a place in the Chingleput district: apparently by the same author as of the last.

Complete.

**Beginning:**

श्रीयादवकुलं मग्नं मायातो यस्समुद्धरन् ।
जाया यस्य रमा तस्मै तोयाद्रीशाय मङ्गलम् ॥
दायादो यस्य कन्दर्पस्सायाह्नाभ्राम्बरो हि यः ।
कायाथवार्चितायास्मै तोयाद्रीशाय मङ्गलम् ॥

**End:**

वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
तोयाकरशयायास्तु तोयाद्रीशाय मङ्गलम् ॥

(y) तोयाद्रिनाथप्रपत्तिः.

TŌYĀDRINĀTHAPRAPATTIḤ.

Foll. 70*a* and 70*b*.

Stanzas of self-surrender to God Viṣṇu referred to under the last work: apparently by the same author as of the last.

Complete.

**Beginning:**

भूर्यग्रभक्तिपरिपूर्णविरक्तिशालिकार्याब्धिजन्मशठजिद्विधुसेव्यमानौ ।
शौर्यप्रवेकमुखषड्गुणशोभमानवार्यद्रिनाथ चरणौ शरणं प्रपद्ये ॥

आराग्रमात्ररविसन्निभरूपबुद्धिसारावरात्मगणदेह जगन्निवास ।
धीराग्रगण्यकलिजिन्मुनिगीत तौ ते नीराद्रिनाथ चरणौ शरणं प्रपद्ये ॥

**End:**

भक्त्यम्बुपूर्णपरवादिभयङ्करार्यचित्ताकलङ्कसलिलाशयराजहंसौ ।
सन्दर्शितौ मम च तेन कृपालयेन नीराद्रिनाथ चरणौ शरणं प्रपद्ये ॥

---

(z) कोमलवल्लीप्रपत्तिः.

KŌMALAVALLĪPRAPATTIḤ.

Fol. 70*b*.

Stanzas of self-surrender to the goddess Kōmalavallī, a form of Lakṣmī, worshipped in the sacred shrine at Kumbakonam: by the same author as of the last.

Complete.

**Beginning:**

पद्मे जगज्जननि कोमलवल्लिनाम्नि श्रीकुम्भघोणनगरस्य ललामभूते ।
त्रैलोक्यरक्षिन(णि)मदार्तिभरापहन्त्री त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

**End:**

यत्कारिसूनुमुखपूर्वतनार्यमौलिष्वम्भोरुहे दयितवक्षसि जातसाम्यम् ।
न्यासे च हेमनलिनीतटधाम्नि तच्छ्रीस्त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

हे श्रीः कटाक्षलवसाधितधातृमुख्यभूते ह्यतृप्त्यमृतनायकि लोकभर्त्रि ।
वादीन्द्रभीतिकरदेशिकदर्शितं मे त्वत्पादपद्मयुगलं शरणं प्रपद्ये ॥

(*a*-1) कोमलवल्लीमङ्गलाशासनम्.

KŌMALAVALLĪMAṄGALĀŚĀSANAM.

Foll. 70*b*—71*a*.

Stanzas wishing prosperity to the goddess Lakṣmī referred to in the last work; apparently by the same author as of the last.

Complete.

**Beginning :**

जगत्सवित्र्यै शार्ङ्गेशपत्न्यै कोमलवीरुधे ।
मङ्गलाङ्ग्यै वयं नित्यं मङ्गलं प्रार्थयामहे ॥
निजैस्तारुण्यलावण्यसौन्दर्यप्रमुखैर्गुणैः ।
व्यामुग्धचित्तं शार्ङ्गेशं कुर्वन्त्यै मङ्गलं श्रिये ॥

**End :**

अपर्याप्तामृतेशस्य वल्लभे वल्लि कोमले ।
कुम्भघोणपुरीशाने मङ्गलानि भवन्तु ते ॥

Foll. 71*a* and 71*b* contain also a few stanzas eulogising Śrī-muṣṇa-Varāhasvāmin, Varavaramuni, Śaṭhāri, Kōmalavallī, etc.

---

(*b*-1) रङ्गनाथप्राबोधकस्तोत्रम्.

RAṄGANĀTHAPRĀBŌDHAKASTŌTRAM.

Fol. 72*a*.

Eulogistic stanzas addressed with a view to awaken God Raṅganātha from his bed and intended to be repeated in the early morning: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. This eulogy is a Sanskrit rendering of the Tamil work Tiruppaḻḻiyeḻucci of Toṇḍaraḍippoḍiyāḻvār

Complete. Wants seven stanzas in the beginning.

**Beginning :**

* * * *

. . . . ससुन्दरैरुपगता मुग्धाश्च विद्याधरैः
यक्षाद्युत्कृष्टकलेवराः पदजुषो रङ्गेश बोधं भज ॥

दूर्वा देयनिधिं सुराश्च कपिलामादर्शमङ्गोचिता-
नाकल्पानपि दर्शनोचिततरानादाय सद्योगिनः ॥
आयातास्सहतुम्बुरुस्सुरमुनिर्व्यक्तो दिवाकृत् स्वभा
विस्तीर्याद्य तमो गतं सुरपथाद्रङ्गेश बोधं भज ॥

**End:**

प्राबोधकस्तोत्रमिदं रङ्गेशस्य विपश्चिता ।
व्यक्तीकृतार्थं वादीन्द्रभीकृत्पुत्रेण पद्यतः ॥

---

(*c*-1) नागपुरीगुणप्रकाशः.

NĀGAPURĪGUṆAPRAKĀŚAḤ.

Foll. 72*a*.

In praise of the various forms of God Viṣṇu worshipped in the sacred shrines on the banks of the Cauveri, near Negapatam: apparently by Vēṅkaṭēśa.

Complete.

**Beginning:**

स्थले शोधकवाक्यार्थः श्रियः पत्युः प्रकाशते ।
मणिवाटमहारङ्गे सत्यतादिः परात्मनः ॥
वैकुण्ठनगरे विष्णोर्भाति मुक्तोपसृप्यता ।
अरेर्नरहरे रुक्मनाम्नः पङ्कजचक्षुषः ॥

**End:**

श्रीनागनगरीमध्ये चाकशीत्यविकारिणः ॥
लक्ष्मीरङ्गे नामसाम्याच्छेषशायित्वलक्षणम् ।
भासते रङ्गराजस्य साम्यं सह्यजयान्विते ॥
गजेन्द्रादिभजद्वर्गपरमापत्सहायता ।
माणिकूटे जगन्मूर्तेः प्रकटीक्रियते प्रभोः ॥
अशरण्यशरण्यत्वमधितालवनं हरेः ।
श्रीचम्पकेशवेषस्य विशदीक्रियते भृशम् ॥

* * * *

पृथातनयशय्यायां हतकंसमदावले ।
रमेशे दृश्यते रम्ये पुंसोऽपि स्त्रीत्वदायिता ॥

---

(d-1) भगवन्मङ्गलाशासनम्.

BHAGAVANMAṄGALĀŚĀSANAM.

Foll. 72*a*—73*a*.

Benedictory stanzas addressed to the different forms of Viṣṇu mentioned in the last work: by the same author as of the last.

Complete.

**Beginning:**

मणिवाटमहारङ्गनिलयायाभ्रदेहिने ।
नारायणायामेयाय नन्दादीपाय मङ्गलम् ॥

**End:**

क्षीराब्धितीरवासाय मारोल्लसितमूर्तये ।
तारेशवदनायाहिपुरीशायास्तु मङ्गलम् ॥
अरुणाम्बुजसङ्काशचरणाम्बुजशालिने ।
पुरुषोत्तम लक्ष्मीश गुरुमङ्गलमस्तु ते ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
पुरुषोत्तमनाथाय पुरुषायास्तु मङ्गलम् ॥

Fol. 73*a* contains a few lines of Bhūtaśuddhi and foll. 73*b*—74 contain commentary in Maṇipravāla on some Sanskrit passages.

---

(e-1) यामुनार्यपञ्चविंशतिः.

YĀMUNĀRYAPAÑCAVIṀŚATIḤ.

Foll. 75*a*—76*a*.

Twenty-five stanzas in praise of Yāmunācārya, also well-known as Āḷavandār, son of Īśvaramuni and grandson of Nāthamuni: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

**Complete.**

**Beginning:**

नाथाभिधानयमिनस्तनयाद्धरण्यां योऽजायतेश्वरमनेर्दिवसाधिनाथे ।
ऋक्षे कुळीरमधितिष्ठति वैश्वदेवे तं यामुनेयमुनिवर्यमहं भजामि ॥

बाल्ये य एष विदिताखिलशास्त्रवर्गः पात्रावलम्बनमहो विरचय्य गोष्ठ्याम् ।
राज्ञो निरस्तपरवादिगणो महिष्या दत्तस्ववल्लभपणार्पितदेशराज्यः ॥

**End:**

विज्ञापनं यदिदमद्य तु मामकीनमङ्गीकुरुष्व करुणार्णव यामुनार्य ।
अस्मत्कुलेशपरवादिभयङ्करार्यं वीक्ष्य प्रसीद मम वृत्तमचिन्तयित्वा ॥

प्रोक्तां सुतेन परवादिभयङ्करस्य श्रीवेङ्कटेशकविना यमुनालयस्य ।
यः पञ्चविंशतिमिमामनुसन्दधानः कालं क्षिपेत्सखलु धन्यतरो धरित्र्याम् ॥

---

(*f*-1) शठकोपशतकम्.
ŚAṬHAKŌPAŚATAKAM.

Foll. 76*a*—81*b*.

A centum of stanzas in praise of Vakulābharaṇa or Saint Śaṭhakōpa: by Vēṅkaṭēśa, son of Vādibhīkara or Prativādibhayaṅkarārya.

Complete.

**Beginning:**

अस्मत्कुलाधिपतिमद्भुतवैभवाढ्यमाराधयन्तमनिशं परिपूर्य वीथीम् ।
आयान्तमागमशिरोग्रगलैकचित्तमाचार्यमाकलितवादिभयं प्रपद्ये ॥

प्रपन्नजनकूटस्थं वकुलाभरणं मुनिम् ।
नौमि दासस्य सिद्ध्यर्थं पद्यमित्यादिनीतितः(!) ॥

वकुलाभरणाचार्य श्राव्यां सज्जनकर्णतः ।
त्वमेव देहि वाचं मे कृपास्ति यदि ते मयि ॥

**End:**

नाथाभिधायोपदिशन् प्रबन्धानशेषतः स्वस्य मुनिस्स्ववाचा ।
प्रवर्तितात्मोक्तिचयोऽप्यनेन कुर्यात् स्वसूक्तौ निरतं सदा माम् ॥
संवीक्ष्य रम्यवरदं परमं गुरुं मे त्वत्सूक्तिमेव सततं परिशीलयन्तम् ।
मद्वृत्तचिन्तनमृते स्तुतिवाचमेतामङ्गीकुरुष्व शठकोपमुने दयालो ॥
वादीन्द्रभीकरसुतेन वृषाद्रिनाथनाम्ना कृता स्तुतिरियं शठशात्रवस्य ।
अङ्गीकृतार्यहृदयार्थगणप्रकाशकारिण्यनल्पमतिभिस्त्वनसूयुभिस्स्यात् ॥

Foll. 81*b* and 82*a* contain some stanzas relating to the realisation of Lakṣmī by the author. Foll. 82*a* to 84*a* contain stanzas giving the line of teachers through whom the Śrībhāṣya and the Īḍu (a commentary on the Tiruvāymoḻi) were handed down.

---

(*g*-1) रामसंबोधनस्तोत्रम्.

RĀMASAMBŌDHANASTŌTRAM.

Foll. 84*a*—87*b*.

A eulogy addressed to Rāma with a view to secure protection. The peculiarity of this work is that all the names and attributes relating to Rāma are introduced in the stanzas only in the vocative case and that the thread of the story of the Rāmāyaṇa is indicated by means of such attributes: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

मत्स्य कूर्म किटे मर्त्यसिंह वामन भार्गव ।
राम प्रलम्बहन् कृष्ण कल्किन् पाहि दशाकृते ॥
राम दाशरथे रक्ष कौसल्यातनयाग्रज ।
भरतस्य च सौमित्र्योः क्रीडापर मनोहर ॥
अधीतवेदवेदाङ्गधनुर्वेद महामते ।
कौशिकार्थिततल्लब्धबलातिबल पाहि माम् ॥

**End:**

पुराय भूयात् साकेतनाम्ने दिव्यर्धिमेयुषे ।
अस्तूत्तराय देशाय कोसलायापि मङ्गलम् ॥

सम्बोधनमिदं स्तोत्रं सूनुना वादिभीकृतः ।
वेङ्कटेशेन रामस्य रचितं जयतात्सदा ॥

(*h*-1) रङ्गेशचित्रप्रबन्धः.

RAṄGĒŚACITRAPRABANDHAḤ.

Foll. 87*b*—88*b*.

A kind of peculiar composition in praise of God Raṅganātha of Srirangam: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

एकं निदानं समस्तजगतामनभिमतनिवारणाभिमतसम्पादनद्वय-साधनमेकं प्रदीपमविद्यातमोनिरसनेऽपि एकं सुधांशुं सज्जनमनःकुमुद-विकासने सकलसुरवन्दितचरणारविन्दद्वयं त्रिणयनशापमोचकं कमलायै द्वयप्रवक्तारमेकं शिखावन्तमाश्रितजनदुरितगहनेऽपि एकं गोत्रभिदं नख-कुलिशेन हिरण्यगिरिविदारणे जनतानामनुकूलानां चोन्निनीषाधोनि-नीषावशेन साध्वसाधुकर्मद्वये कारयितारं त्रिविक्रमरूपमाक्रान्तचतुर्दिगन्तं त्रयीशिरसामप्यवाङ्मनसगोचरवैभवम् ।

**End:**

अप्रमेयशक्तिमखिलजगत्स्वामिनमस्मत्स्वामिनं श्रीरङ्गनाथमाकिञ्चन-शिखामणिरनन्यगतिस्त्वमूर्धाभिषिक्तः शरणमहं प्रपद्ये ॥

चित्रप्रबन्धो रङ्गेशविषयो राजते कृतः ।
वादिभीकरपुत्रेण वेङ्कटेशाभिधाजुषा ॥

(*i*-1) श्रीमुष्णनायकस्तोत्रम्.

ŚRĪMUṢṆANĀYAKASTŌTRAM.

Foll. 88*b*—89*a*.

A eulogy on God Viṣṇu worshipped as Bhūvarāha in the sacred shrine at Śrīmuṣṇam (in the South Arcot district).

Complete.

**Beginning:**

श्रितसुमुष्ण भो श्रीवराह ते पदसरोरुहे पल्लवोपमे ।
मदघतोदने मञ्जुभूषणे नमति मे शिरो नाकिसन्नुते ॥
वहति मेदिनीं वार्धिमेखलां कुमतिदुर्लभं कोमलाकृतिम् ।
विशदमेघभं विश्रुतं हि यत् श्रुतिशिरस्सु मे शोभते हृदि ॥
तज्ञभूभृता कोलमीडितं मुरभिदं भजे मुष्णनायकम् ।

**End:**

दमितदण्डकं दक्षिणामुखं विधृतमण्डनं विश्वमोहनम् ।
कमलवासिनीकम्रवक्षसं पुरुषपुङ्गवं पोत्रिणं भजे ॥

Fol. 89*a* contains also a few stanzas of benediction addressed to Kalijit or Tirumaṅgaiyāḻvār.

---

(*j*-1) नागपुरीविजयस्तोत्रम्.
NĀGAPURĪVIJAYASTŌTRAM.

Fol. 89.

In praise of the sacred Viṣṇu shrine in Negapatam, which has been glorified by Kalijit or Tirumaṅgaiyāḻvār: apparently by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

पनसचम्पक . . . . . (मधुक)राहितझङ्कृतिमाधवी ।
कदलिकावनपूगपरिष्कृता विजयते भुवि नागपुरी शुभा ॥
त्रिविधवह्निचतुःश्रुतिलम्पटैर्विहितपश्च . . . . . भिः ।
रचितवासवती धरणीसुरैः विजयते भुवि नागपुरी शुभा ॥

**End:**

कदलिकापरिपूर्णरसादनीं कृतवता सजता कपिना शिशुम् ।
कृतनिवस्तिरसालमहीरुहे विजयते . . . . . . . . ॥

सकलभौमजनस्तुतनागपुर्यधिप . . . . . . . . . षा ।
कलिजिता परिनन्दितवैभवा विजयते भुवि नागपुरी सदा ॥

A few stanzas of miscellaneous nature are added.

Foll. 89*b*—90*a* contain a stanza giving the summary of Saṅkalpasūryōdaya.

---

(*k*-1) मङ्गलाचलेशनृसिंहप्रपत्तिः.
MAṄGALĀCALEŚANṚSIṀHAPRAPATTIḤ.

Fol. 90*a*.

Stanzas of self-surrender addressed to God Nṛsiṁha worshipped in the sacred shrine at Maṅgalagiri: by the same author as of the last.

Complete.

**Beginning:**

श्रीमन्नृसिंह कनकाह्वय देववैरिवक्षःक्षतिप्रहरणायितपाणिजात ।
श्रीमङ्गलाचलपते शतपत्रतुल्यौ तौ तावकीनचरणौ शरणं प्रपद्ये ॥
कल्पाङ्कुशातपनिवारणवज्रकुम्भमत्स्यध्वजाम्बुजमुखैर्महनीयचिह्नैः ।
संभूषितावतुलमङ्गलशैलनाथ श्रीमन्नृसिंह चरणौ शरणं प्रपद्ये ॥

**End:**

उग्रज्वलन् सकलभीषण भद्र विष्णो वीराग्रगण्य विविधानन मृत्युमृत्यो ।
वादीन्द्रभीतिकरदेशिकदर्शितौ ते श्रीमन् नृसिंह चरणौ शरणं प्रपद्ये ॥

---

(*l*-1) परकालशतकम्.
PARAKĀLAŚATAKAM.

Foll. 90*a*—94*a*.

This is a summary in one hundred and eight stanzas of the Tamil work Periyatirumoḻi of Tirumaṅgaiyāḻvār, each stanza containing the subject-matter of one of the one hundred and eight sub-sections into which the Tamil work is divided. The author of the Tamil work is incidentally praised, and the first letters of the one hundred and eight Sanskrit stanzas are made to coincide with the first letters of the one hundred and eight sub-sections. By Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

कलिजिद्गुरुदिव्योक्तिदशकाद्यक्षरादिमैः ।
एष संस्तूयते पद्यैस्तत्तात्पर्यप्रकाशकैः ॥
वाराहकरुणालब्धसार्थमूलमनुः कविः ।
तज्ञाकलशघोणे द्वे प्राह स्म प्रेमगौरवात् ॥
वाग्लिमृत्यादिचरितं . . . लिलक्ष्मीपतिस्थितम् ।
हिमाचलस्थलं याहि चेत इत्यब्रवीत् समुत् ॥

**End:**

वेङ्कटेशेन वादीन्द्रभीकृद्देशिकसूनुना ।
प्रोक्तं कलिघ्नशतकं प्रतिगृह्णन्तु वत्सलाः ॥
परकालस्य शतकं पठन्ति भुवि ये नराः ।
तेषां तत्कृपया भोगमोक्षौ करतलस्थितौ ॥
परकालमहासूक्तिनिष्णाताः प्रेमशालिनः ।
सङ्ग्राहिकां तदर्थानामङ्गीकुर्वन्त्विमां कृतिम् ॥

Foll. 94*a* and 94*b* contain a (Yamaka) stanza from the Pādukā-sahasra as well as its commentary.

---

(*m*-1) कृष्णवत्सरावलिस्तोत्रम्.
KṚṢṆAVATSARĀVALISTŌTRAM.

Foll. 94*b* – 97*a*.

A eulogy on Lord Kṛṣṇa in sixty stanzas, each of which contains respectively the names of the successive years of the sixty year Indian cycle: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

अस्मद्गुरूंस्तदाचार्यानपि सर्वगुरूनहम् ।
नमामि शिरसा वाचा स्तौमि ध्यायामि चेतसा ॥

अब्दवाचिपदोपेतपद्यजालेन माधवम् ।
स्तोष्यामि देवकीसूनुमस्मदन्वयदैवतम् ॥
विश्वस्य प्रभवं वेदमौलयो यं प्रचक्षते ।
स भाति यदुवंशस्य परिष्कारो रमापतिः ॥

**End:**

संपूर्य वीथिमायान्तं गवां पश्चात्सवेणुकम् ।
गोपजैर्बालगोपालं नमाम्यक्षयसम्पदम् ॥
वादिभीकरपुत्रेण वेङ्कटेशेन धीमता ।
कृता स्तुतिः कवीन्द्रेण कृष्णेन विषयिण्यसौ ॥
वत्सरावली मत्सरातिकैर्विश्वमोहिनी शश्वदुज्ज्वला ।
दृश्यतामियं वश्यमानसैर्भद्रदा भवेद्विद्रुतामतिः ॥

Foll. 97 and 98 contain Maṇipravāla passages relating to a commentary on a Tamil stanza.

---

(*n*-1) घटनृत्तेशमङ्गलाशासनम्.
GHAṬANṚTTĒŚAMAṄGALĀŚĀSANAM.

Foll. 99*a* and 99*b*.

Benedictory stanzas addressed to God Viṣṇu worshipped in the form of Kṛṣṇa dancing with a pot of nectar in his hand in the shrine of Arimēyaviṇṇagaram at Tirunāṅgūr in the Tanjore district: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya. In the end reference is made to one Varada, *i.e.*, Varadācārya, who caused the construction of certain portions of the temple in that place.

Complete

**Beginning:**

हरिवासान्तरिक्षाह्वनगरीमधितिष्ठते ।
कमलावानिनाथाय घटनृत्ताय मङ्गलम् ॥
नरकारातये हेतिपतिवाहाय नाकिनाम् ।
अमृतं ददते भूयाद्घटनाथाय मङ्गलम् ॥

**End:**

वसन्तो वैष्णवास्तुभ्यं मङ्गलानि प्रयुञ्जताम् ॥
विमानगोपुरमुखैः वरदारचितैः शुभैः ।
कैङ्कर्यैः प्रीतचित्ताय घटनृत्ताय मङ्गलम् ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
घटनर्तनलक्ष्मीश मङ्गलानि भवन्तु ते ॥

---

(o-1) ஜ்ஞானஸாரஸங்க்ரஹம்.

JÑĀNASĀRASAṄGRAHAM.

Foll. 100*a*—147*b*.

See the Tamil Part of this Catalogue.

Complete.

---

(p-1) कूरेशस्तोत्रम्.

KŪRĒŚASTŌTRAM.

Foll. 147*b*—148*a*.

A eulogy on Kūrēśa or Kūrattāḻvār also known as Śrīvatsacihnamiśra, a chief disciple and collaborator of Rāmānuja: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

श्रीमान् यतीन्द्रपदपङ्कजसंश्रितानां
कूरान्ववायजलधेः प्रथमस्सितांशुः ।
श्रीवत्सचिह्न इति भूमितले विभाना(ता)त्
श्रीमत्पराशर इति प्रथितश्च सूरि(नु)ः ॥
श्रीवत्सचिह्नगुरुपुङ्गव मादृशानां
रक्षाप्रवीण करुणार्णव लोकपूज्य ।
वादीन्द्रमत्तगजपञ्चमुखागमान्त-
युग्मार्थवित्तम शुभं मम कुर्वशेषम् ॥

**End:**

बोधायनेन रचितां सकृदेव वृत्तिमालेख्य चेतसि दधार हि यस्तदर्थान् ।
श्रीवत्सलक्ष्मणगुरौ मम देशिकेऽस्मिन् भारं समर्प्य सकलन्त्वभरोऽभयोऽस्मि॥
वादीन्द्रभीकरसुतेन कृतां वृषाद्रिनाथेन ये कृतिमिमां धरणौ पठन्ति ।
श्रीवत्सचिह्नविषयान्त इमे तदीयकारुण्यतो मतिसुखाढ्यतरा भवेयुः ॥

---

(*q*-1) शार्ङ्गपाणिभुजङ्गप्रयातम्.

ŚĀRṄGAPĀṆIBHUJAṄGAPRAYĀTAM.

Fol. 148.

A eulogy in stanzas of the Bhujaṅgaprayāta metre on God Śārṅgapāṇi, a form of Viṣṇu, worshipped in the sacred shrine at Kumbakonam: by Vēṅkaṭēśa.

Complete.

**Beginning:**

भुजङ्गप्रयातस्तुतिं कुम्भघोणक्षितीशस्य रम्यां यथाशक्ति कुर्वे ।
इमामार्यमिश्रा विलोक्य प्रहृष्टा भवन्तु प्रसन्नस्तदा शार्ङ्गपाणिः ॥
भुजङ्गाधिपस्य स्फटामण्डलस्थज्वलद्रत्नकान्तिप्रलिप्ते सुभोगे ।
शयानं रमाभूलसत्पार्श्वयुग्मं भजे शार्ङ्गपाणिं मनोहारिरूपम् ॥

**End:**

भुजङ्गप्रयातस्तुतिं वेङ्कटेशप्रणीतां लिखंश्चापलाच्चापि शृण्वन् ।
स शेषे शयाने पुरे कुम्भघोणे हरौ भक्तियुक्तो भवेदेव शीघ्रम् ॥

---

(*r*-1) शार्ङ्गपाणिस्तोत्रम्.

ŚĀRṄGAPĀṆISTŌTRAM.

Fol. 149*a*.

Similar to the above, but the stanzas here are in different metres.

Complete.

**Beginning:**

वारिदप्रकाशगौरिभतृपालभूरिसत्-
गुणौघवैरिपक्षकाल . . . . . .
नीलरत्नशोभसालभित्सुबाणहेल-
मत्र्यसिंहकोलकृष्णरामम् ।
नखराग्रविनिकृत्तकनकप्रतीक

**End:**

वामदाग्विहारभूमतिस्वसेविहेम-
कुम्भघोणधामनि स्थिराशा ।
तद्दत्तमृगमेय मयि देवदेव ॥

---

(s-1) प्रमेयशेखरकारिका.

PRAMĒYAŚĒKHARAKĀRIKĀ.

Fol. 149.

A work giving in the form of verses what is stated in the Maṇipravāla work, Pramēyaśēkhara, of Lōkācārya described under No. 931 of the D.C. Tamil MSS, Vol. II: by Vēṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

निर्हेतुककटाक्षेण सुकृतं स्यादयत्नतः ।
अद्वेषस्तु ततस्सिध्येत्तन्मूलकमनुत्तमम् ॥

आभिमुख्यं तदीयेषु ततस्स्याद्भगवत्यपि ।
ततस्त्याज्यसमादेयविभागज्ञानकौतुकम् ॥

**End:**

सर्वत्र काले सर्वस्मिन्नवस्थास्वखिलास्वपि ।
सर्वप्रकारकैङ्कर्यं सिध्येत् स्वामिनियोगतः ॥

यः प्रमेयाणि संगृह्य ज्ञातव्यान्यखिलान्यपि ।
प्राकाशयत्तदार्याणां वन्दे लोकार्यमुत्तमम् ॥

प्रमेयशेखरमिदं लोकाचार्यविनिर्मितम् ।
पद्याकारेण रचितं वादिभीकरसूनुना ॥

(*t*-1) हस्तिगिरीशस्तोत्रम्, सव्याख्यानम्.

HASTIGIRĪŚASTŌTRAM WITH COMMENTARY.

Foll. 149*b*—152*b*.

A eulogy on Viṣṇu worshipped under the name of Varadarāja in the sacred shrine of Hastigiri in Conjeeveram. The stanzas of the work illustrate the figure of speech known as the Ardha-Yamaka, *i.e*, portion of a half of each stanza is similar in form to the other half but with a different meaning.

Incomplete.

**Beginning:**

जीयात् द्विरदगिरीशो मारमनोज्ञो महीसुरा यद्वाः ।
अभ्यस्यन्ति यतोऽस्तं मारमनोज्ञो मही सुरा यद्वाः ॥

यद्वाः भूसुराः यद्वा अभ्यस्यन्ति यतः अमारम् अरसहितम् । अनः अस्तं मारमनोज्ञः ज्ञः महीसुराः द्विरदगिरीशः जीयात ।

यस्य पयोधेः पार्श्वे तनयां कल्याणगुणसमानाङ्गीम् ।
भूम्यासीनामाहेतनयां कल्याणगुणसमानाङ्गीम् ॥

**End:**

नागः नागगिरिः भुजङ्गगिरिर्हस्तिगिरिर्वा नागशब्दस्योभयार्थकत्वात पदद्वयेनाप्यस्य श्लोकस्य स्थलत्रयविषयत्वमुक्तं विकल्पेन उरः उकारवाच्यां राति गृह्णातीत्युरः लक्ष्मीधर इत्यर्थः उरगे उर इत्यनेन तया सहासीनमनन्त-भोगिनीत्येतदनुस्मारितम्.

उदीरितकलाकस्थगोवाच्यकृतिशालिनः ।
गोहेतुगोमद्रोलोकी स्यादोकश्शयगं ततः ॥

भगवदभिहितगीताशिरोवर्तमानचरमश्लोकप्रतिपाद्यप्रपत्त्या विराजमानस्य.

* * * *

अत्यकः कानलदीप्तं तत्स्थानं विष्णोर्महात्मन इत्युक्तत्वात् एवमुचितं तत्र ओकः तस्य भगवतः स्थानम्। षष्ठ्यास्तसिल्। सार्वविभक्तिकत्वात्तस्य। शालिनश्शयगमित्यन्वयः ।

(u-1) भक्तनाथमङ्गलाशासनम्.

BHAKTANĀTHAMAṄGALĀŚĀSANAM.

Foll. 152b—153b.

In praise of God Dēhalīśa, a form of Viṣṇu, worshipped in the sacred shrine at Tirukkōyilūr, a place situated on the banks of the southern Pennār in the South Arcot district. This is included in the list of works attributed to Vēṅkaṭēśa. The construction of the huge unfinished outer gate-way of the temple in the place is herein attributed to Śrīśailapūrṇa.

Complete.

**Beginning:**

श्रीमद्भिस्सरसीभूतमहदाह्वययोगिभिः ।
ज्ञानप्रदीपदृष्टाय भक्तनाथाय मङ्गलम् ॥
परंकालमुनीशानादिव्योक्तचासक्तचेतसे ।
भवताल्लोकनाथाय भक्तनाथाय मङ्गलम् ॥
पेण्णानदीलसत्पार्श्वश्रीगोपनगरौकसे ।
भक्तसंमर्दसंशोभिदेहलीशाय मङ्गलम् ॥

**End:**

यतीशयोगिना श्रीमच्छैलपूर्णाह्वयोगिना ।
अपि लक्ष्मणयोगीशा सेवितायास्तु मङ्गलम् ॥
श्रीशैलपूर्णयोगीन्द्रकृतकैङ्कर्यतुष्टये ।
श्रीगोपपुरवासाय भक्तनाथाय मङ्गलम् ॥
वादिभीतिकराचार्यमङ्गलाशास्तिवैभवात् ।
दिव्यं भक्तेश्वरैश्वर्यं वर्धतामभिवर्धताम् ॥
श्रीशैलपूर्णयोगीन्द्रारब्धं पृथुलगोपुरम् ।
भक्तेश तव सङ्कल्पात् क्षिप्रं निर्वर्तय प्रभो ॥

Foll. 153b and 154 contain a few stanzas relating to Pañca-saṁskāra.

(v-1) भक्तामृतरामचरितामृतमैत्री.

BHAKTĀMṚTARĀMACARITĀMṚTAMAITRĪ.

Foll. 155a—159a.

This work attempts to show that the teachings contained in the Aṣṭākṣaramantra, in the Dvayamantra and in the Tamil Tiruvāymoḻi are also found in the Rāmāyaṇa. By Veṅkaṭēśa, son of Prativādibhayaṅkara.

Complete.

**Beginning:**

जायमानं हि पुरुषमित्यादिप्रकारेण भगवत्कटाक्षविशेषेण संपन्नसत्त्वोद्रेकस्य मोक्षार्थचिन्तकस्य . . . . . . . . . . . .

* * * *

ऋचो यजूंषीतिप्रकारेण गर्भितसकलवेदार्थः श्रीमानष्टाक्षरो मन्त्रराडेव निरन्तरमनुसन्धेयः ।

**End:**

एवं मन्त्रराजमन्त्ररत्नद्राविडब्रह्मसंहितार्थप्रकाशकत्वादिदं सद्भिस्सन्ततमादरणीयमिति सर्वं समञ्जसम् ॥

मैत्रीमिमां मनुमहीश्वरमन्त्ररत्न-
कार्यात्मजोक्तिनिवहस्य विलोकयन्तु ।
भूश्रोत्रजन्ममुनिसूक्तिचयस्य चोक्तां
वादीन्द्रभीकरसुतेन महानुभावाः ॥

---

(w-1) दुष्टशिक्षा.

DUṢṬAŚIKṢĀ.

Foll. 159a—160a.

A eulogy on God Śārṅgapāṇi, a form of Viṣṇu, worshipped in the sacred shrine at Kumbakonam. He is so called because He has the Sārṅga (the bow of Viṣṇu) in His hand for punishing the wicked and those who cause hinderance to the performance of His worship and festivals: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

देव्या श्रिया मृदुलताधिकया समेतं
वात्सल्यशीलसुलभत्वपतित्वधीभिः ।
शक्त्यापि पूर्णमभिजातपदारविन्दं
श्रीशार्ङ्गपाणिमगतिः शरणं प्रपद्ये ॥
त्राण(णाय) साधुनिवहस्य च दुष्टहान्यै
धर्मस्य च प्रतियुगं परिपालनाय ।
शार्ङ्गिन् भवाम्यहमिति ह्युदितं यथार्थं
कुर्वन् भुजङ्गशयने वितनोषि निद्राम् ॥

**End:**

एवं विरोधिनि हते भवतोऽस्तु पूजा
प्राकारगोपुरमुखं सकलं समृद्धम् ।
त्वद्दिव्यदेशवसतिं च महीसुराणां
सङ्घो मुदं भजतु सन्ततमिन्दिरेश ॥
वेङ्कटेशेन वादीन्द्रभीकराचार्यसूनुना ।
दुष्टशिक्षां कृतां वीक्ष्य प्रीतास्स्युस्सज्जना भुवि ॥

---

(*x*-1) दुष्टशिक्षा, सव्याख्या.

DUṢṬAŚIKṢĀ WITH COMMENTARY.

Foll. 160*a*—168*b*.

Same work as the above, but with the addition of a commentary by the same author as of the text It is stated herein that the author Vēṅkaṭēśa, the son of Prativādibhayaṅkara, was born and resided in Kumbakonam.

Complete.

**Beginning:**

प्रणम्य पुण्डरीकाक्षं भक्तिनम्रेण मौलिना ।
व्याख्याति दुष्टशिक्षाख्यं प्रबन्धं वेङ्कटेश्वरः ॥

इह खलु सात्त्विकजनसमावृते कलशघोणनगरे जातः तस्मिन्नेव वसन् वेङ्कटेशाह्वयो वादिभीकराचार्यदासः तत्स्वामिनि शार्ङ्गपाणावभिमान-

विशेषेण तत्पूजोत्सवादिप्रत्यूहकारिणः पाषण्डिनः घोरान् समीक्ष्य नितान्तम सहमानः क्षिपामि न क्षमामीत्युक्तवन्तं भगवन्तमेव समाश्रित्य दुष्टानामेषां शिक्षां विधेहीति प्रार्थयते अनेन प्रबन्धेन। अत एव दुष्टशिक्षेत्येतस्य नाम। दुष्टशिक्षासाधनत्वात्तच्छब्देनोपचर्यते। तत्र प्रथमश्लोकेन वक्ष्यमाण-विरोधिनिरसनप्रार्थनासाफल्यार्थं तत्र तत्र भगवदुक्तिप्रत्युक्तिसहनार्थं प्रारिप्सितस्य प्रबन्धस्य निरन्तरायसमापनार्थं च सकलफलप्रदं भगवन्तं वृणुते—देव्येत्यादिना। अत्र शरणागतिमन्त्रार्थानुसन्धानक्रमेण शरण वरणं विधीयते। अस्मिन् क्रियमाणायाः प्रपत्तेरमोक्षार्थत्वान्नोत्तरवाक्यार्थानुसन्धानम्।

End.

सङ्ग इत्यनेन श्रीकुम्भघोणस्य श्रीवैष्णवभूयिष्ठत्वमुक्तम्। सन्ततमित्यनेनेतः परमप्येतादृशो विरोधी मा भूदिति तात्पर्यम्। देव्या श्रियेत्युपक्रमादिन्दिरेशेत्युपसंहृतमिति सर्वं रमणीयम्॥

व्याख्यानं दुष्टशिक्षाया वादिभीतिकरात्मजः।
व्यतनोद्दुष्टशिक्षार्थिजनसन्तुष्टये भृशम्॥

---

(*y*-1) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 169*a*—171*a*.

Same work as that described under No. 4649 of the D.C.S. MSS., Vol. IX.

Complete.

---

(*z*-1) यतीश्वरविषयश्लोकः, सव्याख्यः.

YATĪŚVARAVIṢAYAŚLŌKAḤ WITH COMMENTARY.

Foll. 171*a*—174*b*.

A stanza with commentary in praise of Yatīśvara or Rāmānuja, who was born at Śrīperumbūdūr in the Chingleput district.

Complete.

**Beginning:**

महितामरसार्थेशहरिपादद्वयप्रदम् ।
गुरुभूतपुरोत्पत्तियुजमीडे यतीश्वरम् ॥

मकारवाच्यानां जीवानां हितमुपायभूतं पदद्वयमिति वा एवञ्चोपायत्वेनोपेयत्वेन तत्प्रद इत्यर्थः । महि उत्सवयुक्तम् । मह उद्धव उत्सव इति निघण्टुः तामरससदृशम् मध्यमपदलोपी समासः । अर्थरूपं प्रयोजनरूपमिति वा । महितं पूजितं आमरं अमरसम्बन्धि । सदा पश्यन्तीति प्रकारेण तदनुभाव्यत्वात्.

**End:**

वर्णाश्रमभेदे पुण्यानुष्ठानस्य व्यवस्थितत्वात् यथा स्ववर्णस्वाश्रमोचितपुण्यानुष्ठानं भगवत्प्रियं तथा स्वानुचितपुण्याननुष्ठानमपि तत्प्रियमेव । ब्राह्मणादिवर्णत्रयोचितं यागादिकमकुर्वन्नपि वर्णत्रयशुश्रूषाकरः शूद्रः भगवत्प्रिय एव । अतएव सप्ततौ त्रिदण्डहस्तं वेत्रसारस्त्रिदण्डं दण्डैस्त्रिभिर्मण्डितेति प्रशंसितम् । एवंभूतं यतीश्वरमीड इत्यन्वयः ॥

Foll. 174*b*—176*a* contain certain stanzas of Sarvatōbhadrabandha relating to the eulogy of Rāma. These are apparently attributed to Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

---

(*a*-2) दशावतारस्तोत्रम्.

DAŚĀVATĀRASTŌTRAM.

Foll. 176*b*—182*b*.

A eulogy on the ten incarnations of God Viṣṇu: by Vēṅkaṭēśa, son of Prativādibhayaṅkarārya.

Complete.

**Beginning:**

यो नाम पूर्वमवतीर्य ररक्ष विश्वं फेनावगाढचलदूर्मिभरेऽम्बुराशौ ।
केनाहमस्मि परवानरविन्दनेत्रं मीनाकृतिं मधुनिषूदनमन्तरेण ॥

लोकं बिभर्ति सकलं कमठो भवन् यो नाकं परेण परमे गगने विदीप्तः ।
साकं रमादिमहिषीगतबन्धनित्यैः शोकं स मे हरतु संसृतिजं मुकुन्दः ॥

**End :**

वाहाधिरूढ उररीकृतखड्गपाणिः मोहाविलां कलिविजृम्भितकल्मषाढ्याम् ।
यो हा हनिष्यति हि विष्णुयशस्तनूजो नीहारभानुवदनोऽस्तु नस्स कल्की ॥
श्रीवादिभीतिकरनामगुरोः कृदृष्टिनीवारजालशमनस्य तनूभवेन ।
सेवाकृतास्य रचितेयमहो स्तुतिर्भूदेवाभिनन्दनकरेण वृषाचलेशा ॥

---

(*b*-2) वरदराजस्तोत्रम्.

VARADARĀJASTŌTRAM.

Fol. 182*b*.

Similar to the work described under No. (*b*-1) *ante*.

Complete.

**Beginning :**

वरदं नमदरवन्तं कंसस्येभं विजित्य नमदरवन्तम् ।
भान्तं वसनापीतं सृष्ट्वा जगदत्र हृन्नवसनापीतम् ॥

**End :**

मुनिमनसारसमेतं करिगिरिनाथं मनोज्ञसारसमेतम् ।
सगुणापादनतानां वरदमुदारं प्रणौमि पादनतानाम् ॥

---

(*c*-2) सम्पत्कुमारमङ्गलाशासनम्.

SAMPATKUMĀRAMAṄGALĀŚĀSANAM.

Fol. 183.

In praise of Sampatkumāra or Tirunārāyaṇa, a form of Viṣṇu, worshipped in the sacred shrine at Melkota or Yādavācala: apparently by Vēṅkaṭēśa, son of Vādibhītikarārya.

Complete.

**Beginning :**

श्रीमते जगती . . . . . . . लये ।
यादवाचलनाथाय सम्पत्पुत्राय मङ्गलम् ॥

उपास्याय शरण्याय कारणन्त्विवतिवार्थतः ।
यो ब्रह्माणं च वेद्याय सम्पत्पुत्राय मङ्गलम् ॥

**End:**

वादिभी . . . . . . . . . . रोरुहः ।
राज . . . . . सततं सम्पत्पुत्राय मङ्गलम् ॥
भक्त्यम्बुपूर्णं सम्पत्कुमारचरणौ शरणं प्रपद्ये ॥

---

(*d*-2) *பெரியதிருமொழி, உரையுடன்.*

PERIYATIRUMOḺI WITH COMMENTARY.

Foll. 184*a*—203*b*.

See the Tamil part of the Triennial Catalogue.

---

R. No. **1454**.

Paper. 10⅜ × 8⅞ inches. Foll. 202. Lines, 28 in a page. Telugu. Good.

Purchased in 1914-15 from M.R.Ry. A. Tiruvēṅkaṭācāriyar of Dāmal in the Chingleput district.

**रहस्यत्रयमीमांसाभाष्यम्.**

RAHASYATRAYAMĪMĀṀSĀBHĀṢYAM.

Same work as that described under Nos. 5340 and 5341 of the D.C.S. MSS., Vol. XI. By Lakṣmaṇācārya *alias* Rāmānuja-dāsa.

Breaks off in the third Adhikaraṇa of the third Pāda in the first Adhyāya.

**End:**

अतस्तादृशयोग्यताविरोधिस्वशेषनिवृत्तिरवश्यं वक्तव्येति भावः । तस्मात् *ஒரு ஜீவனுக்கு ஒரு ஜீவன் தஞ்சம(ம)ல்லன்* इत्येवमादिरूपेण मन्त्र-विन्यास अनाकूत इति स्थितम् ।

**Colophon:**

इति श्रीकृष्णपाद(सूनु)लोकगुरुविरचितरहस्यत्रयमीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयपादे नमःशब्दार्थसमर्थनं नाम द्वितीयाधिकरणं संपूर्णम् ।

இத்தால் விரோயியை கழிக்கிறदिति । ननु भगवन्मुखोल्लासः परमपुरुषार्थः

* * * *

सुषुप्तिप्रलययोरतिप्रसङ्गोऽस्ति नवेति तथान्यशेषत्वादिना विरोधित्वे तन्निवृत्तीनां हेतुत्वे चोपबृंहणमस्ति नवेति च तत्र पूर्वपक्षः ।

---

R. No. **1455.**

Paper. $10\frac{1}{4} \times 7\frac{7}{8}$ inches. Foll. 89. Lines, 22 in a page. Telugu. Good.

Purchased in 1914–15 from M.R.Ry. A. Tiruvēnkaṭācāryar of Dāmal, Chingleput district.

चरमश्लोकटिप्पणीविवरणम्.

CARAMAŚLŌKAṬIPPAṆĪVIVARAṆAM.

A commentary on Lōkācārya's explanation (in the Mumukṣuppaḍi) of the Caramaślōka, which forms the 66th stanza of the eighteenth chapter of the Bhagavadgītā : by a disciple of Śuddhasattvācārya of Kauśikagōtra, who mentions with respect Varavaramuni and Vēdāntadēśika.

Incomplete.

**Beginning:**

कौशिकश्रीशुद्धसत्त्वदेशिकानुग्रहादहम् ।
विवृणोमि सतां प्रीत्यै चरमश्लोकटिप्पणीम् ॥

स्वीयश्लोकवरव्याख्यास्वान्ताविष्कारबुद्धये ।
सौम्यजामातृसूरिर्मे सन्निधत्तां सदा हृदि ॥

अस्मद्गुरुमनोजुष्टघण्टाशेषावतारयोः ।
आस्योत्थौ नादनिश्वासौ निघ्नतां स्वविघातकान् ॥

श्रीमल्लोकगुरोर्व्याख्यां चरमश्लोकगोचराम् ।
अन्तिमां साधयन्नादावाह क्रमनियामकम् ॥

ஶ்ரீஶைலஶ்ரீ ந्वित्यादि । द्वयத்துக்கு வ்யாக்யானம் செய்தவனந்தரம் சரமஶ்லோகத்தினுடைய வ்யாக்யானம் செய்கிறார் इति ।

क्रमरूपनियाम्यस्य प्रतिज्ञा த⁴ர்மத⁴ர்மிரூபமான ஸாத்⁴யஸாத⁴நரூபமாயிருந்துள்ள इति.

**End:**

शोकाविष्टमर्जुनमुद्दिश्य तस्य शोक[ा]निवृत्त्यर्थमित एतस्मादतिशयितं नास्तीति प्रतिपत्त्यर्हस्य चरमोपायस्यानुगृह्वा(ग्रहा)त् चरमश्लोक इत्यस्य नाम भूतं भवति ।

கீழே சில உபாயவிசேஷங்களை உபதேசிக்க அவை து³ஷ்கரங்கள் என்றும் ஸ்வரூபவிரோதிகள் என்றும் நினைத்து சோகாவிஷ்டனான அர்ஜுனனைக்குறித்து அவனுடைய சோகநிவ்ருத்த்யர்த்த²மாக இனி இதுக்கு அவ்வருகு இல்லை என்னும்படியான சரம உபாயத்தை ப்ரதிஜ்ஞைச்செய்கையாலே சரமச்லோகமென்று இதுக்குபேர் ஆயிருக்கிறது.

---

## R. No. 1456.

Palm-leaf. 7½ × 1¼ inches. Foll. 52. Lines, 7 in a page. Grantha. Injured.

Purchased in 1914–15 from Kadir Baig Sahib of Triplicane.

(*a*) भैरवबडबानलमालामन्त्रः.

BHAIRAVABAḌABĀNALAMĀLĀMANTRAḤ.

Foll. 1*a*—3*b*.

Similar to the work described under No. 6850 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning:**

अस्य श्रीपरमपुरुषसंज्ञाय वेदान्तवेद्यपरब्रह्मस्वरूपो दूर्वासमहर्षिः, त्रिष्टुप् छन्दः, भैरवबडबानलमहाकालपरमेश्वरो देवता । सर्वसंपदां सिद्ध्यर्थे जपे विनियोगः.

ध्यानम्—

वेधोवासववासुदेववरुणप्रद्युम्नवैवस्वत-
प्रायोदामसुरासुरेश्वरशिरस्सङ्घातसम्पादिताम् ।

प्रालम्बस्रजमुद्वहन् बत महाशूलायुधो धूर्जटिः
विश्वग्रासविलोकनो विजयते देवो महाभैरवः ॥

मूलम्—ओं नमः कालभैरवाय महादेवाय.

**End:**

भैरवबडबानलाय आं ह्रीं क्रों श्रीं ह्रीं ह्रीं क्षां क्षीं/क्षं क्षैं क्षौं क्षः क्षेत्रपालाय नमः.

---

(b) प्रत्यङ्गिरासूक्तम्.

PRATYAṄGIRĀSŪKTAM.

Foll. *4a—9b.*

Same work as that described under No. 6663 of the D.C.S. MSS., Vol. XIII, but without Ṛṣichandōdēvatā and Śāntipāṭha.

Complete.

---

(c) शरभेशाष्टकम्.

ŚARABHĒŚĀṢṬAKAM.

Foll. 10*a*—14*b*.

Similar to the work described under No. 7321 of the D.C.S. MSS., Vol. XIV.

Incomplete.

**Beginning:**

श्रीशिवौ(व उ)वाच—

श्रृणु देवि महागुह्यं परमं पुण्यवर्धनम् ।
शरभेशाष्टकामन्त्रं वक्ष्यामि त(व)तत्त्वतः ॥

शरभेश्वरमन्त्रस्य कालाग्निरुद्र ऋषिः, जगती छन्दः, श्रीभगवान् शरभेश्वरो देवता । खं बीजम्, स्वाहा शक्तिः, इष्टार्थे विनियोगः ।

ध्यानभेदं विशेषेण वक्ष्यामि(म्य)हमतश्शिवे ।
ज्वलनकुटिलकेशं सूर्यचन्द्राग्निनेत्रं
निशिततरनखाग्रोद्धूतहेमारदेहम् ।
शरभमयमुनीन्द्रस्सेव्यमानं सिताङ्गं
प्रणतभवविनाशं भावयेत् पक्षिराजम् ॥

**End :**

इति स्तुतो महादेवः प्रसन्नो भक्तवत्सलः ।
सुरानाह्लादयामास वरदानैरभीप्सितैः ॥
प्रसन्नोऽस्मि स्तवेनाहमनेन विबुधेश्वराः ।
मयि रुद्रो महादेवि भज त्वं भक्तिमूर्जिताम् ॥
मभांशे . . . . . . . . . . . . . :

---

(*d*) सुब्रह्मण्यमन्त्रयन्त्रविधिः.

SUBRAHMAṆYAMANTRAYANTRAVIDHIḤ.

Foll. 15*a*—52*b*.

On details connected with the drawing of the diagram relating to the Subrahmaṇyamantra.

Wants the beginning and the end.

**Beginning :**

पटभित्त्यालिखेद्धातुप्रस्तारक्रम मु(उ)च्यते ।
यन्त्रालयसभास्थाने अन्तर्भित्ति दृढीकृतम् ॥
भित्तीषु सौधलेप्यं च गुलोदकसमन्वितम् ।
पश्चाच्छर्करमालेप्य कपित्थसारसंयुतम् ॥
कार्पासपटसंयुक्तं शक्तुचिक्कणलेपनम् ।

* * * *

शिवपूजासमायुक्तं शिवमन्त्रविचारतः ।
गुहार्चनसमायुक्तं गुहमन्त्रविचारतः ॥
गुहतन्त्रं च मतिमान् कषाणा तत्र मन्त्रकम् ।
प्राक्पश्चात्तविधानं च असाधारणपण्डितः ॥

**End :**

वणभवशराय खै खै नमः । णं ऐं . . . . . . . . . . .
णं ळं . . . . ह्रीं ण भवशराय नमः

---

## AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

---

### IN INDIA.

A. G. Barraud & Co. (Late A. J. Combridge & Co.), Madras.
R. Cambray & Co., Calcutta.
E. M. Gopalakrishna Kone, Pudumantapam, Madura.
Higginbothams, Ltd., Mount Road, Madras.
V. Kalyanarama Iyer & Co., Esplanade, Madras.
G. C. Loganadham Brothers, Madras.
S. Murthy & Co., Madras.
G. A. Natesan & Co., Madras.
The Superintendent, Nazair Kanun Hind Press, Allahabad.
P. R. Rama Iyer & Co., Madras.
D. B. Taraporevala Sons & Co., Bombay.
Thacker & Co., Ltd., Bombay.
Thacker, Spink & Co., No. 3, Esplanade East, Calcutta.
S. Vas & Co., Madras.
S.P.C.K. Press, Madras.

---

### IN THE UNITED KINGDOM.

B. H. Blackwell, 50 and 51, Broad Street, Oxford.
Constable & Co., 10, Orange Street, Leicester Square, London, W.C.
Deighton, Bell & Co., Ltd., Cambridge.
T. Fisher Unwin, Ltd., 1, Adelphi Terrace, London, W.C.
Grindlay & Co., 54, Parliament Street, London, S.W.
Kegan Paul, Trench, Trubner & Co., Ltd., 68—74, Carter Lane, London, E.C. and 25, Museum Street, London, W.C.
Henry S. King & Co., 65, Cornhill, London, E.C.
P. S. King & Son, 2 and 4, Great Smith Street, Westminster, London, S.W.
Luzac & Co., 46, Great Russell Street, London, W.C.
B. Quaritch, 11, Grafton Street, New Bond Street, London, W.
W. Thacker & Co., 2, Creed Lane, London, E.C.
Oliver and Boyd, Tweeddale Court, Edinburgh.
E. Ponsonby, Ltd., 116, Grafton Street, Dublin.
W. Wesley & Son, 28, Essex Street, Strand, London.

---

### ON THE CONTINENT.

Ernest Leroux, 28, Rue Bonaparte, Paris.
Martinus Nijhoff, The Hague, Holland.